Pp. 15-16, Kolani Rudradeva's work, Ślokavārttikavyākhyāna or Rājarudrīya, in Pāṇinīya grammar: With this may be compared a work called Pāṇinīyavyākarṇaprapañcavṛtti, preserved in a ms. in the Chandrashamsher collection in the Bodleian Library, Oxford (d. 233). The author of this work is also mentioned as Rudra and his patron also as King Pratāparudra. The colophon in this work runs:

(इति) पाणिनीयव्याकरणप्रपञ्चवृत्तौ श्रीमहाराजाधिराजप्रतापरुद्रगुरोः प्रतापाङ्कस्य रुद्रपण्डितस्य कृतौ पञ्चमस्याध्यायस्य चतुर्थः पादः ।

P. 19, para 1, epigraphic evidence on dance in the Kākatīya period. To the inscriptions cited here may be added the Malkapuram stone pillar inscription of Kākatīya Rudrāmbā, which mentions the gift of a village Mandara (Mandaḍa) to Golaki Viśvesvaraśambhu, by his royal pupil, endearingly referred to as his son, King Gaṇapati. This epigraph describes in detail the endowments and arrangements made by Viśveśvaraśambhu at Velaṅgipūḍi, gifted to him by Gaṇapati's daugter Rudrāmbā. Provision was here made for a Śiva temple, a Śuddhaśaiva Maṭha, an Agrahāra of 60 Drāviḍa Brāhmans, students, scholars etc. including 10 danseuses, 2 Mukharīs or chief drum-masters, 8 Maddala-vādakas, *an artiste from Kashmir*, 14 songstresses, 6 Karaḍā (ṭā)-vādakas etc. These last, the musicians and dancers, were attached to the Śiva temple mentioned above called Viśveśvaradeva after the teacher-founder (MER. 1917, p. 124 ff.).

श्रीविश्वेश्वरदेवस्य नर्तक्यो दशसंख्यया ।
मुखरीद्वयसंयुक्ता अष्टौ मद्दलवादकाः ॥

* * *

एकः काश्मीरदेशीयः गायिन्य(श्च) चतुर्दश ।
करडावादनाद्येषु कृत्येषु रससंख्यया ॥

The mention of an artiste from Kashmir is to be noted.

P. 30, para 3, dance in the Vijayanagar period : Add here epigraphical evidences, Madras 558 of 1915 of A.D. 1514-15, Epi. Car. X. Sd. 100, XII. Gb. 29, mentioning land grants to Naṭṭuvas and Bommalāṭṭam players.

P. 96. Karaṇa Nupura (36th) (Jāya 100th) :

The statement here that the Recita-latā hands in this Karaṇa are only in the Kīrtidhara-version has to be modified ; Bharata too gives here Latā-recitas. (*N.Ś.* IV. 97).

P. 102, Vivartita (67th) (Jaya 93rd).

To the portrayal of this Karaṇa in the Cola frescoes in the Big Temple, Tanjore mentioned here, may be added a beautiful piece of Nolambaśiva sculpture, representing this Karaṇa in the new sculpture gallery of the Madras Museum.

P. 139, Deśī Lāsyāṅgas : It is said on this page that *some* of the Deśī Lāsyāṅgas in Jāya are mentioned by the Telugu writer Somanātha in his Basavapurāṇa, as noted on p. 29 of the Introduction. Actually, in his other work, the Paṇḍitārādhyacarita as could be seen from the long Telugu passage extracted (pp. 26-27), Somanātha has the longest list, giving about fifty of them.

V. RAGHAVAN

विषयानुक्रमणिका

प्रथमोऽध्यायः	पृष्ठ		,,	प्रक्षेप्यम्	१०
आशिषः	१		,,	आरोप्यम्	,,
नृत्तप्रशंसा	२-३	आहार्येषु		अङ्गरचना	,,
ग्रन्थकृत्प्रशस्तिः	४	,,		वर्णभेदाः	,,
ग्रन्थप्रशस्तिः	५	,,		सजीवः	,,
नृत्तकालः	६	सात्त्विकाभिनयलक्षणम्			,,
नाट्यावतारः	,,	अष्टौ सात्त्विकभावाः			,,
नाट्यलक्षणम्	७	नृत्यलक्षणम्			११
नाट्यशब्दनिष्पत्तिः	,,	नृत्यनृत्तयोः भेदः			,,
अभिनयशब्दनिष्पत्तिः	,,	मार्गदेश्योर्विभागलक्षणे			,,
अभिनयलक्षणं, तद्भेदाः	,,	नृत्यनाट्ययोः स्वरूपम्			,,
आङ्गिक-वाचिक-आहार्य-सात्त्विकरूपाः		नृत्तस्वरूपम्			,,
चत्वारोऽभिनयाः	८	नृत्तप्रयोजनम्			,,
तत्र आङ्गिकलक्षणम्	,,	देशीलक्षणम्			,,
तद्भेदेषु शारीरः	,,	शिवोपज्ञत्वं नृत्तस्य			,,
,, मुखजः	,,	लास्यताण्डवयोः विभागलक्षणे			,,
,, चेष्टाकृतः	,,	लास्यशब्दनिरुक्तिः			१२
शाखा, अङ्करः, सूचा, नृत्तम	,,	लास्यलक्षणम्			,,
वाचिकाभिनयः	,,	देव्युपज्ञत्वं लास्यस्य			,,
आहार्या ,,	९	लास्यस्य दशाङ्गानि			,,
तद्भेदेषु पुस्तः	,,	लास्याङ्गेषु गेयपदम्			,,
पुस्तभेदेषु सन्धिमः	,,	,,	स्थितपाठ्यम्		,,
,, व्याजिमः	,,	,,	आसीनम्		,,
,, चेष्टिमः	,,	,,	पुष्पगन्धिका		,,
आहार्यभेदेषु भूषा	,,	,,	प्रच्छेदकः		१३
भूषाभेदेषु आवेध्यम्	,,	,,	त्रिमूढकम्		,,
,, बन्धनीयम्	,,	,,	सैन्धवम्		,,

,, द्विमूढकम् १३
,, उत्तमोत्तमकम् ,,
,, उक्तप्रत्युक्तकम् ,,
चित्रपद-भाविकाख्ये द्वे अधिके ,,
लास्याङ्गे ,,
तदनभ्युपगमः १४
ताण्डवस्य स्वरूपम् ,,
तस्य तण्डुप्रतिपादितत्वम् ,,
तस्य प्रायः पुंभिः प्रयोगः ,,

द्वितीयोऽध्यायः

नाटयनृत्तनृत्यानामङ्गादीनि ,,
षड् अङ्गानि शिरआदीनि ,,
षट् प्रत्यङ्गानि ग्रीवादीनि ,,
षड् उपाङ्गानि नेत्रादीनि ,,
अङ्गेषु शिरसो भेदाः १५
सलक्षणविनियोगम् आकम्पितम् ,,
,, कम्पितम् ,,
,, धुतम् ,,
,, विधुतम् ,,
,, अञ्चितम् ,,
,, परिवाहितम् १६
,, आधूतम् ,,
,, अवधूतम् ,,
,, निहञ्चितम् ,,
,, अधोगतम् ,,
,, परावृत्तम् ,,
,, उत्क्षिप्तम् ,,
,, लोलितम् १७
अधिका एकादश शिरोभेदाः ,,
तत्र सलक्षणविनियोगं समम् ,,
,, नैराजितम् १७
,, तिर्यक्ततम् ,,
,, तिर्यङ्नतोन्नतम् ,,
,, पार्श्वाभिमुखम् ,,
,, उन्नीतम् ,,
,, सकम्पपरिवाहितम् १८
,, सकम्पधुतम् ,,
,, उद्धृतम् ,,
,, पार्श्वकम्पितम् ,,
,, पार्श्वाकम्पितम् ,,
उपाङ्गेषु दृष्टिः, तद्भेदाः ,,
अष्टौ रसदृष्टयः ,,
अष्टौ स्थायिदृष्टयः १९
विंशतिः व्यभिचारिदृष्टयः ,,
रसादिदृष्टीनां प्रत्येकं लक्षणविनियोग-
प्रतिपादनम् ,,
तत्र दृष्टिषु कान्ता ,,
हास्या ,,

[ग्रन्थपातः]

भारतीयनाटयशास्त्राद् दृष्टिग्रन्थपूरणम् २०
अवशिष्टा रसदृष्टयः ,,
स्थायिदृष्टयः ,,
सञ्चारि ,, २१
एतासां दृष्टीनां विनियोगः २२
तारकर्म २३
दर्शनप्रकाराः २४
पुटकर्म ,,
भ्रूकर्म २५
नासाकर्म २६
अधरकर्म षोढा २६

अधरेषु सलक्षणविनियोगं विवर्तनम्-२६
,, विसर्गः ,,
,, वेपनम् २७
,, विनिगूहनम् ,,
,, सन्दष्टकम् ,,
,, समुद्गम् ,,
मतान्तरेण अधिकाः चत्वारो-
ऽधरभेदाः ,,
तत्र आयतः ,,
रेचितः ,,
वृत्तः ,,
विकासी ,,
षट् कपोलभेदाः ,,
तत्र कुञ्चितः २८
स्फुरितः ,,
फुल्लः ,,
क्षामः ,,
पूर्णः ,,
समः ,,
सप्त चुबुकभेदाः ,,
तत्र कुट्टनम् ,,
लेहः ,,
छिन्नम् ,,
खण्डनम् ,,
चुक्कितम् ,,
समम् ,,
सन्दष्टम् ,,
षड् हनुभेदाः २९
तत्र व्यादीर्णा ,,
श्वसिता ,,
चला २९
संहता ,,
स्फुरिता ,,
वक्रा ,,
षोढा जिह्वा ,,
तत्र ऋज्वी ,,
सृक्कानुगा ,,
वक्रा ,,
नता ,,
लोला ,,
लेहिनी ,,
पञ्च दन्तकर्माणि ३०
तत्र चर्वणम् ,,
छेदनम् ,,
पीडनम् ,,
ग्रहणम् ,,
निष्कर्षणम् ,,
नव ग्रीवाभेदाः ,,
[ग्रन्थपातः]
तत्र समा ,,
अञ्चिता ,,
नता ,,
त्र्यश्रा ,,
रेचिता ३१
कुञ्चिता ,,
उन्नता ,,
वलिता ,,
निवृत्ता ,,
मुखरागभेदाः ,,

तत्र स्वाभाविकः ३१
प्रसन्नः ,,
रक्तः ,,
श्यामः ,,
मुखरागस्य मुख्यता ३१-२
हस्तलक्षणम् ३२
चतुर्विंशति-अयुतहस्तानामुद्देशः ,,
त्रयोदशसंयुतहस्तानामुद्देशः ३३
एकोनत्रिंशद् नृत्तहस्तानामुद्देशः ,,
हस्तसंख्यायां भरत-विरोधशङ्का-
परिहारः ,,
नृत्तहस्ते सोमेश्वरमतम् ३४
शङ्का-तरनिरासः ,,
असंयुतहस्तेषु सलक्षणविनियोगः
पताकः ३४-३५
त्रिपताकः ३५-३६
सर्पशिराः ३६
मृगशीर्षकः ,,
कर्तरीमुखः ,,
कटकामुखः ३६-३७
सूचीमुखः ३७-४०
तत्र सप्तधा तर्जनी ३७
शुकतुण्डः ४०
हंसास्यः ,,
कपित्थः ,,
शिखरः ,,
पद्मकोशः ४१
मुष्टिः ,,
चतुरः ४१-४२
भ्रमरः ४२
अरालः ४२
हंसपक्षः ,,
अर्धचन्द्रः ४३
संदंशः (त्रिविधः) ,,
मुकुलः ४४
ऊर्णनाभः ,,
अलपल्लवः (अलपद्मम्) ,,
ताम्रचूडः ,,
सलक्षणविनियोगाः संयुतहस्ताः ४५
तत्र अञ्जलिः ,,
कटकावर्धमानः ,,
स्वस्तिकः ,,
कर्कटः ,,
कपोतः ४५-४६
निषधः ४६
तत्र अभिनवगुप्तस्य मतभेदः ,,
कीर्तिधरस्य मुनिमतानुसारिता ,,
अन्येषामभिनवगुप्तानुसारिता ,,
उत्सङ्गः ,,
गजदन्तः ४७
अवहित्थः ,,
दोलः ,,
पुष्पपुटः ,,
वर्धमानः ,,
मकरः ,,
अभिनेयाभिनययोरनन्तता ४८
हस्तान्तराणां लोकादुन्नेयता ,,
हस्ताभिनयेऽवधेया विषयाः ,,
हस्तनाम्नामौचित्यादि ,,
प्रयोगे तेषां द्वित्रादियोगः ४९

तत्र करसञ्चारस्थलानि ४९
तत्र श्रेष्ठादिपात्रौचित्यम्, ,,
अवस्थौचित्यं च ,,
विंशतिः करकर्माणि ,,
चत्वारि हस्तकरणानि ,,
तत्र अपवेष्टितम् ५०
उद्वेष्टितम् ,,
व्यावर्तितम् ,,
परिवर्तितम् ,,
दृष्ट्याद्यनुसारेणैव हस्तप्रयोगस्य समीचीनता ,,
मुनिसंमताः पञ्च हस्तप्रचाराः ,,
अन्योक्ताः पञ्चापरे हस्तप्रचाराः ,,
तेषां मुन्युक्तभेदेषु अन्तर्भावः ५१
ततोऽप्यन्यैरुक्ताः पञ्चान्या हस्तगतयः ,,
उत्तमादिपात्रौचित्येन हस्तप्रचारः ,,
दश बाहुभेदाः ,,
तत्र ऊर्ध्वगः ,,
पृष्ठगः ,,
तिर्यग्गतः ,,
स्वस्तिकः ,,
मण्डलः ,,
अपविद्धः ,,
अञ्चितः ,,
आविद्धः ,,
कुञ्चितः ,,
अधोमुखः ,,
अन्योक्ताः षड् बाहुभेदाः ५२
तत्र सरलः ,,
आन्दोलितः ,,
नम्रः ५२
उद्वेष्टितः ,,
उत्सारितः ,,
प्रसारितः ,,
एषां मुन्युक्तभेदान्तर्भावः ,,
बाहुवर्तनाः, तेषामनन्तता ,,
वर्तनानां संख्यानियमस्य असांप्रतत्वम् ,,
हस्तप्रयोगस्य अनुचिताः भावावस्थाः ५२-५३
भावनान्तरीयकतया सिद्धस्य हस्तस्य भावेषु प्रयोगः ५३
नृत्तहस्ताः ,,
तत्र चतुरश्रौ ,,
उद्वृत्तौ ५३-५४
तलमुखौ ५४
स्वस्तिकौ ,,
विप्रकीर्णकौ ,,
अरालकटकामुखौ ,,
तत्प्रयोगे मतान्तरेण क्रमभेदः ,,
आविद्धवक्त्रौ ,,
सूच्यास्यौ ५४-५५
रेचितौ ५५
अर्धरेचितौ ,,
उत्तानवञ्चितौ ,,
पल्लवौ ,,
तत्र मतभेदः ,,
केशबन्धौ ,,
लताख्यौ ,,
तत्र मतभेदः ,,

करिहस्तौ ५५
तत्र मतभेदः ५६
पक्षवञ्चितौ ,,
पक्षप्रद्योतकौ ,,
तार्क्ष्यपक्षौ ,,
दण्डपक्षौ ,,
ऊर्ध्वमण्डलौ ,,
तस्य कीर्तिधरमतेन चक्रवर्तनिकेति नाम ,,
पार्श्वमण्डलौ ५६-५७
तस्य कक्षवर्तनिकेति नामान्तरम् ५७
उरोमण्डलौ ,,
तस्य उरोवर्तनिकेति नामान्तरम् ,,
उरःपार्श्वार्धमण्डलौ ,,
मुष्टिकस्वास्तिकौ ,,
तत्र कीर्तिधरमतम् ,,
तस्य खड्गवर्तनिकेति नामान्तरम् ,,
नलिनीपद्मकोशकौ ५८
तस्य कीर्तिधरमतेन पद्मवर्तनिकेति नाम ,,
अलपद्मोल्बणौ ,,
तस्य बाहुवर्तनिकेति नामान्तरम् ,,
ललितौ ,,
वलितौ ,,
निकुञ्चको नामाधिकोऽसंयुत-हस्तः ५८
परोक्ता अधिकाः हस्ताः ,,
द्विशिखरो नामाधिकः संयुतहस्तः ५९
वरदाभयौ अधिकौ नृत्तहस्तौ ,,
पञ्च वक्षोभेदाः ,,
सलक्षणविनियोगं तत्र समम् ५९
उद्वाहितम् ,,
आभुग्नम् ,,
निर्भुग्नम् ,,
प्रकम्पितम् ६०
पञ्चविधं पार्श्वकर्म ,,
तत्र सलक्षणविनियोगं विवर्तितम् ,,
अपसृतम् ,,
प्रसारितम् ,,
उन्नतम् ,,
नतम् ,,
मुनिमतमनुसृत्य पृष्ठलक्षणस्य पृथगकरणम् ,,
त्रिधा जठरकर्म ,,
तत्र सलक्षणविनियोगं
क्षामं ,,
खल्वम् ,,
पूर्णम् ,,
पञ्च कटिभेदाः ६१
तत्र सलक्षणविनियोगा
रेचिता ,,
कम्पिता ,,
छिन्ना ,,
निवृत्ता ,,
उद्वाहिता ६२
पञ्चधा ऊरुकर्म ,,
तत्र सलक्षणविनियोगं
कम्पनम् ,,
वलनम् ,,
स्तम्भः ,,
उद्वर्तनम् ,,
निवर्तनम् ६१-६२

सप्त जानुकर्माणि ६२
तत्र सलक्षणविनियोगं
उन्नतम् ,,
विवृतम् ,,
नम्रम् ,,
अर्धकुञ्चितम् ,,
कुञ्चितम् ,,
संहतम् ,,
समम् ,,
पञ्च जङ्घाकर्माणि ,,
तत्र सलक्षणविनियोगं परिवृत्तम् ,,
नतम् ,,
क्षिप्तम् ,,
आवर्तितम् ६२-३
उद्वाहितम् ६३
अन्योक्ताः पञ्च जङ्घाभेदाः ,,
तत्र भ्रामितम् ,,
निःसृतम् ,,
कम्पः ,,
निरश्रीनम् ,,
बहिर्गतम् ,,
पञ्च पादभेदाः ,,
तत्र समः ६३
अग्रतलसञ्चारी ६३-६४
[कुञ्चितः] ६४-६५
उद्घट्टितः ६४
अञ्चितः ,,
मतान्तरेण दशान्ये पादभेदाः ,,
तत्र ताडितः ,,
घट्टितोत्सेधः ६४-५
घट्टितः ६५
मर्दितः ,,
अग्रगः ,,
पार्ष्णिगः ,,
पार्श्वगः ,,
सूची ६५-६६
अङ्गुलीपृष्ठगः ६६
तलाहतिः ,,
पादाङ्गुलीलक्षणम् ,,
तत्र उत्क्षिप्ताः ,,
कुञ्चिताः ,,
स्तब्धाः ,,
अवक्षिप्ताः ,,
स्वभावजाः ,,
अङ्गुष्ठयुताः ६७
अङ्गुष्ठसंयुताः ,,
त्रयो अङ्गुष्ठभेदाः ,,
तत्र उत्क्षिप्तः ,,
अवनतः ,,
सहजः ,,

तृतीयोऽध्यायः

चारीलक्षणम् ६८
चारीशब्दनिष्पत्तिः ,,
चारीस्वरूपविवेकः ,,
चारीणां द्वित्रियोगकृतभेदाः
तन्नामानि च ,,
तत्र द्वयोः करणम् ,,
त्रिभिः खण्डः ,,
खण्डत्रयचतुष्टययोगान्मण्डलम् ,,

चारीणां विनियोगावसरः ६८-९

चारीणामुद्देशः ६९

तत्र षोडश भूचार्यः ,,

षोडश आकाशिक्यः चार्यः ,,

भूचारीषु सलक्षणविनियोगा

समपादा ,,

तत्र मतभेदः ७०

स्थितावर्ता ,,

जनिता ,,

अस्या मुसलघाटिकेति देशीनाम ,,

स्यन्दिता ७१

अवस्यन्दिता ,,

बद्धा ,,

शकटास्या ७१-७२

विच्यवा ७२

एलकाक्रीडिता ,,

चाषगतिः ,,

उत्स्यन्दिता ,,

अङ्किता ७३

कीर्तिधरमते अस्या अग्रथेति

नाम ,,

समोसरितभत्तल्ली ,,

लोकेऽस्या मत्तपादेति नाम ,,

मत्तल्ली ,,

अस्याः स्खलत्पादेति नामान्तरम् ,,

[अद्धर्धिका ७४ fn.

ऊरुवृत्ता] ,,

आकाशचारीषु अतिक्रान्ता ,,

पार्श्वक्रान्ता ,,

कीर्तिधरमतेनास्या लक्ष्मान्तरम् ७५

तन्मतेऽस्या पार्ष्णिचण्डघातेति

नाम ७५

अपक्रान्ता ,,

कीर्तिधरमतेन वलनेत्यस्या

नामान्तरम् ,,

सूची ,,

मृगप्लुता ,,

भुजङ्गत्रासिता ,,

अलाता ७६

तत्र मतान्तरम् ,,

नूपुरपादिका ,,

आक्षिप्ता ,,

अस्या नामान्तरम् ,,

भ्रमरी ,,

दण्डपादा ,,

विद्युद्भ्रान्ता ७७

ऊर्ध्वजानुः ,,

उद्वृत्ता ,,

अस्या नामान्तरम् ,,

दोलापादा ,,

चारीषु हस्तपादयोः मिथो

मुख्यत्वगौणत्वविवेकः ,,

चारीषु समुचितौ हस्तौ ७८

स्थानलक्षणम् ,,

स्थानशब्दनिरुक्तिः ,,

स्थानस्वरूपवर्णनम् ७९

षट् नृणां स्थानानि ,,

तत्र सलक्षणविनियोगं

वैष्णवम् ,,

समपादम् ,,

वैशाखम् ७९-८०
मण्डलम् ८०
आलीढम् ,,
प्रत्यालीढम् ,,
चत्वारो न्यायाः ,,
तेषां नामानि ८१
तत्र सलक्षणविनियोगो भारतः ,,
सात्त्वतः ,,
वार्षगण्यः ,,
कैशिकः ,,
प्रविचाराः ,,
एकहस्त-हस्तद्वय-प्रयोज्यत्वेन तेषां
भेदद्वयम् ८२
प्रविचारशब्दनिरुक्तिः ,,
रङ्गे छेदशोणितस्रुत्यादीनां
निषेधः ,,
व्यायामस्य सुकुमारतयैव निर्वर्तनम् ,,
सौष्ठवस्य नाट्ये परमावश्यकता ,,
सौष्ठवलक्षणम् ,,
अङ्ग-खर्वतायाः समुचितो मानः ८२-३
चतुरश्रलक्षणम् ८३
धनुषः करणे चत्वारो भेदाः ,,
तेषां नामानि ,,

[ग्रन्थपातः]

उपविष्टस्थानस्य अथवा आसनस्य
भेदाः ,,
[तत्र स्वस्थम्] ,, fn.
उत्कटम् ८४
योगकृतम् ,,
तस्य क्रान्तमिति नामान्तरम् ८४
चिन्ताकृतम् ,,
तस्य मदालसमिति नामान्तरम् ,,
अवहित्थम् ८५

[ग्रन्थपातः]

[विष्कम्भितम् ,, fn.
स्वस्थालसम् ,, ,,
जानुगतम् ८५-८६ fn.
मुक्तजानु ,, ,,
विमुक्तकम्] ,, ,,
षट् सुप्तस्थानानि ८६
तत्र समम् ,,
प्रसारितम् ,,
उद्वाहितम् ,,
विवर्तितम् ,,
नतम् ,,
आकुञ्चितम् ,,
अष्टौ स्त्रीणां स्थानानि ८७
तत्र सलक्षणविनियोगं आयतम् ८७-८८
अवहित्थम् ८८
अश्वक्रान्तम् ८८-९
गतागतम् ८९
वलितम् ,,
मोटितम् ९०
विनिवर्तितम् ,,
प्रोन्नतम् ,,
मण्डललक्षणम् ,,
भौम-आकाशिकभेदेन
मण्डलद्वैविध्यम् ९१
मण्डलानां विनियोगः ,,

तेषां नामत उद्देशः ९१
दश भौममण्डलानि ,,
दशाकाशिकमण्डलानि ,,
तत्र भौमेषु भ्रमरम् ९२
आस्कन्दितम् ,,
पिष्टकुट्टितम् ,,
चाषगतम् ,,
अङ्कितम् ९३
एलकाक्रीडितम् ,,
अध्यर्धम् ,,
आवर्तम् ,,
शकटास्यम् ९४
समोसरितम् ,,
आकाशिकेषु सूचीविद्धम् ,,
अतिक्रान्तम् ९४-५
दण्डपादम् ९५
अलातम् ,,
विचित्रम् ९६
विर्हृतम् ,,
वामबन्धम् ९६-७
ललितसञ्चरम् ९७
क्रान्तम् ,,
ललितम् ९७-८
मण्डलान्तराणां सम्भवः ९८
मण्डलानामुपयोगः ९९

चतुर्थोऽध्यायः

करणलक्षणम् १००
नृत्तकरणस्वरूपम् ,,
करणशब्दनिरुक्तिः ,,
अष्टोत्तरशतकरणनामानि १००-१०२
तेषां वाक्यार्थाभिनये
मुख्यतया प्रयोगः १०२
पदार्थाभिनये तत्प्रयोग-
अवसरः १०३
नर्तनारम्भे समुचितो हस्त-
पादविन्यासः ,,
करणप्रयोगे हस्तविन्यास-
प्रकारः ,,
सलक्षणविनियोगं
करणानां लक्षणम् १०४
तत्र तलपुष्पपुटम् ,,
क्रान्तम् ,,
छिन्नम् १०५
समनखम् ,,
तत्र मतभेदः ,,
अञ्चितम् १०६
शकटास्यम् ,,
तत्र भट्टतण्डु–कीर्तिधरयोर्मतम् ,,
कटिच्छिन्नम् १०७
उद्घट्टितम् ,,
निकुट्टकम् ,,
तत्र कोहलमतम् १०८
ललितम् ,,
वलितम् ,,
लीनम् ,,
स्खलितम् १०९
चक्रमण्डलम् ,,
निवेशम् ,,
स्वस्तिकम् ,,

सूची ११०
सूचीविद्धम् ,,
अर्धसूत्री ,,
वक्षःस्वस्तिकम् ,,
तत्र कीर्तिधरमतम् ,,
उन्मत्तम् ,,
अर्धरेचितम् १११
अर्गलम् ,,
तत्र भट्टतण्डुमतम् ,,
अर्धस्वस्तिकम् १११–२
तत्र कीर्तिधर-भट्टतण्डुमतम् ११२
आवर्तम् ,,
तत्र तण्डु–कीर्तिधरादिमतम् ,,
पृष्ठस्वस्तिकम् ११२–३
तत्र कीर्तिधरमतम् ११३
वर्तितम् ११३–४
तत्र मतभेदः ११४
भुजङ्गाञ्चितम् ,,
विष्कम्भः ,,
विक्षिप्तम् ,,
दण्डरेचितम् ११५
अर्धमत्तल्लि ,,
तत्र कीर्तिधरादीनां मतभेदः ,,
मत्तल्लि ,,
मदस्खलितम् ,,
तत्र कीर्तिधरमतम् ,,
लोलितम् ११६
तत्र तण्डुमतम् ,,
प्रेङ्खोलितम् ,,
नितम्बम् ,,
ऊर्ध्वजानु ११६
पार्श्वनिकुट्टकम् ११७
पार्श्वक्रान्तम् ,,
अतिक्रान्तम् ,,
तत्र तण्डुमतम् ,,
अपक्रान्तम् ,,
निकुञ्चितम् ११७–८
तत्र कीर्तिधरमतम् ११८
विद्युद्भ्रान्तम् ,,
तत्र मतभेदः ,,
कटिभ्रान्तम् ,,
उरोमण्डलम् ,,
सन्नतम् ११९
तत्र तण्डु–कीर्तिधरयो-
र्मतम् ,,
विनिवृत्तम् ,,
निवृत्तम् ,,
अपविद्धम् ,,
गरुडप्लुतम् १२०
तत्र तण्डुमतम् ,,
ललाटतिलकम् ,,
दोलापादम् ,,
तलविलासितम् ,,
तत्र तण्डु-कीर्तिधरमतम् ,,
तलसंस्फोटितम् १२१
दण्डपक्षम् ,,
आक्षिप्तरेचितम् ,,
जनितम् ,,
उपसृतम् ,,
तत्र तण्डु-कीर्तिधरयोर्मतम् ,,

उद्धृत्तम् १२२
तत्र तण्डुमतम् ,,
अवहित्थम् ,,
तत्र तण्डुमतम् ,,
निशुम्भितम् ,,
तत्र कीर्तिधरादीनां मतभेदः ,,
विक्षिप्ताक्षिप्तम् १२३-४
आक्षिप्तम् १२४
भुजङ्गत्रस्तरेचितम् ,,
मण्डलस्वस्तिकम् ,,
दण्डपादम् १२५
तत्र तण्डु-कीर्तिधरमतम् ,,
पादापविद्धकम् ,,
भुजङ्गत्रासितम् ,,
विष्णुक्रान्तम् ,,
स्वस्तिकरेचितम् १२६
एलकाक्रीडितम् ,,
संभ्रान्तम् ,,
तत्र कीर्तिधरमतम् ,,
सिंहाकर्षितम् १२६-७
तत्र कीर्तिधर-भट्टतण्डोर्मतम् १२७
सर्पितम् ,,
नागापसर्पितम् ,,
तत्र तण्डु-कीर्तिधरयोर्मतम् ,,
पार्श्वजानु १२७-८
तत्र तण्डुमतम् १२८
वृश्चिकरेचितम् ,,
लतावृश्चिकम् ,,
वैशाखरेचितम् १२९
तत्र कीर्तिधरादिमतम् ,,
हरिणप्लुतम् ,,
तत्र तण्डुमतम् १२९
दिक्स्वस्तिकम् ,,
गजक्रीडितम् ,,
चतुरम् ,,
कटीसमम् १३०
मयूरललितम् ,,
अलातम् ,,
तत्र कीर्तिधरमतम् १३१
सिंहविक्रीडितम् ,,
तत्र कीर्तिधरमतम् ,,
कुञ्चितम् ,,
वृश्चिकम् ,,
व्यंसितम् ,,
परिवृत्तम् १३२
तत्र कीर्तिधरमतम् ,,
विवर्तितम् ,,
रेचकनिकुट्टितम् ,,
ऊरूद्वृत्तम् ,,
तत्र कीर्तिधरमतम् ,,
वृश्चिककुट्टितम् ,,
तलसंघट्टितम् १३२-३
तत्र कीर्तिधरमतम् १३३
गण्डसूचि ,,
तंत्र मतभेदाः ,,
भ्रमरम् ,,
नूपुरम् १३३-४
तत्र कीर्तिधरमतम् १३४
वृषभक्रीडितम् ,,
करिहस्तम् ,,
प्रसर्पितम् १३४-५
तत्र तण्डु-कीर्तिधरमतम् १३५

वलितोरु १३५
गृध्रावलीनम् ,,
तत्र तण्डुमतम् ,,
अर्धनिकुट्टकम् १३६
तत्र शङ्कुकमतखण्डनम् ,,
गङ्गावतरणम् ,,
अङ्गहारलक्षणम् १३७
तत्प्रयोगप्रकारः ,,
अङ्गहारस्वरूपनिरूपणम् ,,
अङ्गहारेषु करणानां संख्या १३७-८
अङ्गहारशब्दनिरुक्तिः १३८
तेषां तण्डूपदिष्टत्वम् ,,
अङ्गहारोद्देशः ,,
तत्र चतुरश्रमानेन षोडश १३९
त्र्यश्रमानेन षोडश ,,
तत्र स्थिरहस्तः १३९-१४१
परिच्छिन्नः १४१
पार्श्वच्छेदः ,,
अपराजितः ,,
पर्यस्तः १४२
भ्रमरः ,,
आलीढः ,,
मत्ताक्रीडः ,,
अपसर्पितः १४३
मदाद्विलसितः ,,
विद्युद्भ्रान्तः ,,
वैशाखरेचितः ,,
सूचिविद्धः १४४
आक्षिप्तः ,,
पार्श्वस्वस्तिकः १४४
आच्छुरितः १४५
गतिमण्डलः ,,
विष्कम्भः ,,
परावृत्तः १४६
अपविद्धः ,,
मत्तस्खलितः ,,
संभ्रान्तः १४६-७
आक्षिप्तरेचितः १४७-८
रेचितः १४८-९
विष्कम्भापसृतः १४९
अलातः १५०
उद्वृत्तः ,,
अर्धनिकुट्टकः ,,
उद्घट्टितः ,,
वृश्चिकापसृतः १५१
तत्र भेदः ,,
स्वस्तिकरेचितः ,,
परिवृत्तकरेचितः ,,
अङ्गहाराणामनन्तता १५२
करणसंख्यया अङ्गहारविभागः १५२-३
अङ्गहारेषु मान-तालादि-विशेषाः १५३
अङ्गहारसंख्यानियमे हेतुः १५४
तत्र मतभेदः ,,
चत्वारो रेचकाः १५५
रेचकस्वरूपम् ,,
तत्तदङ्गस्य रेचकः १५५-६
तत्र भरतोदाहरणम् १५६
रेचकान्तरसंभवः ,, ,,

तत्र तुम्बुरोरुदाहरणम् १५६
रेचकानां फलम् १५७

पञ्चमोऽध्यायः

देशीनिरूपणम् १५८
देशीलक्षणम् ,,
देशीनिरूपणावश्यकता ,,
नृत्तरत्नावलीविरचनकलि-
वर्ष-निर्देशः ,,
ग्रन्थकर्तुः प्रभोः काकतीय-
महाराज–गणपतिदेवस्य
वर्णनम् १५८-९
त्रयोविंशतिः देशीस्थानकानि १५९-६०
तत्र समपादम् १६०
परावृत्तम् ,,
स्वस्तिकम् ,,
वृषभासनम् ,,
ब्राह्मम् ,,
वैष्णवम् ,,
शैवम् १६१
गारुडम् ,,
संहतम् ,,
पृष्ठोत्तानतलम् ,,
वर्धमानम् ,,
कूर्मासनम् ,,
एकपार्श्वगतम् ,,
नन्द्यावर्तम् १६२
चतुरश्रम् ,,
पार्ष्णिपार्श्वगतम् ,,
एकजानुनतम् ,,
पार्ष्णिविद्धम् १६२
एकपादम् ,,
नागबन्धः ,,
समसूचि १६३
विषमसूचि ,,
खण्डसूचि ,,
द्वात्रिंशद् उत्प्लुतिकरणानि ,,
तत्र अञ्चितभेदेषु अञ्चितम् १६४
कर्तर्यञ्चितम् ,,
भैरवाञ्चितम् ,,
एकपादाञ्चितम् १६५
क्षेत्राञ्चितम् ,,
स्कन्धान्ताञ्चितम् ,,
लोहड्यञ्चितम् ,,
दण्डप्रणामाञ्चितम् ,,
लङ्कादाहाञ्चितम् ,,
भ्रान्तपादाञ्चितम् १६६
अङ्गुष्ठबन्धाञ्चितम् ,,
बलिबन्धाञ्चितम् ,,
तत्र मतभेदः ,,
अलगाञ्चितम् ,,
समकर्तर्यञ्चितम् ,,
अलगभेदेषु अलगम् ,,
कूर्मालगम् ,,
ऊर्ध्वालगम् ,,
अन्तरालगम् १६७
लोहडीभेदेषु लोहडी ,,
कर्तरिलोहडी ,,
समकर्तरिलोहडी ,,
बाहुबन्धलोहडी

चित्रलोहडी १६७
एकपादलोहडी ,,
चतुर्मुखलोहडी ,,
दर्पसरणम् ,,
जलशायनम् १६८
नागबन्धः ,,
कपालस्पर्शनम् ,,
व्यङ्कोलम् ,,
सूच्यन्तम् ,,
मत्स्यकरणम् १६८-९
त्रयोदश देशीभ्रमर्यः १६९
अन्तर्भ्रमरी, बाह्यभ्रमरी ,,
छत्रभ्रमरी ,,
तिरिपभ्रमरी १७०
[ग्रन्थपातः]
[ओताभ्रमरी] १७० fn.
अलगभ्रमरी १७०
उचितभ्रमरी ,,
विद्युद्भ्रमरी १७१
हस्तभ्रमरी ,,
कुञ्चितभ्रमरी ,,
अङ्कभ्रमरी ,,
केवलसंकीर्णत्वेन भ्रमरी-
भेदाः १७२
तत्प्रस्तारः ,,
तस्य ग्रन्थकर्तुः ग्रन्थान्तरे
गीतरत्नावल्यां प्रपञ्चितत्वम् ,,

षष्ठोऽध्यायः

मतङ्गोक्ताः षोडश देशीपादाः १७३

तत्र सरिका १७३
स्वस्तिकः ,,
उल्लालः ,,
स्फुरिका ,,
अर्धपुराटी ,,
पुराटिका १७४
उद्वेष्टनम् ,,
खुत्ता ,,
अर्धस्खलितिका ,,
प्रावृतम् ,,
पृष्ठोत्क्षेपः ,,
लताक्षेपः ,,
निकुट्टकः ,,
समस्खलितः ,,
उत्क्षेपः ,,
अष्टाविंशति पाटमणयः ,,
तेषामुद्देशः १७५
तेषु ऊरुद्वयताडितम् ,,
पार्श्वोरुताडितम् ,,
व्यत्यासताडितम् ,,
स्वस्तिकताडितम् १७५-६
षिताडितम् १७६
तलताडितम् ,,
पार्श्वताडितम् ,,
क्रमताडितम् ,,
समोद्वृत्तम् ,,
स्वस्तिकोद्वृत्तम् १७७
पर्यायोद्वृत्तम् ,,
पृष्ठोद्वृत्तम् ,,
विच्युतोद्वृत्तम् ,,

पार्श्वोद्वृत्तम् १७७
स्वस्तिकविच्युतम् ,,
तलोद्घट्टितम् १७८
पादतलोद्घट्टितम्
कलनूपुरम् ,,
चित्रपाटः ,,
[विचित्रम्] ,, fn.
लुठितम् १७९
कुलुपम् ,,
अलगपाटः ,,
चतुष्कोणम् ,,
त्रिकोणम् ,,
मञ्जीरशिञ्जितम् ,,
कुचुम्बिनी १८०
षडश्रम् ,,
लङ्घितप्रतिलङ्घितम् ,,
भौम्यः, नाभस्यश्च देशीचार्यः १८१
तेषां षड्विंशति देशीचारीणां
षोडशाकाशिकीनां चोद्देशः ,,
तेषु समनखा १८२
पार्ष्णिरेचिता ,,
तलदर्शिनी ,,
अर्धमण्डलिका ,,
तिर्यक्कुञ्चिता ,,
अपकुञ्चिता ,,
सकटी १८३
उत्कुञ्चिता ,,
तिर्यङ्मुखा ,,
नूपुरविद्धिका ,,
मदालसा ,,
परावृत्ततला १८३
लङ्घितजङ्घिका ,,
मरालिका १८४
स्फुरिता ,,
ऊरुवेणी ,,
संघट्टिता ,,
हरिणत्रासिता ,,
करिहस्ता ,,
कुलीरिका ,,
स्तम्भक्रीडनिका ,,
रथचक्रा १८५
ऊरुताडिता ,,
सञ्चारिता ,,
विश्लिष्टा ,,
तलोद्वृत्तम् ,,
विद्युद्भ्रान्ता ,,
पुरःक्षेपा ,,
अवक्षेपा ,,
अङ्घ्रिताडिता १८६
डमरी ,,
भ्रमरी ,,
दण्डपादा ,,
तत्र मतभेदः ,,
बद्धा ,,
ऊर्ध्वजानुः ,,
अलाता ,,
आन्दोलिता ,,
सूची १८७
विक्षेपा ,,
हरिणप्लुता ,,

जङ्घालङ्घनिका १८७
जङ्घावर्ता ,,
तलसर्पणिका ,,
तस्याः कुलीरिकेति नामान्तरम् ,,
हंसरुतम् १८८
तित्तिरिगतिः ,,
अन्तरपद्मासनम् ,,
षट्चत्वारिंशद् देशीलास्याङ्गानि ,,
ते गमुद्देशः १८८-९
तेषु सौष्ठवम् १८९
तत्र खर्वतामर्यादा १८९-१९०
स्थापना १९०
रेखा ,,
डालः ,,
चालिः ,,
चलावलिः ,,
ललिः ,,
तृक्कनिः १९१
उल्लासः ,,
सुकलासम् ,,
उरोङ्कणम् ,,
भावः १९२
थरहरम् ,,
कित्तु ,,
देशीकारम् ,,
निजापणम् ,,
डिल्लायी १९३
लवणिः ,,
गीतवाद्यता १९३
अभिनयः ,,
लयः १९४
कोमलिका ,,
ओयारः ,,
अनीकी ,,
अङ्कहारः १९५
मनोधर्मः ,,
अङ्कम् ,,
अनङ्कम् ,,
विवर्तनम् ,,
मङ्का ,,
मुखरसः ,,
ठेवा १९६
विहसी ,,
धसक्कः ,,
तलम् ,,
वितलम् ,,
रसवृत्तिः ,,
मसृणता १९७
अनुमानम् ,,
प्रमाणम् ,,
लंघितम् ,,
अंशगतिः ,,
सुसन्धिः ,,
पादपाटः १९८
गतिस्थम् ,,
चण्डनम् ,,
नर्तने द्रुतमध्यविलम्बिताः तिस्रो गतयः ,,

तासां शुद्धसङ्कीर्णतया द्वैविध्यम् १९८
तासां लक्षणम् १९९
एकविंशतिः सङ्कीर्णगतयः १९९-२००
गतिषु अन्ये तालविशेषाः २००
अन्ये त्रयो गतिभेदाः ,,
तत्र एकसरा ,,
द्विसरा २०१
त्रिसरा ,,
एतासां स्वस्तिकपूर्वकत्वे भेदान्तराणि ,,
गतीनामनन्तता ,,

सप्तमोऽध्यायः

नृत्यारम्भयोग्याः तिथयः २०२
रङ्गभूमिः ,,
नाट्यशिक्षारम्भे विघ्नेश्वरादि-पूजा ,,
शिक्षापद्धतिः २०३
शिक्षायोग्या कन्या ,,
तन्नेपथ्यम् ,,
शिक्षोपकरणदण्डिकाया लक्षणम् ,,
दण्डिकोपयोगः ,,
अभ्यासक्रमः २०३-२०४
अभ्यासागोचरीभूतानि-पाटव-सिद्धिहेतूनि नृत्तरहस्तानि २०४-२०५
भावप्राधान्यम २०५
करानुसारित्वं दृष्टिमनोभावानाम् ,,
वाद्यपद्धतिः ,,
मतङ्गमुनेः तत्कृतबृहद्देश्याश्च उदाहरणम् २०५
शुद्ध-चित्र-भेदेन वाद्य-पद्धत्या द्वैविध्यम् ,,
प्रथमं समहस्तः ,,
नर्तकीप्रवेशः ,,
पुटिलम् (अथवा कुटिलम्) २०६
कतिचन गतयः ,,
योज-खण्डयति-पद-मलप-पाटैः शुष्कवाद्यम् ,,
तालवाद्यैः पाटाः ,,
किमपि गीतम् ,,
पुनः शुष्कवाद्यम् ,,
अवच्छेदः (अथवा लयच्छेदः) ,,
द्वितीय-तृतीय-चतुर्थतालैः एतस्यैव विधेरावृत्तिः २०७
चित्रपद्धतिः ,,
तस्या गीतान्वितत्वम् ,,
देशीवृत्तभेदाः ,,
तत्र पेरणी ,,
तन्नर्तकस्य पेरणिनो लक्षणम् २०७-८
तत्सहायाः २०८
तत्प्रवेशः ,,
पञ्च पेरणाङ्गानि ,,
तेषु नृत्तम् ,,
कैवारः २०९
सप्तधाभिन्नः घर्घरः ,,

तत्र चाघडः २०९
पडिवाडः ,,
रुन्धः ,,
सिरिभिरः २१०
खलुहुलः ,,
अलम्पाटः ,,
सिरिपिटी ,,
घग्घरे षट् पादभेदाः ,,
चतुर्थं पेरणाङ्गं विकटम् २११
गीतम् ,,
पेरणिपद्धतिः २११-२१३
समहस्तवादनम् २११
यति-रिगोणी-पदैः ,,
शुष्कवाद्यम् ,,
उपशमयत्या प्रविश्य
नर्तनम् ,,
कैवारालापः ,,
घग्घरैः पादचालनम् २१२
अन्तरा ,,
प्रहरणम् ,,
विषमताण्डवम् ,,
विकटाङ्कताण्डवम् ,,
सूडगानम् ,,
प्रबन्धवादनम् ,,
गीतोचितयतिवादनम् ,,
घग्घरीवादनम् २१३
आभोगगानम् ,,
गजरवादनम् ,,
विकटनर्तनम् ,,
तकार-छण्डने ,,
अन्यप्रबन्धानामपि
एवमेव प्रयोगः २१३
देशीपद्धतिः ,,
आतोद्यमेलनम् ,,
समहस्तम् ,,
यतिप्रहरणे ,,
पुष्पाञ्जलिः ,,
ङ्कारः ,,
रिगवणी ,,
तुण्डुकम् ,,
चमत्कारः ,,
यतिः ,,
प्रहरणम् ,,
नर्तक्या रङ्गप्रवेशः २१४
मुखवाद्यमथवा ,,
पुटिलम् (कुटिलम्) ,,
अस्यैव प्रबन्धस्य
लोके पुष्पाञ्जलिरिति नाम ,,
तत्र कांस्यतालनिषेधः ,,
तत्रोचिताः ताला ,,
प्रेङ्खणपद्धतिः २१५
तत्र ङ्कारः ,,
ओता ,,
कविता ,,
अवच्छेदः ,,
मलपः ,,
प्रहरणम् ,,
प्रेङ्खणनर्तनलक्षणम् ,,
सूडनर्तनम् ,,
शुद्धसालगभेदेन तद्द्वैविध्यम् ,,

तत्क्रमे नव प्रबन्धाः २१५
तन्नर्तनप्रकारः २१६
तदुचितास्सप्त तालाः ,,
रासकनर्तनलक्षणम् ,,
तत्र चतुर्विधः बन्धः ,,
तेषु पिण्डी ,,
शृङ्खला ,,
भेद्यः ,,
लता ,,
तत्र पात्रसंख्या ,,
पात्रनेपथ्यम् ,,
पात्रप्रवेशः २१७
पात्रप्राशस्त्यवर्णनम् २१७-८
रासकोचितं गीतम् २१८
गीतार्थाभिनयः ,,
नर्तने प्रवेशनिर्गमादिविशेषाः ,,
अथ चर्चरीनर्तनलक्षम् ,,

अथ नाटयरासकलक्षणम् २१९
अथ दण्डरासकलक्षणम् ,,
तत्र नर्तकिसंख्या ,,
दण्डस्य लक्षणम् ,,
दण्डस्य स्थाने चामर-
च्छुरिकादिधारणम् ,,
तत्र वाद्यचार्यादिविशेषाः ,,
दण्डमेलनम् ,,
तत्र सकलवाद्यप्रबन्धानां
युक्तता २२०
अथ शिवप्रियं नाम नर्तनम् ,,
तत्र वाद्यविशेषः ,,
नेपथ्यविशेषः ,,
पात्राणां शिवभक्तत्वम् २२०
नराणां नारीणां वा पात्रता ,,
तत्र गानस्य शिवपरत्वम् ,,
तन्नर्तनप्रकारः ,,
तस्य शिवोत्सवेषु कर्तव्यता ,,
अथ चिन्तुनृत्तलक्षणम् २२१
तत्र तालवाद्यप्रबन्धादि
विशेषाः ,,
तत्रोचितचिन्तुगानस्य
द्राविडत्वम् ,,
तत्र कित्तुनाम प्रयोगविशेषः ,,
तन्नर्तनप्रकारः ,,
तन्नर्तनस्य द्रविडदेशीयत्वम् ,,
अथ कन्दुकनर्तनलक्षणम् ,,
तत्र गतिविशेषाः ,,
वाद्यप्रबन्धविशेषाः ,,
पात्रलक्षणम् २२१-२
कन्दुकवर्णनम् २२२
नर्तनप्रकारः ,,
अथ भाण्डिकनृत्तलक्षणम् २२३
तत्र विविधरूपरुताद्यनुकारः ,,
तस्य हास्यप्रायता
विनोदफलता च ,,
तत्र भण्डानां पात्रता ,,
अथ घटिसणी(?)नृत्तलक्षणम् ,,
तत्र वाद्यानि ,,
चण्डाल्या नर्तकीत्वम् ,,
चर्यादिप्रबन्धानां गानम् ,,
गानानां किरातरूपशिव-
स्तुतिरूपता ,,

वाद्यवादनविशेषाः २२४
गत्यादिविशेषः ,,
तस्य पुरुषेणापि प्रयोज्यता ,,
अथ चारणनृत्तलक्षणम् ,,
तत्र दोहकानां गानम् ,,
वाद्यगत्यादिविशेषाः ,,
तस्य सौराष्ट्रदेशोद्भवत्वम् २२५
तन्नर्तनप्रकारः ,,
अथ बहुरूपनृत्तलक्षणम् ,,
तन्नर्तकस्य लक्षणम् २२६
तत्र ग्राम्यताया निषेधः २२७
अथ कोल्लाटनर्तनलक्षणम् ,,
तत्र वाद्यवादनविशेषः ,,
वरत्रावंशोपरि तस्य प्रयोगः ,,
तस्य दुष्करत्वम् ,,
तन्नर्तनप्रकारः ,,
अथ नर्तकीलक्षणम् २२८
कल्याणकटके सोमेश्वरेण
चित्रगोण्डलीविधिनिर्माणम् २२९
तस्या एव कुण्डलीति नामान्तरं,
तत्र कथान्तरं च ,,
अथ नर्तकलक्षणम् २२९-२३०
मुखरिलक्षम् २३१-२
प्रतिमुखरी २३२
वाद्यबृन्दम् ,,
मुख्यगायकलक्षणम् २३३
गायिनां बृन्दम् २३४
तस्य नारीमयत्वं वा ,,
संप्रदायस्य वर्णनम् ,,
बृन्दान्तःपातिनां संख्या २३४
बृन्दस्य पञ्चविधत्वम् ,,
तत्र उत्तमोत्तमम् ,,
उत्तमम् ,,
मध्यमम् ,,
अवरम् ,,
कनिष्टम् ,,
कोलाहलरूपस्य सामान्यतो
नेष्टत्वम् २३५
तस्य उत्सवादिषु उपयोगः ,,
उत्तमोत्तमे गातृवादकानां
संख्या वर्णनं च ,,
उत्तमे संख्या वर्णनं च २३५-६
मध्यमे ,, ,, ,, २३६
अवरे ,, ,, ,, ,,
कनिष्ठे ,, ,, ,, ,,
अथ रङ्गमण्डपलक्षणम् २३७
ज्येष्ठमध्यकनिष्ठरूपेण तस्य
त्रिविधत्वम् ,,
ज्येष्ठकनिष्ठयोरश्लाघ्यता ,,
मध्यस्य प्रशस्यता ,,
विकृष्टचतुरश्रयोः मण्डपयोः
हस्तमानम् २३७-८
नाट्यमण्डपस्य वर्णणम् २३८-९
सभापतिलक्षणम् २४०
सभ्यगुणाः २४०-१

अष्टमोऽध्यायः

प्रेक्षाकालः २४२
सभापतिसमागमवर्णनम् ,,

तन्नीराजनार्थं सदीपं नृत्यन्तीनां
वर्णनम् २४३
सभापतेः सपरिवारं निवेशः ,,
चामरधारिण्यः २४४
विलासिन्यः ,,
ताम्बूलदायिनी २४४-५
मन्त्रिपुरोधोयुवराज-
सेनापत्यादीनामासनम् २४५
नर्तकीवर्णनम् २४६
तस्या नेपथ्यम् २४६-७
नेपथ्यस्य स्थानकरणादि-सौष्ठव-
निरीक्षणार्थं सूक्ष्मता २४८
वृन्दविन्यासः २४९-२५०
आतोद्यमेलनम् २५०
शुष्कवाद्यवादने प्रबन्धाः
तत्क्रमश्च २५१-२
परुषवाद्यानामनिष्टता २५२
नर्तकीप्रवेशः २५३
यवनिकाचतुष्टयस्य
तद्धारिणीनां च वर्णनम् ,,
क्रमेण प्रत्येकं तेषामपसरणम् ,,
तत्र प्रत्यपसरणे वाद्यादि ,,
नर्तक्या वृन्दस्य कवि-
प्रभृतीनां च सम्माननम् २५४
ग्रन्थसमाप्तिः ,,

जायसेनापतिविरचिता

नृत्तरत्नावली

[प्रथमोऽध्यायः]

[आशिषः]

मौलिं स्वेदजलार्द्रकुन्तलभुरः पूर्वाधिकोष्णस्तनं
श्रोणीमुच्छ्वसदंशुकां पुलकिते पार्श्वे प्रकम्पौ करौ ।
सस्तम्भं चरणद्वयं च मुदितो गौर्याश्शिवः कौतुका-
त्तत्तन्नृत्तकलोचिताङ्गकथनव्याजैः स्पृशन् पातु वः ॥ १ ॥

वामे भावा[1]भिनयसुषमालङ्कृतां लास्यभङ्गी-
मर्धेऽन्यस्मिन्नुदितडमरुं बिभ्रतस्ताण्डवं च ।
स्वस्व[2]क्षेत्रव्यवहृतकरालोकदत्तावधानाः[3]
शम्भोः कान्ताकलितवपुषो दृष्टयः पान्तु युष्मान् ॥ २ ॥

देव्या लीलाललितमधुरं लास्यमुल्लासयन्त्या
यः शृङ्गारो रहसि[4] पुरतः पत्युरा[5]विष्कृतस्तम्[6] ।
वीर्या[7]न्नृत्तैर्विकटगतिभिर्व्यञ्जयन् कुञ्जरास्यः
शम्भो(:).....[8] ॥ ३ ॥

1. B. gap. 2. A. B. सुमु 3. B. नः 4. A. हरसि 5. B. पुरा
6. A. सत् B. सन् 7. A B. यवीया

8. A.B. gap. The Tāṇḍavic imitation of Pārvatī's Lāsya by Gaṇeśa is described here in this verse of obeisance on

[1].....[2]भामनोऽपि

सदाशिवाद्या[3]कृतिभेदयोगे ।

यत्कौतुकं कारणमाहुरार्षा

नृत्तं न तत् कस्य[4] भवेत्सुखाय ॥ ४ ॥

[5].....स्वप्रेयसीभिस्समं

गोपालोऽपि[6] पितामहोऽपि च गिरां देव्या[7] यदभ्यस्यति[8] ।

तस्यैतस्य समस्तलोकनयनानन्दामृतस्यन्दिनो

नृत्तस्याद्भुतसम्पदो मधुरिम.....[9] ॥ ५ ॥

Ganeśa ; in the gap in the last line are lost words which might have meant something like this : "May he (Gaṇeśa) producing Śambhu's laughter (by this imitation) protect us." From here the verse endings and numberings have been wrongly indicated in the Mss.

1. A.B. gap. In this Upajāti verse, of which the first line is almost lost, the greatness and universal appeal of dance is described ; in the first line, Śiva is probably referred to in his formless aspect ; in lines two and three his taking different forms like Sadāśiva is mentioned as being due to His constant delight in His own cosmic dance.

2. A. भराम। मनोऽपि here may be त्मनोऽपि। 3. A.B. सदाशिला 4. A.B. न कैर्य

5. This Śārdūlavikrīḍita is again on the indescribable sweetness and joy of dance which, the verse says, Śiva, Kṛṣṇa and Brahmā practise with their respective beloveds ; the portion referring to Śiva and Pārvatī at the opening of line 1 is partly lost and partly corrupt. A reads here.....त्रवलीवगुवति and B.....कुहलीव गुहति।

6. A.B. गोपीबालो 7. A.B. देवा 8. A. यनदद्यति B. यदर्हस्यदि ।

9. Corrupt. A. छन्दानवन्धा गिरा B. छन्दानवन्दा गिरः। May be मधुरिमस्पन्दो न वर्ण्यो गिरा meaning, "Of that dance, the sweetness cannot be described in words."

कल्हारैरनवाप्तचन्द्रकिराणाश्लेषैरलब्धाम्बुदैः

[1].....अलिकुलैरप्राप्तपुष्पासवैः ।

साम्यालापदशाममूनि[2] दधते नेत्राणि, येषां पुरः

शश्वन्ना[3]वतरन्त्युदारसुषमा नृत्तप्रयोगक्रमाः ॥ ६ ॥

उद्यद्यौवन[4]सौरभां[5] मृदुतनुं प्रस्निग्धगीतस्वनां

नानाभावरसाढ्यलास्यनिपुणां बिम्बाधरां[6] नर्तकीम् ।

लब्ध्वा[7] राजपुरन्दरस्य सततं निर्विष्टसर्वेन्द्रियां[8]

[9].....इवास्वादो विनोदान्तरैः ॥ ७ ॥

नित्यं[10] नाट्यकलाविलासकुतुकप्राग्भार[11]विश्राणन-[12]

प्रौढाहङ्कृति.....[13]मुदो धन्या धरित्रीश्वराः ।

शृङ्गारे विरतिं न यान्ति[14] लघुतां धैर्ये[15] विनोदे क्रमं

माने म्लानिमनादरं वितरणे कीर्तावनास्थामपि ॥ ८ ॥

---

1. A.B. corrupt. अच्छाकैस्सिक्तर् । Cātaka birds, peacocks or kadamba blossoms are probably meant here.

2. A. शामनि B. शामूनि 3. B. न्ता

Verse 6 sets forth the loss to the eyes that do not feast themselves on beautiful displays of dance.

4. B. द्यन 5. B. थां 6. A.B. रा 7. A.B. ब्यवा 8. A.B. या 9. Corrupt; wanting in two syllables; A. ग्राम्यानन्दमनोदक B. ग्राह्यानन्द-महोदक। The drift of verse 7 is that when the king can have the enjoyment of the dance-art of accomplished women, indulgence in other pastimes is very much inferior.

10. A. नृत्ते B. नृत्तो 11. A.B. प्रभाव 12. A. द्रावन 13. A. नातरंभित B. नातरहित 14. A. ति 15. A. र्यो

संसारे भवति प्रधानममितै[1]र्लभ्यं शुभैर्मानुषै-

र्जन्मास्मिन् क्षितिपालता निरवधिः[2] श्रीरत्र कान्तं वपुः ।

एतस्मिन् मुखमिन्दुसुन्दुरमिह स्निग्धा विशालत्रयता

दृष्टिस्तां सफलीकरोति रमणीलास्यावलोकोत्सवः ॥ ९ ॥

क्षितौ रत्न[3]च्छायाफलनमुदके वीचिललितं

शिखिन्यर्चिःप्रेङ्खा सहजगतिवैचित्र्यमनिले ।

तटित्क्रीडा व्योम्नीत्यकट(?)[4]सुभगः पञ्चसु परः

प्रविष्टो भूतेषु प्रभवति हि नृत्तस्य महिमा ॥ १० ॥

धर्म[5] देवा धरणिपतयो दद्युरर्थं[6] प्रसन्ना-

स्तन्वी[7]वर्गः स्पृहयति कलाप्रौढिभङ्गी[8]विधेयः ।

विद्वद्गोष्ठयो बहुविधगुणप्रक्रियावर्णनाभिः

कीर्तिं नर्म्मे दधति विविधां[9], येन नृत्तं प्रयुक्तम् ॥ ११

[ग्रन्थकृत्प्रशस्तिः]

अभ्यासाद्भरतोक्तिभङ्गिषु बहुव्याख्यावटेषु[10] श्रमात्

संवा[11]दाद् गुरुसंप्रदायसुहृदां शम्भोः प्रसादादपि ।

ज्ञात्वा शास्त्ररहांसि निर्मितमिदं व्यक्तं महार्थान्वितं

न स्यात् कस्य हिताय शाश्वतयशस्संरक्षणं लक्षणम् ॥ १२ ॥

---

1. A. ममिते B. मितिते 2. B. वशी 3. A. B. रक्तं 4. Is it 'अकृत' meaning 'natural', akṛtaka? 5. A.B धर्मे 6. A.B. द्युर्दर्थ 7. A.B. तन्वीं 8. A. B. भङ्गीः 9. A. विधिवत् 10. A.B. ढेषु 11. B. सुत्वा

प्रेक्ष्य प्रज्ञामतिशयवतीं स्वामिभक्तिं[1] च हर्षाद्[2]

आकौमाराद् गणपतिनृपो जायनं यं समर्च्य ।

गुण्डामात्ये सकलसुमनस्सेव्यमाने[3] जयन्तं

वाचां पत्यौ हरिरिव कलाश्लाघनीयं[4] व्यनैषीत् ॥ १३ ॥

जित्वा शौर्येण पृथ्वीं जल[5]निधिरशनां सु[6]स्थिरीकृत्य लोकं

सङ्गीतस्योपभोगे[7] सकुतुकमनसः स्वामिनः शासनेन ।

तस्याभीष्टस्य भास्वन्मणिमुकुरनिभं नृत्तलीलायितस्य

[8]प्राज्ञोऽसौ शास्त्रमेतद्रचयति चतुरं नृत्तरत्नावलीति ॥ १४

[ग्रन्थप्रशस्तिः]

कवीनां[9].....नृत्तकलाविदाम् ।

नृत्तरत्नावली राज्ञां चित्तकैरवकौमुदी ॥ १५ ॥

आगत्य ब्रह्मलोकादिह भरतमुनिः[10] शास्त्रमेतन्मदीयं

दृष्ट्वा भूयः कृतादौ प्रसृमरपुलकव्यञ्जितान्तःप्रमोदः ।

आश्चर्यं[11] पश्यतेदं कथमधि[12]गतवानाशयं मे समग्रं

स श्रीमान् जायसेनापतिरिति नियतं[13] वक्ष्यतेऽग्रे[14] मुनीनाम् ॥ १६ ॥

---

1. A.B. क्तं 2. B. द्वा 3. A.B. नो 4. A.B. यां 5. B. प्रत्यंले 6. A.B. स्व 7. A.B. गं 8. A.B. प्र 9. Corrupt. A. सदसं कसकु B. सरसं कसकु 10. B. 3 letters missing. 11. B. ऐश्वर्य 12. A. मति B. मिति 13. A. जायते ने किं नियतं B. जायसेकी नियतं 14. A.B. ताग्रे

मम वाङ्नर्तकी[1] नूनं वर्णकाङ्गै[2]र्मनोहरैः ।

करोति[3] शास्त्ररङ्गेऽस्मिन् लक्ष्म[4]नृत्तमतिस्फुटम् ॥ १७ ॥

[नृत्तकालः]

त्यागोद्वाहमहाभिषेकनगरीवेश्मप्रवेशोदक-

क्रीडासु प्रियसङ्गमव्रतमहादानात्मजोत्पत्तिषु ।

यात्रापर्वपरीक्षणोत्सवजयानन्दप्रतिष्ठेहित-

प्राप्तिष्वभ्युदयाय नृत्तमुचितं स्याद्देवपूजा[5]दिषु ॥ १८ ॥

[नाट्यावतारः]

पूर्वरङ्ग[6]प्रयोज्यत्वान्नृत्तं नाट्योपकारकम् ।

ततो नाट्यस्य वक्ष्यामि संक्षेपादिह लक्षणम् ॥ १९ ॥

वैवस्वतेऽन्तरे ह्यस्मिन् पुरा त्रेतायुगे किल ।

लोकेऽस्मिन्नरिषड्वर्गनिघ्ने सुखितदुःखिते ॥ २० ॥

पुरन्दरमुखा देवाः पप्रच्छुः कमलासनम् ।

दृश्यं[7] श्रव्यं[8] च सर्वेषामिच्छामः[9] क्रीडनीयकम् ॥ २१ ॥

इति विज्ञापितो देवैर्भावयन् [10]सार्ववर्णिकम् ।

वेदेभ्यः[11] सारमादाय नाट्यवेदं ससर्ज सः ॥ २२ ॥

1. B. वा वर्तते 2. A.B. गांगै 3. A.B. मि 4. A.B. वक्ष्ये 5. A.B. र्वा
6. A. पूर्वाङ्ग B. पूर्व रङ्ग 7. A.B. य 8. A.B. सर्व 9. A.B. मि
10. B. स 11. A.B. देवेभ्यः

पश्यन्नथ मनुष्याणां चातुरीमाङ्गिकादिषु ।

शिक्षयामास च मुनिं भरतं मानसात्मजम् ॥ २३ ॥

[1]तेन चाध्यापिताः पुत्राः शाण्डिल्यप्रमुखाः शतम् ।

तैः सार्धमप्सरोभिश्च कट(?)[2] ध्वजमहादिषु ।

नाट्यवेद[3]प्रयोगोऽयं मुनिना संप्रवर्तितः ॥ २४ ॥

[नाट्यलक्षणम्]

लोकस्य च स्वभावो यः[4] सुखदुःखविमिश्रितः[5]

[6]नाट्यं तस्यानुकरणं चतुर्धा[7]भिनयान्वितम् ॥ २५ ॥

स्पन्दनार्थतया[8] धातोर्नटेः[9] सात्त्विकपूरितम्[10] ।

रसाश्रयं च तद् ज्ञेयं वाक्यार्थाभिनयात्म[11]कम् ॥ २६ ॥

अभिपूर्वाण्णिजो[12] धातोरचि कर्तरि योजिते ।

प्रयोगमाभिमुख्यं यत्[13] नयत्यभिनयस्ततः ॥ २७ ॥

शाखयाङ्गैरुपाङ्गैश्च प्रयोगेण विभावयन् ।

अर्थान् बहुविधान् प्रापयन्ने[14]वाभिनयो मतः ॥ २८ ॥

1. A. तेनातो 2. A. कटि Is it कृते? 3. A.B. देव 4. A.B. यं 5. A.B. तम्

6. From here a number of lines are reproduced in the dance chapter of Tulaja's Saṅgītasārāmṛta ; see text presented by me in my Introduction to the Music Academy edition of the Sārāmṛta, pp. xxv-xxvii.

7. A. डिंभिता B. डिंबित 8. A.B. नासतया 9. A.B. न च 10. A.B. भूरितत्
11. A.B. र्थ 12. A.B. न्तियो 13. Sārāmṛta-citation reads च
14. A. प्रावन्ये B. प्रावत्ये

आङ्गिको वाचिकाहार्यौ[1] सात्त्विकश्चेत्यसौ पुनः ।
चतुर्धा कलितो[2] यत्र सर्वं नाट्यं[3] प्रतिष्ठितम् ॥ २९ ॥

तत्राङ्गिको भवेदङ्गैर्निर्वृत्तस्स[4] पुनस्त्रिधा[5] ।
शारीरो मुखसंजातश्चेष्टया च विनिर्मितः ॥ ३० ॥

शाखयाङ्गैरुपाङ्गैश्च प्रत्यङ्गैश्च प्रदर्शितः ।
शारीरः तत्र, मुखजः केवलोपाङ्गनिर्मितः ॥ ३१ ॥

चेष्टाकृतस्तु चेष्टाभिः स्थानासनगतादिभिः।
शाखाङ्कुरश्च नृत्तं च प्रधानं तेष्वनुक्रमात् ॥ ३२ ॥

शाखा स्यान्नृत्तहस्तानां वैचित्र्यात्मविवर्तना ।
अङ्कुरः सूचनारूपो भूतवाक्यैकगोचरः ॥ ३३ ॥

भविष्यद्वाक्यविषयः स तु सूचेति कथ्यते ।
नृत्तं नात्रोच्यते पश्चात् प्रपञ्चेनाभिधास्यते ॥ ३४ ॥

वागात्मा वाचिको द्वेधा संस्कृतप्राकृताश्रयः ।
[7]नामाख्याता[8]दिभिर्भेदैरयं विस्तरमश्नुते ॥ ३५ ॥

1 A. भाक्यो B. भाव्यो । Sārāmṛta वाचिकाहार्यौ । 2. Sārāmṛta कथितः 3. This is better than the Sārāmṛta reading नाटये 4. B. नृवृत्तस्व 5. A. स्त्रिया 6. The Mss. read here a superfluous line शाखयाङ्गैरुपाङ्गैश्च रचितः परिकल्पितः । This line is absent from the Sārāmṛta-citation. 7. This is superior to the reading in the Sārāmṛta-citation तत्तन्नामादिभिः 8. A. B. ता missing.

नैपथ्यस्य विधानं स्यादाहार्यः स[1] चतुर्विधः ।

पुस्त[2]भूषाङ्गरचना सजीवः[3] परिकल्पितः ॥ ३६ ॥

तत्र शैलविमानादि नाट्ये यद्यत्प्रदृश्यते ।

तत्तत्पुस्त[4] इति ज्ञेयः स च त्रेधा विधीयते ॥ ३७ ॥

आदिमस्सन्धिमस्तत्र मध्यमो व्याजिमः स्मृतः ।

अन्तिमश्चेष्टिमस्तेषां क्रमाल्लक्षणमुच्यते ॥ ३८ ॥

किळिञ्जचर्मवस्त्राद्यसन्धानाः[5] तत्र सन्धिमः ।

सूत्राकर्षादिभिर्य्याजैर्निर्वृत्तं[6] व्याजिमं विदुः ॥ ३९ ॥

जतुसिक्था[7]दिसम्बन्धात् चेष्ट्यते यस्स चेष्टिमः[8] ।

येनालङ्क्रियते देहः सोऽलङ्कारः प्रकीर्तितः ॥ ४० ॥

स चाभरणमाल्यात्मा चतुर्धाभरणं बुधैः ।

[9]आवेध्यबन्धनीयारोप्यप्रक्षेप्यारोप्यभेदतः ॥ ४१ ॥

कर्णभूषणमावेध्यं[10] कुण्डलाभरणादिकम्[11] ।

बन्धनीयं तु विज्ञेयं श्रोणीसूत्राङ्गदादिकम् ॥ ४२ ॥

1. A. आभार्यस्व B. आहार्यस्य 2. A. व्यस्त 3. B. सचीवः। This is given variously as सजीवः, सज्जीवः and सञ्जीव in Nāṭya works. 4. B. व्यस्त 5. A.B. नां 6. A.B. निर्वृत्ताः 7. A. सिर्ध्या B. सिक्थ्या. Siktha—Beeswax. 8. A.B. चेष्टितः 9. A. आलेप्ययं धनी B. मूलेप्ययं 10. A.B. वेच्यं 11. A.B. कुण्डलादिभराकृतम् (तः) The reading given above is as found in the Sārāmṛta-citation.

[1]नूपुरप्रमुखं क्षेप्यं [2]हाराद्यारोप्य[3]मिष्यते ।

सा भवेदङ्गरचना यद्रङ्गे[4] रङ्गवर्तनम् ॥ ४३ ॥

ते च वर्णाः सितश्यामरक्तपीताः[5] स्वभावजाः ।

एतेषां सङ्कराद् भेदा जायन्ते बहवः पुनः ॥ ४४ ॥

सजीवः प्राणिनां रङ्गे प्रवेशः परिकीर्तितः ।

द्विचतुश्चरणो पादरहितश्चेति स त्रिधा ॥ ४५ ॥

द्विपादास्तत्र विज्ञेयाः देवमानुषपक्षिणः ।

चतुष्पादास्तु पशवः पादहीना भुजङ्गमाः ॥ ४६ ॥

इत्याहार्यलक्षणम् ।

[सात्त्विकलक्षणम्]

परस्य सुखदुःखादिभावैर्यद्भावनं भवेत् ।

[6]तत्रान्तःकरणासक्तिरत्यन्ता[7] सत्त्वमिष्यते ॥ ४७ ॥

सात्त्विकस्सत्त्वनिष्पाद्यै[8]र्भावैर्जातस्स चाष्टधा ।

स्तम्भस्वेदरोमाञ्चाः[9] स्वरभेदस्सवेपथुः ॥ ४८ ॥

विवर्णताश्रुप्रलया इत्येते सात्त्विकाः स्मृताः ।

एषामभिनयानां न प्रपञ्चोऽत्र प्रदर्शितः[10] ॥ ४९ ॥

1. A.B. रुचुर 2. A.B. भा 3 B. प 4. A.B. यदङ्ग 5. A.B. बीज (जा)
6. A. तवतः B. तत्र तत् 7. A. त्यना 8. A. पादै B. पन्दै 9. A.B. त्र
10. A. तम् B. प्रकाशितः

[नृत्यनृत्तनाट्यानां मार्गदेश्योश्च लक्षणम्]

इदानीं [1]प्रकृतं नृत्यं यथालक्षणमुच्यते ।
भवेद्भावाश्रयं नृत्यं[2] पदार्थाभिनयात्मकम् ॥ ५० ॥

गात्रविक्षेपणार्थत्वान्नृत्ते बहुलमाङ्गिकम् ।
विविधेन विलासेन क्षेपो विक्षेप इष्यते ॥ ५१ ॥

नाट्यवेदप्रवृत्तत्वान् मार्गितत्वा[3]न्महर्षिभिः ।
सद्भिस्सञ्चारितत्वाच्च मार्गमाहुरिदं बुधाः ।
नृत्यं[4] श्रृंगादितादि स्यात्[5] नाट्यं[6] तन्नाटकादिकम् ॥ ५२ ॥

गीतवाद्यादिमिलितं लयमात्र[7]समाश्रयम् ।
अङ्गविक्षेपणं नृत्तं भवेदभिनयोज्झितम् ॥ ५३ ॥

नाट्ये[8] ह्यभिनये[9] छिद्र[10]प्रच्छादनफलं हि तत् ।
एतद्दृशा तु विख्यातं नरदृग्जनचक्षया ॥ ५४ ॥

[11] अस्याचार्या गृहानीशः यतस्सन्ध्यासु नृत्यतः ।
मयापीदं स्मृतं नृत्तमित्युक्तं चन्द्रमौलिना ॥ ५५ ॥[12]

[लास्यताण्डवलक्षणम्]

लास्यताण्डवभेदेन द्वयमेतद्विधा पुनः ।
सुकुमारं नयोराद्यं भवेदपरमुद्धतम् ॥ ५६ ॥

1. B. प्राकृतन्नित्यं पथालम्भण 2. B. नित्यं 3. A. B. Gap 4. A.B. नित्यं 5. A.B. स्थौ 6. B. नान्य 7. A.B. त्रा 8. B ट्यो 9. A. यः B. य 10. A.B. द्रात् 11. A.B. Corrupt. अस्याश्चर्यमृतार्दानि 12. From यतस्सन्ध्यासु the one and half lines refer to and form a partial quotation from Bharata's Nāṭya Śastra, IV. 12-13, Kasi edn. The verse means that Śiva is the promulgator of Nṛtta.

भावः स्त्रीपुंसयोर्लास[1]स्तदर्थः[2] तत्र साधु वा ।

लास्यं मनसिजोल्लासहेतु मृद्वङ्गहारवत्[3] ॥ ५७

देव्यै देवोपदिष्टत्वात् प्रायः स्त्रीभिः प्रयुज्यते ।

[4]गेयपदं स्थितपाठ्यमासीनं पुष्पगन्धिका ॥ ५८ ॥

[5]प्रच्छेदकस्त्रिमूढाख्यं[6] सैन्धवाख्यं[7] द्विमूढकम् ।

उत्तमोत्तमकाभिख्यमुक्तप्रत्युक्तकाभिधम् ।

लास्याङ्गानि दशैवात्र तेषां लक्ष्माभिधीयते ॥ ५९ ॥

यत्रासनसुखासीनास्तन्त्र्या[8]द्यातोद्यसंयुतम् ।

गायन्ति गायना[9]श्शुष्कं तद्गेयपदमिष्यते ॥ ६० ॥

आसनस्था वदेद्यत्र प्राकृतं विरहे वधूः ।

मन्मथानलतप्ताङ्गी स्थितपाठ्यं[10] तदुच्यते ॥ ६१ ॥

चिन्ताशोकान्वितं सर्वैः वाद्यैरभिनयैरपि ।

हीनं यत्रास्यते तस्मात् ख्यातमासीनसंज्ञया[11] ॥ ६२ ॥

नृत्तं गीतं च वाद्यं च यत्र नानाविधं भवेत् ।

पुंवच्च विविधाश्चेष्टा नार्यास्सा पुष्पगन्धिका ॥ ६३ ॥

1. A.B. योल्लास 2. A. तदर्भः B. तदन्तं 3. A.B. भारवत् 4. A.B. त extra at the beginning. 5. A.B. पु 6. A.B. स्त्रीमूताख्यं । 7. A.B. ह्यं 8. A.B. न्द्रा 9. B. काः 10. B. प्यं 11. AB. नसन्धया

प्रच्छेदको भवेद्यत्र ज्योत्स्नासन्तापविह्वलः ।

कामिन्यो यान्ति निर्व्रीलास्सापाराधानपि प्रियान्[1] ॥ ६४ ॥

नाट्यं पुंभावभूयिष्ठं समवृत्तविभूषितम् ।

अनिष्ठुरश्लक्ष्णपदं यत्र स्यात्तत्[2] त्रिमूढकम् ॥ ६५ ॥

पात्रं वञ्चितसङ्केतं नाट्यं पाठ्येन चोज्झितम् ।

भाषा च सैन्धवी यत्र तज्ज्ञास्तत्सैन्धवं विदुः ॥ ६६ ॥

मुखप्रतिमुखोपेतं चतुरश्रपदक्रमम् ।

[3]श्लिष्टभावरसं यत्तद्वैचित्र्यार्थं द्विमूढकम् ॥ ६७ ॥

विचित्रश्लोकबन्धं यन्नानारससमाश्रयम् ।

उत्तमोत्तमकं तत्स्यात् लीलाभाव[4]मनोहरम् ॥ ६८ ॥

साधिक्षेपैः पदैर्युक्तं चित्रगीतार्थयोजितम् ।

कोपप्रसादसंजातमुक्तप्रत्युक्तकं विदुः ॥ ६९ ॥

यत्र प्रियाकृतिं दृष्ट्वा विनोदयति मानसम् ।

मदनानलतप्ताङ्गी तच्चित्रपदमुच्यते ॥ ७० ॥

दृष्ट्वा स्वप्ने प्रियं यत्र मदनानलतापिता ।

करोति विविधान् भावांस्तद्वै भाविकमुच्यते ॥ ७१ ॥

---

1. A.B. त् 2. AB. तत् absent. 3. A.B. श्लिष्टा 4. A.B. लोलाभावं।
It may be लीला or हेला both of which are found in texts.

केचिदेतद्वयं प्राहुः तन्न[1] मन्यामहे वयम् ।

अङ्गानि दश चैवेति मुनिना यत्प्रकीर्तितम् ॥ ७२ ॥

इति लास्याङ्गानि ।

उद्धतं तु महेशस्य शासनात्तण्डुनोदितम् ।

[2]भरताय ततः ख्यातं लोके ताण्डवसंज्ञया ॥ ७३ ॥

प्रायो निर्वर्त्यते पुंभिरङ्गहारैस्तदुद्धतैः ।

प्रयोगस्तूच्यते[3] तज्ज्ञैस्तस्योत्साहादिगोचरः[4] ॥ ७४ ॥

इति श्रीमन्महाराजाधिराज-गणपतिदेव-गजसाधनिक-जायसेनापति-विरचितायां नृत्तरत्नावल्यां नर्तनविवेको नाम प्रथमोऽध्यायः ॥

[अथ द्वितीयोऽध्यायः]

सनाट्ययो[5]रथाङ्गानि वक्ष्यन्ते[6] नृत्यनृत्तयोः ।

शिरो हस्तावुरः[7] पार्श्वे कटीपादौ च षट् क्रमात् ॥ १ ॥

ग्रीवादोःकुक्षिपृष्ठोरुजङ्घाः प्रत्यङ्गकानि षट् ।

विलोचनभ्रूनासोष्ठकपोलचुबुकानि षट् ।

उपाङ्गान्यथ वै तेषां भेदान्वक्ष्ये सलक्षणान् ॥ २ ॥

1. B. ततः 2. A. करोति भरताया B. करोति भरताया ततख्यातं 3. A.B. स्मृच्यते
4. A. गोद्धरः 5. A. ना B. सा 6. B. लक्ष्यान्ते 7. A.B. वूरु

अथ शिरोलक्षणम्

आकम्पितं कम्पिताख्यं धुतं विधुतमञ्चितम् ।

परिवाहितमाधूतमवधूतं निहञ्चितम् ॥ ३ ॥

अधोमुखं परावृत्तमुत्क्षिप्तं लोलितं शिरः ।

त्रयोदशविधं वृत्तं[1] मुनिना समुदीरितम् ॥ ४ ॥

सकृदाकम्पनादूर्ध्वमधश्चाकम्पितं शनैः ।

प्रश्नोपदेशनिर्देशसंज्ञादावेतदिष्यते ॥ ५ ॥ (आकम्पितम्)

तदेव बहुशस्तूर्णं कम्पनात्कम्पितं विदुः[2] ।

वितर्करोषविज्ञानप्रतिज्ञार्जनादिषु ॥ ६ ॥ (कम्पितम्)

मन्दं सञ्चारितं[3] निर्यक् शिरो धुतमुदीरितम् ।

पार्श्वावलोकना[4]श्चर्यनिषेधानी[5]प्सितादिषु[6] ॥ ७ ॥ (धुतम्)

तदेव शीघ्रतां नीतं[7] शिरोविधुतमीप्सितम् ।

[8]पीतमात्रासवत्वस्त[9]शीतार्कज्वरितादिषु ॥ ८ ॥ (विधुतम्)

[10]ईषदानमितं पार्श्वे शिरो ज्ञातव्यमञ्चितम् ॥

[11]मत्तमूर्च्छितरोगार्तचिन्तापर्याकुलादिषु ॥ ९ ॥ (अञ्चितम्)

1. May be नृत्ते 2. A. repeats here part of the previous verse from शनैः । 3. B. सहारितं 4. A.B. पार्श्वप्रयोगता 5. A.B. द 6. A.B. नितु 7. A.B. गीतं 8. A.B. नीत 9. A. शि 10. A. ईषाधान-मिदं 11. A.B. वीत

पार्श्वात्पार्श्वं शिरो[1] नीतं पर्यायैः परिवाहितम् ।

विचारविस्मयामर्षहर्षलीलादिषु स्मृतम् ॥ १० ॥ (परिवाहितम्)

एकवारं समुत्क्षिप्तं तिर्यगाधूतमुच्यते ।

आत्मसम्भावनागर्वपार्श्वस्थोर्ध्वा[2]वलोकने[3] ॥ ११ ॥ (आधूतम्)

अधस्तात्सकृदाक्षिप्तमवधूतन्निगद्यते[4] ।

तदावाहनसन्देशसंज्ञालापादिषु स्मृतम् ॥ १२ ॥ (अवधूतम्)

ग्रीवाञ्चिता[5] समुत्क्षिप्तौ यत्रांसौ तन्निहञ्चितम् ।

तदेतत्भ्रुवां गर्व[6]विब्बोकललितादिषु ॥ १३ ॥ (निहञ्चितम्)

अधोगतमवाचीनम्स्थिताननमु[7]दाहृतम् ।

अभिवन्दनमन्दाक्ष[8]विषादप्रमुखेषु[9] तत् ॥ १४ ॥ (अधोगतम्)

यत्राननं पराचीनं तत्परावृत्तमिष्यते ।

पश्चाद्विलोकनानि[10]ष्टोद्विग्नास्यापनयादिषु ॥ १५ ॥ (परावृत्तम्)

उच्चैरुन्मुखमुत्क्षिप्तं भवेदञ्चितकन्धरम् ।

प्रांशुव्योमाम्रसूर्येन्दुतारादिलोकनेषु तत् ॥ १६ ॥ (उत्क्षिप्तम्)

1. A. गिरो B. रो 2. B. र्वोत्थोद्ध 3. A.B. लोकादिषु 4. A.B. ए(वि)षाद-प्रमुखेषु तत्। (अधोगतम्) In between the two quarters of this foot some part of 'Adhogata' definition has thus intruded. 5. B. ग्रीवान्वितं 6. A B. वीरा 7. B. From here a leaf is missing. 8. मद्राक्षि 9. A.B. From here part of Adhogata-definition has strayed above into the Avadhūta-definition. 10. B. दि

शिरो लोलितमाख्यातं सर्वतः परिलोलनात् ।

मदमूर्च्छागद[1]स्वप्नग्रहग्रस्तादिषु स्मृतम् ॥ १७ ॥ (लोलितम्)

एभ्योऽन्ये बहवो भेदा लोकाभिनयसंश्रयाः ।

ते च लोकस्वभावेन प्रयोक्तव्याः प्रयोक्तृभिः ॥ १८ ॥*

इत्युक्तं मुनिना यत्तदनुतन्त्रविधायिभिः ।

कल्पिताः कतिचिद्भेदा ब्रूमस्तानपरानपि ॥ १९ ॥

समं नैराजिनं तिर्यक्तं तिर्यङ्ननोन्नतम्[2] ।

पार्श्वाभिमुखमुन्नीतं सकम्पपरिवाहितम् ॥ २० ॥

सकम्पधुतनामान्यदुद्धुतं पार्श्वकम्पितम् ।

पार्श्वाकम्पितमित्येकादश भेदाः प्रकीर्तिताः ॥ २१ ॥

प्रकृतिस्थं समं प्रोक्तं यतो भेदा विनिस्मृताः[3] ।

तत्स्यात्[4] समनग्न[5]ध्यानस्वभावाभिनयादिषु ॥ २२ ॥ (समम्)

प्रदक्षिणक्रमेणैव यत्रारात्रिकवद्[6] भ्रमः ।

नैराजितं[7] नृपादिनां तत्स्यान्नीराजना[8]विधौ ॥ २३ ॥ (नैराजितम्)

तिर्यक्ततं यथार्थाख्यं चिन्तापीडादिषु स्मृतम् । (तिर्यक्ततम्)

तिर्यङ्ननोन्नतं तद्वत्सुभ्रुवां विभ्रमादिषु ॥ २४ ॥ (तिर्यङ्ननोन्नतम्)

पार्श्वाभिमुखमन्वर्थसंज्ञं पार्श्वप्रलोकिते । (पार्श्वाभिमुखम्)

उन्नीतं सकृदुन्नीते पृच्छादौ समुदीरितम् ॥ २५ ॥ (उन्नीतम्)

---

1. B. त * This verse is a quotation from Bharata's Nāṭya Śāstra, VIII, 36 (Kasi edn.) 2. B. Corrupt. 3. B. वितिस्मृता 4. B. तस्मात् 5. B. घ 6. B. यात्रामातिकवत् 7. B. दिनं 8. B त्मना

कम्पितेन समायोगं संप्राप्ते परिवाहिते ।

लास्ये तालल्लये प्रोक्तं सकम्पपरिवाहितम् ॥ २६ ॥ [सकम्पपरिवाहितम्][1]

सकम्पधुतमप्येवं..... [2]जनैः कृतम् । (सकम्पधुतम्)

धुतमेवोद्धुतं किञ्चिदुत्तानित[3]मुखं भवेत् ॥ २७ ॥

[4]कन्दुकोल्लालनान्दोल[5]सञ्चारादिप्रलोचने । (उद्धुतम्)

कम्पिताभ्यञ्चिताभ्यां स्यादर्ध[6] पार्श्वमुखं यदा ॥ २८ ॥

स्यात् पार्श्वकम्पितं पार्श्वाकम्पितं च क्रमात्तदा ।

प्रश्नतालल्योल्लासहास्यादौ तद्वयं मतम् ॥ २९ ॥ (पार्श्वकम्पितपार्श्वाकम्पिते)

इति शिरोलक्षणानि ।

॥ अथ दृष्टिलक्षणम् ॥

[7]कान्ता हास्याञ्चिता चैव रौद्री च करुणाञ्चिता[8] ।

तथा वीराद्भुते[9] स्यातां बीभत्सा सभयानका[10] ॥ ३० ॥

1. Name missing here. 2. प्येकवंचतुरैर्जनैः कृतम् । 3. उत्तानित 4. कर्दुको 5. ला 6. A. B. चार्ध

7. Both A and B have a gap here in the first line, and the remaining part of the verse too is corrupt; I have restored the line using the bits in the Mss. and adopting the order of the Rasa-enumeration in the succeeding verse setting forth the Sthāyi-dṛṣṭis; it will be observed that in this order and form of expression, Jāya bases himself on the mutual *utpādya-utpādaka-bhāva* of the eight Rasas which classifies them into four pairs.

8. All that is found in the two Mss. here is कान्ताभार्यांचिता

9. A. B. विराजभूते 10. A. B. सद्दायनिका

द्वितीयाध्याये दृष्टिलक्षणम्

रसोत्पत्ति[1]क्रमेणाष्टौ मयोक्ता रसदृष्टयः ।

स्निग्धा हृष्टा ततः क्रुद्धा दीना दृप्ता सविस्मिता ॥ ३१ ॥

जुगुप्सितभयांचिते[2] स्थायिष्वेवं दृगाष्टधा[3] ।

शून्या लज्जान्विता श्रान्ता विषण्णा मलि[4]नाभिधा ॥ ३२ ॥

शङ्किता मुकुला ग्लाना[5] कुञ्चिता ललिता तथा ।

अमितप्तार्धमुकुले विभ्रान्ता सवितर्किता ॥ ३३ ॥

[6]आकेकरा विकोशाख्या जिह्मा त्रस्ताथ विप्लुता ।

मदिरा चेति दृष्टीनां विंशतिर्व्यभिचारिषु ॥ ३४ ॥

हर्षोत्पन्ना[7] प्रसादोत्था कामं कामवशावशा ।

शृङ्गारेऽभिमता कान्ता[8] भ्रूक्षेपापाङ्ग[9]सङ्गता ॥ ३५ ॥ (कान्ता)

[10]चित्रभ्रान्ताल्पतारा दृगाकुञ्चितपुटा क्रमात् ।

[11]कक्षादिस्पर्शपातादौ हास्ये हास्या हि[12]..... ॥ ३६ ॥

1. A. B. सोपयोक्ता। The idea of रसोत्पत्ति is clearly intended and the restoration is obvious. 2. A.B. The syllables चिते do not give the cadence of the odd Anuṣṭubh foot ; but in Śāstraic treatises, such a freedom does appear occasionally 3. B. स्थायिष्टेवन्दगष्टधा 4. B. gap. 5. B. म्राना 6. A. आकेनाविकेरा B. आकेरापविफेशाख्या 7. B. जप्रा 8. A.B. नाक्रान्ता 9. A.B. चांग 10. A. अचित्र 11. A.B. रक्षादिस्पर्शजातादौ सास्ये

12. A.B. After this definition of the Hāsyā-dṛṣṭi, there is a long gap in both Mss. in which are lost ; (1) The definitions of the rest of the Rasa-dṛṣṭis, (2) The definitions of the Sthāyi-dṛṣṭis, (3) The Sañcāri-dṛṣṭis, (4) the application of the Rasa-Sthāyi-Sañcāri dṛṣṭis, (5) The actions of the pupils and various ways of Seeing (Tārā, Darśana-vidhi), (6) The actions of the Eye-lids (Puṭa) and (7) Brows (Bhrū) and their definitions and applications, (8) The actions of Nāsā, and (9) The first line of the enumeration of the actions of lip (Adhara).

.[अत्र महान् ग्रन्थपातः]..

*For having an idea of the subject-matter lost in the long gap indicated above, the corresponding portion of Bharata's own text is reproduced here.

N.Ś. VIII Śl. 45 ff. K. M. & Kasi edns.; Śl. 48ff. GOS. edn. I have extracted the N. Ś. verses in an order suitable to Jāya's enumeration.

भारतीयनाट्यशास्त्राद् अवशिष्टा रसदृष्टयः

क्रूरा रूक्षारुणोद्वृत्ता निष्टब्धपुटतारका ।
भ्रुकुटीकुटिला दृष्टिः रौद्री रौद्ररसे स्मृता ॥

पतितोर्ध्वपुटा साम्रा मन्युमन्थरतारका ।
नाशाग्रानुगता दृष्टिः करुणा करुणे रसे ॥

दीप्ता विकसिता क्षुब्धा गम्भीरा समतारका ।
उत्फुल्लमध्या दृष्टिस्तु वीरा वीररसाश्रया ॥

या त्वाकुञ्चितपक्ष्माग्रा साश्चर्योद्वृत्ततारका ।
सौम्या विकसितान्ता च साद्भुता दृष्टिरद्भुते ॥

निकुञ्चितपुटापाङ्गा घूर्णापप्लुततारका ।
संश्लिष्टस्थिरपक्ष्मा च बीभत्सा दृष्टिरिष्यते ॥

प्रोद्वृत्तनिष्टब्धपुटा स्फुरदुद्वृत्ततारका ।
दृष्टिर्भयानकात्यर्थं भीता ज्ञेया भयानके ॥

53 ff. K. M. & Kasi edns. 57ff. GOS. edn.

स्थायिदृष्टयः ।

व्याकोशमध्या मधुरा स्मिततारामिलाषिणी ।
सानन्दभ्रूलता दृष्टिः स्निग्धेयं रतिभावजा ॥

चला हसितगर्भा च विशत्तारानिमेषिणी ॥
किञ्चिदाकुञ्चिता हृष्टा दृष्टिर्हासे प्रकीर्तिता ॥

रूक्षा स्थिरोद्वृत्तपुटा निष्टब्धोद्वृत्ततारका ।
कुटिलभ्रुकुटी दृष्टिः क्रुद्धा क्रोधे विधीयते ॥

अवस्तब्धोत्तरपुटा रुद्धतारा जलाविला ।
मन्दसञ्चारिणी दीना सा शोके दृष्टिरुच्यते ॥

संस्थिते तारके यस्याः स्थिरा विकसिता तथा ।
सत्त्वमुद्विरती दृप्ता दृष्टिरुत्साहसम्भवा ॥

विमलोद्वृत्ततारात्र हृष्टोभयपुटान्विता ।
समा विकसिता दृष्टिः विस्मिता विस्मये स्मृता ॥

सङ्कोचितपुटा ध्यामा दृष्टिर्मलिनतारका ।
पक्ष्मोद्देशात्समुद्विग्ना जगुप्सायां जगुप्सिता ॥

विष्फारितोभयपुटा भयकम्पिततारका ।
निष्क्रान्तमध्या दृष्टिस्तु भयभावे भयान्विता ॥

62 ff. K. M. & Kasi edns.
63ff. GOS. edn.

सञ्चारिदृष्टयः

समतारा समपुटा निष्कम्पा शून्यदर्शना ।
बाह्यार्थाग्राहिणी ध्यामा शून्या दृष्टिः प्रकीर्तिता ॥

किञ्चिदञ्चितपक्ष्माग्रा पतितोर्ध्वपुटा ह्रिया ।
लघाधोगततारा च दृष्टिर्लज्जान्विता तु सा ॥

श्रमात्प्रम्लापितपुटा क्षामान्ताञ्चितलोचना ।
सज्ञा पतिततारा च श्रान्ता दृष्टिः प्रकीर्तिता ॥

विषादविस्तीर्णपुटा पर्यस्तान्तानिमेषिणी ।
किञ्चिन्निष्टब्धतारा च कार्या दृष्टिर्विषादिनी ॥

प्रस्पन्दमानपक्ष्मा या नात्यर्थमुकुलैः पुटैः ।
मलिनान्ता च मलिना दृष्टिर्विभ्रान्ततारका ॥

किञ्चिच्चला स्थिरा किञ्चिदुद्गता तिर्यगायता ।
गूढा चकिततारा च शङ्किता दृष्टिरिष्यते ॥

स्फुरदाश्लिष्टपक्ष्मार्धा मुकुलोर्ध्वपुटाञ्चिता ।
सुखोन्मीलिततारा च मुकुला दृष्टिरिष्यते ॥

म्लानभ्रूपुटपक्ष्मा या शिथिला मन्दचारिणी ।
क्रमग्रविष्टतारा च ग्लाना दृष्टिस्तु सा स्मृता ॥

आनिकुञ्चितपक्ष्माग्रा पुटैराकुञ्चितैस्तथा ।
साकूतकुञ्चिततारा च कुञ्चिता दृष्टिरिष्यते ॥

मधुरा कुञ्चितान्ता च सभ्रूक्षेपा च सस्मिता।
समन्मथविकारा च दृष्टिस्सा ललिता मता ॥

मन्दायमानतारा या पुटैः प्रचलितैस्तथा।
सन्तापोपप्लुला दृष्टिरभितप्ता तु सव्यथा ॥

अर्धव्याकोशपक्ष्मा च ह्रादार्धमुकुलैः पुटैः।
स्मृतार्धमुकुला दृष्टिः किञ्चिल्लुलिततारका ॥

अनवस्थिततारा च विभ्रान्ताकुलदर्शना।
विस्तीर्णोत्फुल्लनेत्रा च विभ्रान्ता दृष्टिरिष्यते ॥

वितर्कोद्वर्तितपुटा तथैवोत्फुल्लतारका।
अधोमुखविकारा च दृष्टिरेषा वितर्किता ॥

आकुञ्चितपुटापाङ्गा सङ्गतार्धनिमेषिणी।
मुहुर्व्यावृत्ततारा च दृष्टिराकेकरा स्मृता ॥

विकोशितोभयपुटा प्रोत्फुल्ला चानिमेषिणी।
अनवस्थिततारा च विकोशा दृष्टिरिष्यते ॥

लम्बिता कुञ्चितपुटा शनैस्तिर्यङ्निरीक्षिणी।
निगूढा गूढतारा च जिह्मा दृष्टिरुदाहृता ॥

त्रासोद्वृत्तपुटा या तु तथोत्कम्पिततारका।
सन्त्रासोत्फुल्लमध्या च त्रस्ता दृष्टिरुदाहृता ॥

पृटौ प्रस्फुरितौ यस्य निष्टब्धौ पतितौ पुनः।
विप्लुतोद्वृत्ततारा च दृष्टिरेषा तु विप्लुता ॥

आघूर्णमानमध्या या क्षामान्ताञ्चितलोचना।
दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे ॥

किञ्चिदाकुञ्चितपुटा किञ्चिल्लुलिततारका।
अनवस्थितसञ्चारा दृष्टिर्मध्यमदे भवेत् ॥

सनिमेषानिमेषा च किञ्चिद्दार्शीततारका।
अधोभागचरी दृष्टिरधमे तु मदे स्मृता ॥

एतासां दृष्टीनां विनियोगः

80ff. K.M. edn.
82ff. Kasi edn.
85ff. GOS. edn.

इत्येवं लक्षिताः ह्येषा षट्त्रिंशद्दृष्टयो मया।
रसजा भावजाश्चासां विनियोगं निबोधत ॥

रसजास्तु रसेष्वेव स्थायिषु स्थायिदृष्टयः।
शृणुत व्यभिचारिण्यः सञ्चारिषु यथास्थिताः॥

शून्या दृष्टिस्तु चिन्तायामभितप्तापि कीर्तिता।
निर्वेदे चापि मलिना वैवर्ण्ये च विधीयते॥

श्रान्ता श्रमार्ते स्वेदे च लज्जायां ललिता तथा।
अपस्मारे तथा व्याधौ ग्लान्यां ग्लाना विधीयते॥

शङ्कायां शङ्किता ज्ञेया विषादार्थे विषादिनी।
निद्रास्वप्नसुखार्थेषु मुकुला दृष्टिरिष्यते॥

कुञ्चितासूयितानिष्टदुष्प्रेक्षाक्षिव्यथासु च।
अभितप्ता च निर्वेदे व्यभिघाताभितापयोः॥

जिह्मा दृष्टिरसूयायां जडतालस्ययोस्तथा।
धृतौ हर्षे सललिता स्मृतौ तर्के वितर्किता॥

आह्लादिष्वर्धमुकुला गन्धस्पर्शसुखादिषु।
विभ्रान्ता दृष्टिरावेगे सम्भ्रमे विभ्रमे तथा॥

विप्लुता चपलोन्माददुःखार्तिमरणादिषु।
आकेकरा दुरालोके विच्छेदप्रेक्षितेषु च॥

विबोधगर्वामर्षाग्र्यमतिषु स्याद्विकोशिता।
त्रस्ता त्रासे भवेद् दृष्टिर्मदिरा च मदेष्विति॥
षट्त्रिंशद् दृष्टयो ह्येता यथावत्समुदाहृताः।

तारकर्म

91ff. K.M. edn.
93ff. Kasi edn.
95ff. GOS. edn.

रसजानां तु दृष्टीनां भावजानां तथैव च॥
तारापुटभ्रुवां कर्म गदतो मे निबोधत।
भ्रमणं वलनं पातश्चलनं सम्प्रवेशनम्॥

विवर्तनं समुद्वृत्तं निष्क्रामः प्राकृतं तथा।
पुटान्तर्मण्डलावृत्तिस्तारयोर्भ्रमणं स्मृतम्॥

बलनं गमनं त्र्यश्रं पातनं स्रस्तता तथा।
चलनं कम्पनं ज्ञेयं प्रवेशोऽन्तःप्रवेशनम्॥

विवर्तनं कटाक्षस्तु समुद्वृत्तं समुन्नतिः।
निष्क्रामो निर्गमः प्रोक्तः प्राकृतं तु स्वभावजम्॥

अर्थेषां रसभावेषु विनियोगं निबोधत।
भ्रमणं वलनोद्वृत्ते निष्क्रामो वीररौद्रयोः॥

निष्क्रामणं सचलनं कर्तव्यं हि भयानके ।
हास्यबीभत्सयोश्चापि प्रवेशनमिहेष्यते ॥

पातनं करुणे कार्यं निष्क्रामणमथाद्भुते ।
प्राकृतं शेषभावेषु शृङ्गारे च विवर्तितम् ॥

स्वभावसिद्धमेवैतत्कर्म लोकक्रियाश्रयम् ।
एवं रसेषु भावेषु तारकर्माणि योजयेत् ॥

दर्शनप्रकाराः

99ff.K.M. edn.
101ff.Kasi edn.
105ff.GOS.edn.

अथात्रैव प्रवक्ष्यामि प्रकारान् दर्शनस्य तु ॥
समं साच्यनुवृत्तं च त्र्यालोकितविलोकिते ।
प्रलोकितोल्लोकिते चाप्यवलोकितमेव च ॥

समतारञ्च सौम्यञ्च यद् दृष्टं तत्समं स्मृतम् ।
पक्ष्मान्तर्गततारं यत्त्र्यश्रं साचीकृतं तु तत् ॥

रूपनिर्वर्णनायुक्तमनुवृत्तमिति स्मृतम् ।
सहसा दर्शनं यत्स्यात्तदालोकितमुच्यते ॥

विलोकितं पृष्ठतस्तु पार्श्वाभ्यां तु प्रलोकितम् ।
ऊर्ध्वमुल्लोकितं ज्ञेयमवलोकितमप्यधः ॥
इत्येष दर्शनविधिः सर्वभावरसाश्रयः ।

पुटकर्म

104ff. K.M. edn.
106ff. Kasi edn.
110ff. GOS.edn.

तारागतोऽस्यानुगतं पुटकर्म निबोधत ॥
उन्मेषश्च निमेषश्च प्रसृतं कुञ्चितं समम् ।
विवर्तितं सस्फुरितं पिहित सविताडितम् ॥

विश्लेषः पुटयोर्यस्तु स उन्मेषः प्रकीर्तितः ।
समागमो निमेषः स्यादायामः प्रसृतं भवेत् ॥

आकुञ्चितं कुञ्चित स्यात्समं स्वाभाविकं स्मृतम् ।
विवर्तितं समुद्वृत्तं स्फुरितं स्पन्दितं तथा ॥

स्थगितं पिहितं प्रोक्तमाहतं तु वितालितम् ।
अर्थेषां रसभावेषु विनियोगं निबोधत ॥

क्रोधे विवर्तितं कार्यं निमेषोन्मेषणैः सह ।
विस्मयार्थे च हर्षे च वीरे च प्रसृतं स्मृतम् ॥

अनिष्टदर्शने गन्धे रसे स्पर्शे च कुञ्चितम् ।
शृङ्गारे च समं कार्यमीर्ष्यासु स्फुरितं तथा ॥

सुप्तमूर्च्छितवातोष्णधूमवर्षाञ्जनार्तिषु ।
नेत्ररोगे च पिहितमभिघाते वितालितम् ॥
इत्येषु रसभावेषु तारकापुटयोर्विधिः ।

112ff. K.M. edn.
114ff. Kasi edn.
118ff. GOS. edn.

भ्रूकर्म

कार्यानुगतमस्यैव भ्रुवोः कर्म निबोधत ॥
उत्क्षेपः पातनं चैव भ्रुकुटी चतुरं तथा ।
कुञ्चितं रेचितं चैव सहजं चेति सप्तधा ॥

भ्रुवोरुन्नतिरुत्क्षेपः सममेकैकशोऽपि वा ।
अनेनैव क्रमेणैव पातनं स्यादधोमुखम् ॥

भ्रुवोर्मूलसमुत्क्षेपाद् भ्रुकुटी परिकीर्तिता ।
चतुरं किञ्चिदुच्छ्वासान्मधुरायतता भ्रुवोः ॥

एकस्या हि द्वयोर्वापि मृदुभङ्गस्तु कुञ्चितम् ।
एकस्या एव ललितादुत्क्षेपोद्रेचितं भ्रुवः ॥

सहजातं तु सहजं कर्म स्वाभाविकं स्मृतम् ।
अथैषां संप्रवक्ष्यामि रसभावप्रयोजनम् ॥

कोपे वितर्के हेलायां लीलादौ सहजे तथा ।
दर्शने श्रवणे चैव भ्रुवमेकां समुत्क्षिपेत् ॥

उत्क्षेपो विस्मये हर्षे रोषे चैव द्वयोरपि ।
असूयिते जुगुप्सायां हासे घ्राणे च पातनम् ॥

क्रोधस्थानेषु दीप्तेषु योजयेद् भ्रुकुटीं बुधः ।
शृङ्गारे ललिते सौम्ये सुखस्पर्शे प्रबोधे ॥

एवंविधेषु भावेषु चतुरं तु प्रयोजयेत् ।
स्त्रीपुरुषयोश्च सल्लापे नानावस्थान्तरात्मके ॥

मोट्टायिते कुट्टमिते तथा च किलिकिञ्चिते ।
निकुञ्चितं च कर्तव्यं नृत्ते योज्यं तु रेचितम् ॥
अनाविद्धेषु भावेषु कुर्यात्स्वाभाविकं तथा ।

[1]विवर्तनं विसर्गश्च वेपनं विनिगूहनम् ।

सन्दष्टकं समुद्गश्च कर्म[2] षोढाधरे स्मृतम्[3] ॥ ३७ ॥

क्रियते[4] यत्तिरश्चीनं तद्विवर्तनमुच्यते ।

[5]वेदनानादरासूयाहसितप्रमुखे[6] मतम् ॥ ३८ ॥

विसर्गः[7] स्याद्विनिष्क्रान्तिर्यालक्तादिक[8]रञ्जने ।

बिब्बोके[9] चञ्चलाक्षीणां[10] सम्भोगे वल्लभार्पणे ॥ ३९ ॥

122ff. K.M. edn.
124ff. Kasi edn.
129ff.GOS. edn.

नासाकर्म

इत्येवं तु भ्रुवोः प्रोक्तं नासाकर्म निबोधत ॥
नता मन्दा विकृष्टा च सोच्छ्वासाथ विकूणिता ।
स्वाभाविका चेति बुधैः षड्विधा नासिका स्मृता ॥

नता मुहुः श्लिष्टपुटा मन्दा तु निभृता स्मृता ।
विकृष्टा फुल्लितपुटा सोच्छ्वासाकृष्टमारुता ॥

विकूणिता संकुचिता समा स्वाभाविकी स्मृता ।
नासिकालक्षणं ह्येतद्विनियोगं निबोधत ॥

मदोत्कम्पसमायुक्ते नारीणामनुरोधने ।
निःश्वासे च नता कार्या नासिका नाट्ययोक्तृभिः ॥

निर्वेदौत्सुक्यचिन्तासु मन्दा शोके च योजयेत् ।
तीव्रगन्धे विकृष्टां तां रौद्रे वीरे तथैव च ॥

इष्टघ्राणे तथोच्छ्वासे दीर्घोच्छ्वासां प्रयोजयेत् ।
विकूणिता च कर्तव्या जुगुप्सामूयितादिषु ।
कार्या शेषेषु भावेषु तज्ज्ञैः स्वाभाविका तथा ॥

1. This last mentioned gap (No. 9, the first line of the enumeration of the actions of the Adhara) is filled up on the basis of the definitions that follow. 2. A.B. क्रमं 3. A. B. स्मृतः 4. A. B. गायते 5. A. द्वे 6. A. मुहितप्रमुखं B. सम्मुखप्रमुखं 7. A. पवर्गः B. ववर्गः 8. A. र्यापकाका B. यापका 9. A. बिबोदरे B. बिंबोको 10. A. चलाक्षीणा B. चञ्चलाक्षीणा

वेपनं कम्पनं शीतभीरोषार्ति[1]जपा[2]दिषु ।

[3]विनिगूहनमास्यान्त[4]र्गतिः प्राणगतेषु तत् ॥ ४० ॥

[5]बलाच्चुम्बति कान्ते च[6] क्रोधे बालमृगीदृशाम् ।

सन्दष्टं दशनैर्दष्टं[7] कथ्यते क्रोधकर्मसु ॥ ४१ ॥

उत्तरेण सहोद्वृत्य समुद्वमभिधीयते ।

फूत्कृतावनु[8]कम्पायां चुम्बने लालने[9]ऽपि च ॥ ४२ ॥

चतुरोऽन्यानपि ब्रूमो भेदानुक्तान्मतान्तरे ।

आयतो रेचितो वृत्तो[10] विकासी तुर्य उच्यते ॥ ४३ ॥

उत्तरेणान्वितो दीर्घः आयतः कथितः स्मिते[11] ।

चलनात् सृक्कदेशस्य रेचितः स्थिरविभ्रमे ॥ ४४ ॥

यदा मुकुलितावोष्ठौ नासिकोपान्तगामिनौ ।

ततो वृत्तः स्मृतस्तज्ञैरवज्ञापरिहासयोः ।

[12]विकासी हसिते[13] योज्यः किञ्चिल्लक्ष्योत्तरद्विजः ॥ ४५ ॥

इत्योष्ठलक्षणम् ।

[14]कुञ्चितः कम्पितः फुल्लः क्षामः[15] पूर्णस्ततस्समः[16] ।

इति भेदाः कपोलस्य मुनिना षड् विनिर्मिताः ॥ ४६ ॥

1. A. भीरोशार्ति B. भीरोगार्ति। Roga is one of the applications of the lip, but even so Roṣa, whose restoration is supported by the A reading Rośa ; so Roga is omitted as Ārti can cover it. 2. A. omits. B. दिवा 3. A.B. विनिग्रहं 4. A. मस्यान्तः B. माध्यन्तः 5. A. बालाश्छम्पति B. बालाच्छपति 6. A. क्षेन B. न्तेन 7. A. सदष्टदशनैर्दृष्टं B. सदष्टदर्शनैर्दृष्टं 8. A. सु 9. A. लोलने 10. A. प्यक्तः B. प्रोक्तः 11. A. त स B. तो बुधैः 12. A. वि..... B. विलास 13. A.B. तो 14. A. The seven lines of the Kapola lakṣaṇa here are missing. 15. B. कामः 16. B. तमः।

कुञ्चितः कृतसङ्कोचः शीतत्रासज्वरादिषु ।

स्फुरितः कम्पितः कोपे प्रमोदे च विधीयते ॥ ४७ ॥

फुल्लो [1]विकसितो हर्षे[2] ततः क्षामो रुजि[3] स्मृतः ।

पूर्णस्समुन्नतो गर्वे प्रोत्साहे च प्रयुज्यते ।

समस्स्वाभाविकश्शोषभावेषु विनियुज्यते ॥ ४८ ॥

इति कपोललक्षणम् ।

चुबुकं सप्तधोद्दिष्टं जिह्वादन्तोष्ठकर्मभिः ।

कुट्टनं लेहनं छिन्नं[4] खण्डनं चुक्कितं[5] समम् ॥ ४९ ॥

दष्टं च लक्षणं त्वेषां विनियोगश्च कथ्यते ।

कुट्टनं द्विजसंघृष्टिः क्रुद्धीशीतज्वरादिषु[6] ॥ ५० ॥

जिह्वाया लेहनं लेहो लेह्ये[7] लौल्ये[8] च तद्विदुः ।

द्विजानां गाढसंश्लेषं छिन्नं व्याधौ भये[9] मृतौ ॥ ५१ ॥

व्यायामे रोदने शीते तन्मतं नाट्यवेदिनाम् ।

असकृत्खण्डनं दन्तसंस्फोटो[10] जपभक्षयोः[11] ॥ ५२ ॥

सल्लापेऽध्ययने चैतद् विजानन्ति विचक्षणाः ।

दन्तपङ्क्त्योः स्थितिर्दूरं [12]जृम्भायां चुक्कितं[13] मतम् ॥ ५३ ॥

मनाक् संश्लेषणं दन्तपंक्त्योस्स्वाभाविके समम् ।

सन्दष्टं[14] दशनैर्दष्टं स्यादेतत्क्रोधकर्मसु ॥ ५४ ॥

इति चुबुकलक्षणम् ।

1. B. विका 2. B. र्षे 3. B. जिः 4. A.B. चिह्नं 5. B. चुंक्कितं
6. A. रुद्धिशीतज्वरादिषु B. रुद्री.....दिषु 7. A. भ्यो B. ह्यो 8. B. ह्ये
9. A. गधे 10. B. पेटः 11. B. ये 12. B. द्रं 13. B. त्किं
14. A. ददष्टिं B. दंदष्टि

व्यादीर्णा चलिता लोला रोमन्थे[1] ग्रासलोलने ।

श्वसिताद्भुतवीक्षायामेकाङ्गुल्मधः[2] श्लथा[3] ॥ ५५ ॥

चलाश्लिष्टाधरा योषिदाहारे चलसंज्ञिता[4] ।

निश्चलास्या यदा[5] सैव संहता मौनतत्परा[6] ॥ ५६ ॥

स्फुरिता वेपिता प्रोक्ता शीतशीतज्वरादिषु ।

तिरश्चीनगता [7]वक्रा [8]ग्रहाबेशेऽर्दितामये ॥ ५७ ॥

इति हनुलक्षणम् ।

ऋज्वी[9] [10]सृक्कानुगा वक्रा[11] नता लोलाथ लेहिनी ।

इति षोढा भवेज्जिह्वा क्रमाल्लक्षणमुच्यते ॥ ५८ ॥

ऋज्वी प्रसारिता प्रोक्ता विवृते वदने सति ।

श्वापदानां पिपासायां श्रमे चैषा विधीयते ॥ ५९ ॥

लिहाना सृक्कणी सृक्कानुगा मृष्टादन[12]क्षुधोः ।

उच्चाग्रा विवृतास्यस्था[13] वक्रा नृहरि[14]दर्शने ॥ ६० ॥

नताग्रा स्यान्नता जृम्भावदनान्तर[15]वीक्षयोः ।

विदीर्णास्ये चला लोला[16] वेतालादि[17]बिडम्बने ।

दन्तानोष्ठौ च लिहती[18] लेहनी लेहने मता ॥ ६१ ॥

इति जिह्वाकर्माणि ।

1. B. दो 2. A. ध B. थ 3. A.B. र्शधाम् B. श्लथाम् 4. A. संहित B. संहता 5. A.B. द्यादा 6. A. मौनतौ वराः B. तोषरा 7. A.B. च 8. B. गृ 9. A.B. ज्वि 10. B. स्र 11. A.B. क्त्रा 12. A.B. नु 13. A. स्वस्था B. वस्था 14. A. B. नुहरि 15. Antara here means 'inside', not another. 16. B. लां 17. A.B. वतालादि। 18. A.B. लेहनी

चर्वणच्छेदने स्यातां पीडन[1]ग्रहणे ततः[2] ।
अन्त्यं[3] निष्कर्षणं ज्ञेयं तत्कर्माणि च पञ्चधा ॥ ६२ ॥

एतान्यन्वर्थसंज्ञानि; चर्वणं चणकादिषु ।
ताम्बूलवीटिका[4]च्छेदे छेदनं; पीडनं पुनः ॥ ६३ ॥

स्फोटने क्रमुकादीनां कोपे च परिकीर्तितम् ।
भियाङ्गुलीतृणादीनां[5] ग्रहणं ग्रहणे रणे ।
मतं निष्कर्षणं [6]कीशरोदनाभिनयं प्रति ॥ ६४ ॥

इति दन्तकर्माणि ।

समाञ्चिता नता त्र्यश्रा [7][रेचिता कुञ्चितोन्नता ।
वलिता च निवृत्ता च ग्रीवा नवविधा स्मृता] ॥

.....[अत्र ग्रन्थपातः].....

[8]त्र्यश्रा पार्श्वगता[9] स्कन्धभारेण परिपीडिते[10] ॥ ६५ ॥

---

1. A.B. ना 2. A.B. नताः 3. A.B. न्त्य 4. A.B. पीडिका
5. A. ङ्गुलीन्तृणादीनां B. वलीन्तृणादीनां । अङ्गुली is the correct reading; it is supported also by Devendra's Saṅgīta-muktāvali ; it is not known how 'अङ्गुलैः' given in instrumental separately in the Ānandāśrama edition of the Saṅgīta Ratnākara with an editorial note can be construed. 6. A. की
7. There is a gap here in both Mss. in which are lost the enumeration of the five other Grīvās—Recitā, Kuñcitā, Unnatā, Valitā and Nivṛttā, — which I have tentatively restored on the basis of the definitions and their order that follow, —as also the definitions and applications of the first three—Samā, Añcitā and Natā; for the latter the corresponding lines from Bharata are here reproduced for reference: समा स्वाभाविकी ध्यानस्वभावजपकर्मसु।
अञ्चितापसृतोद्वृद्धकेशकर्षोर्ध्वदर्शने ।
नता नतास्येऽलङ्कारबन्धे कण्ठावलम्बने ॥
8. Of the definition and application of Tryaśrā, just a little of the line is lost, which has been restored.
9. A.B. पार्श्वतानता 10. A.B. ता

रेचिता[1] विधुता भ्रान्ता[2] भवेन्मथन[3]नृत्तयोः ।

ऊर्ध्वं सङ्कुचिते मूर्ध्नि कुञ्चिता गलरक्षणे ॥ ६६ ॥

[4]उन्नताभ्युद्गता[5] सा स्यात् ग्रैवेयालोकितादिषु ।

प्रलोकिते स्वभङ्गे[6] च वलिता पार्श्वतोमुखी[7] ।

स्वस्थानं पुनरानीता निवृत्ताभिमुखादिषु ॥ ६७ ॥

[8]शिरःकर्मानुगामित्वं ग्रीवायाः कर्मणो यतः ।

यत्किञ्चिदस्ति तत्कर्म तदस्यामखिलं स्वयम् ॥ ६८ ॥

इति ग्रीवालक्षणानि ।

सूचने च मनोवृत्तेः[9] मुखरागस्य मुख्यता ।

शरीराभिनये[10] यस्मात् कार्यस्तस्मादिहादरः ॥ ६९ ॥

स्वाभाविकः[11] प्रस[12]न्नाख्यो [13]रक्तः श्यामश्चतुर्थकः[14] ।

मध्यस्थादिषु[15] भावेषु स्वभावाभिनयेषु च ॥ ७० ॥

स्वाभाविकः,[16] प्रसन्नस्तु शृङ्गाराद्भुतहास्ययोः ।

रक्तो मदेषु[17] करुणे वीरे रौद्रे च[18] जायते ॥ ७१ ॥

श्यामो भवति बीभत्सभयानकसमाश्रयः[19] ।

[20]नाङ्गिकाभिनयो भाति मुखरागविनाकृतः ॥ ७२ ॥

किमु धत्ते श्रियं जातु मधु पुष्पायुधं विना ।

सूर्योदयं विना पद्मं विभ्रमा[21] यौवनं विना ॥ ७३ ॥

---

1. B. चने 2. A. भ्राता B. भ्रता 3. B. मन्मथ 4. A.B. विनता 5. B. न्नता 6. A.B. मंगे 7. A.B. खि 8. A.B. This line has strayed two lines up, before प्रलोकिते । 9. A.B. ते 10. A. मुखेनये B. मुखे 11. A.B. क 12. B. पस 13. B. श 14. A. कम् 15. A.B. ष्ट 16. A.B. क 17. A.B. मन्देषु 18. B. व 19. A.B: याः 20. A.B. नासिका 21. A.B. जा

मुखरागं[1] विनाभिख्यां[2] भजतेऽभिनयो न हि ।

आङ्गिकाभिनयस्यास्य मुखरागो हि जीवितम् ।

विना तेन [3]बिभर्त्येष [4]सादृश्यं पुस्तचेष्टितै:[5]* ॥ ७४ ॥

इति मुखरागः ।

चतुरमकरराजि[6] प्रोल्लसत्पद्मकोशं

भ्रमरललित[7]लीलं हंसपक्षाभिरामम् ।

प्रविचलदलपद्मं कर्कटाद्यैरुपेतं

जलधिजलमिवेदं ब्रूमहे[8] हस्तलक्ष्म ॥ ७५ ॥

पताकात्रिपताकाख्यौ भुजङ्गमृगशीर्षकौ ।

कर्तरीकटकासूचीशुकहंसमुखाभिधा:[9] ॥ ७६ ॥

कपित्थशिखरौ पद्मकोशकाङ्गुलमुष्टय:[10] ।

चतुरभ्रमरारालहंसपक्षार्ध[11]चन्द्रका: ॥ ७७ ॥

सन्दंशमुकुलाभिख्यावूर्णणा[12]भालपल्लवौ ।

ताम्रचूडश्च वियुता[13]श्चतुर्विंशतिरित्यमी ॥ ७८ ॥

---

1. A.B. ग 2. A.B. ख्या 3. A. विभर्त्येष B. विभात्येष 4. A.B. सा... .....स्तवेष्टितैः

5.* This last quarter has a small gap in both Mss. which has been restored as above on the basis of the sense and what is left of the quarter; the meaning is that without mukha-rāga, āṅgikābhinaya is mechanical and lifeless, the verb 'bibharti' and the available letter 'sā' suggests *'sāmyam' or 'sādṛśyam'*, the latter being metrically adequate; the letters at the end 'sta (ve ? ce) ṣṭitaiḥ' contain in the first component of the compound, some word standing for the sense 'mechanical' or 'a lifeless object', and it might well be a 'doll' or *'pusta'*.

6. A.B. जी 7. B. मिलित 8. A.B. ब्रह्महे 9. A. भिधा B. पिसा 10. A. ङ्गष्टय: B. ...ष्टय: 11. A.B. च 12. A. पूर्णणा B. घूर्णता 13. A.B. विधुता:

अञ्जलिः कटकावर्धमानस्वस्तिककर्कटाः ।
कपोतनिषधो[1]त्सङ्गगज[2]दन्तावहित्थकाः[3] ॥ ७९ ॥

[4]डोलः पुष्पपुटो वर्धमानो मकर इत्यमी ।
त्रयोदश[5]विधा युग्महस्ताः स्युर्मुनि[6]सम्मताः ॥ ८० ॥

चतुरश्रावथोद्वृत्तौ[7] तथा तल[8]मुखाभिधौ ।
स्वस्तिकौ विप्रकीर्णाख्यावरालकटकामुखौ ॥ ८१ ॥

आविद्धवक्त्रौ सूच्यास्यौ[9] रेचितावर्धरेचितौ ।
उत्तानवञ्चिताभिख्यौ पल्लवौ सनितम्बकौ ॥ ८२ ॥

केशबन्धौ लतासंज्ञौ करिहस्ताभिधौ ततः ।
पक्षवञ्चितकौ पक्षप्रद्योतौ तार्क्ष्यपक्षकौ[10] ॥ ८३ ॥

दण्डपक्षाह्वयावूर्ध्वं[11]मण्डलौ पार्श्वमण्डलौ ।
उरोमण्डलनामानावुरःपार्श्वार्धमण्डलौ ॥ ८४ ॥

मुष्टिकस्वस्तिकावन्यौ नलिनीपद्मकोशकौ ।
अलपल्लवनिष्पन्नावुल्बणौ ललितौ तथा ॥ ८५ ॥

वलितौ च करा नृत्ते[12] विंशतिः स्युर्नवाधिकाः ।
यद्येवं मिलितास्सर्वे षट्षष्टिस्त्रिविधा अपि ॥ ८६ ॥

चतुष्षष्टिकरा ह्येते नामतोऽभिहिता मया* ।
इत्युक्तं ब्रह्मपुत्रेण भरतेनापि तत्कथम् ॥ ८७ ॥

अयुक्तेषु च[13] सूच्यास्यः स्वस्तिकस्संयुतेष्वपि ।
तावेवात्र समानाख्यौ नृत्तहस्तौ प्रकीर्तितौ ।
यत्तु 'नामत' इत्याह मुनिः सत्यं न चान्यथा ॥ ८८ ॥

1. A.Bनिवहो 2. A.B. गन्द 3. A. वभिर्धिकाः B. वहिञ्जकाः 4. B. मोलः
5. B. विंश 6. A.B. मति 7. B. योद्वत्तौ B. धोद्वतौ 8. A.B. तत्तत्स्थल
9. A.B. स्थौ. 10. A.B. क्त्रौ 11. A.B. दूर्ध्वं 12. A.B. नृत्त्ये

* Quotation from Bharata's N. S., IX. 17 (Kasi edn.)

13.A. B. च missing.

पल्लवावेव ललितौ लताख्यौ वलितावितिं ।
निश्चित्य नृत्त[1]हस्तेषु हित्वा तद्वितयं पुनः ।
सोमेश्वरादयः केचित् सप्तविंशतिमूचिरे ॥ ८९ ॥

स्वस्तिकौ विप्रकीर्णे च रेचितावर्धरेचितौ ।
[2]नामभेदान्मिथोभिन्नौ तद्वदत्रापि मन्यताम् ॥ ९० ॥

स्यातां येषां [3]मतेऽभिन्नावुल्ब[4]णावल[5]पल्लवौ ।
मण्डलानां च सामान्यमण्डलत्वमिति ध्रुवम् ॥ ९१ ॥

सन्त्यज्यते त्रयं[6] तेषु नृत्त[7]विद्याविशारदैः ।
एवं चेन्न पृथक् स्यातां रेचितावर्धरेचितौ[8] ॥ ९२ ॥

[9]उल्बणावलपद्मौ च भिन्नौ[10] यदि मुनेर्मते ।
बहुत्वं प्राप्नुतश्चैतावलपद्मोल्बणाविति ॥ ९३ ॥

अञ्जल्यादेः करद्वन्द्वप्रयोज्यस्य[11] कथं मुनिः ।
उक्तवैकवचनं नृत्त[12]हस्ते द्विवचनं [13]व्यधात् ॥ ९४ ॥

नृत्ये[14] संयुक्तयोस्सिद्धिः हस्तत्वे सततं भवेत् ।
नृत्तहस्तेषु हस्ताभ्यां हस्तेनैकेन वा भवेत् ॥ ९५ ॥

हस्तत्वसिद्धिरित्यस्मात्कारणादु[15]भयोरपि[16]।
प्राधान्यं वक्तुकामोऽसौ मुनिर्द्विवचनाज्जगौ ॥ ९६ ॥

[असंयुतहस्ताः]

प्रकृतित्वात्पताकस्य प्रवृत्तिस्सर्वकर्मसु ।
जायते हि स्वभावेन विनियोगोऽस्य[17] तन्महान् ॥ ९७ ॥

---

1. A.B. नित्य 2. A.B. सा 3. मतेभिन्ना 4. B व्द 5. A. B. विल
6. A. B. सन्त्यज्य त्रितयं 7. A. त्य 8. A ता 9. A.B. उद्ब
10. A. न्ना 11. A. स्स 12. A.B. नित्यं 13. A. व्य 14. A.B. नृत्ये
is wanting in both Mss. 15. B. वु 16. A. रिव 17. B गस्य

प्रसूतिर्बहुहस्तानामत एवास्य मुख्यता ।
तर्जनीमूलगो[1]ऽङ्गुष्ठः कुञ्चितः कुञ्चिताङ्घ्रिवत् ॥ ९८ ॥

अङ्गुल्यो यत्र जायन्ते समश्लिष्ट[2]प्रसारिताः ।
स पताक इति ख्यातः पताकाकारधारणात् ॥ ९९ ॥

हर्षगर्व[3]प्रहारादौ [4]कालदेशस्थितो[5] भवेत् ।
चपेटे [6]तालिकायाञ्च स्याद्वराभयदानयोः ॥ १०० ॥

पुष्पादेस्संयुतो हर्षे विश्लिष्ट[7]चलिताङ्गुलिः ।
ललाटोर्ध्व[8]गतोऽधस्ताद्[9] वर्षधारानिरूपणे ॥ १०१ ॥

पुष्पोपहारशप्पादौ स्वस्तिकीभूय विच्युतः[10] ।
[11]मिथोघृष्टतलो मृष्टपिष्टधौतादिषु स्मृतः ॥ १०२ ॥

मिथस्संमुखविश्लिष्टः शिलाव्युत्पाटनादिषु[12] ।
पक्षोत्क्षेपे कटीक्षेत्रात् गच्छन्नविरलाङ्गुलिः[13] ॥ १०३ ॥

उत्साहन[14]बहुप्रांशुप्रमुखेषु सरेचकः ।
निषेधे[15] चलितः पार्श्वे स्यादधः पुष्करादृतौ ॥ १०४ ॥

तिर्यगग्रोच्चसर्पी[16] स्याच्चलाङ्गुलिरधस्तलः[17] ।
समीरे लहरीवेगे वेलाक्षोभेऽप्ययं[18] क्रमात् ।
स एवोत्तानितो हस्तो [19]भवेदोघप्रदर्शने[20] ॥ १०५ ॥ (इति पताकः[21])

आनम्रानामिकस्सोऽयं त्रिपताकः करो भवेत् ।
मतोऽत्राङ्गुल्यस्तिस्रः पताकाकारसंस्थिताः ॥ १०६ ॥

---

1. A. को 2 B. शिष्ट 3. B. च्छ 4. A.B. हाल 5. A. शोद्धितो
6. A.B. ना 7. B. विशिष्ट 8. A.B. र्ध 9. A.B. स्ता
10. A.B. विद्युतः 11. A.B. तिथो 12. B. व्युत्पादनादिषु 13. A. न्नूर्ध्वे-चलाङ्गुलिः which is wrong in the applications mentioned. B. खरवाङ्गुलि 14. B. ने 15. B. ध 16. A.B. र्पि 17. A.B. ला 18. B. र्यं 19. A. भये 20. A.B. प्रमर्शने 21. B. पक्षकः

आवाहनावतरण[1]प्रणामोन्नामने[2]ष्वयम् ।
माङ्गल्यवस्तुसंस्पर्शप्रवेशादौ च[3] शस्यते ।
अनुकृत्या[4] यथार्थाख्या:[5] भवेयुः प्रायशः कराः ॥ १०७ ॥ (त्रिपताकः)

पताकस्य यदा निम्नं तलं सर्पशिरास्तदा ।
प्रतिग्रहे प्रदानेऽथ तोयधारणसेकयोः[6]॥ १०८ ॥

गतौ सर्पस्य [7]मल्लोरुबाहुस्फोटनयोर्भवेत् ।
कुंभिकुंभ[8]द्वय[9]स्कन्धबन्धुरास्फोट[10]नादिषु ॥ १०९ ॥ (सर्प[11]शिराः)

अस्याङ्गुष्ठकनिष्ठे[12] चेदूर्ध्वके मृगशीर्षकः ।
[13]द्यूताक्षपातने[14] शक्त्या उल्लासे[15] स्वेदमार्जने ।
इह साम्प्रतमत्रास्तीत्यादौ चैव प्रयुज्यते ॥ ११० ॥ (मृगशीर्षकः)

त्रिपताकस्य मध्यायास्तर्जनी पृष्ठदर्शिनी[16] ।
[17]यदा भवेत्तदा [18]विद्धिज्ञेयोऽसौ[19] कर्तरीमुखः[20] ॥ १११ ॥

अलक्तकादिना पादरञ्जनादावधोमुखः[21] ।
उत्तानो दृष्टिशृङ्गादौ तथा लेखादिवाचने ॥ ११२ ॥ (कर्तरीमुखः)

तलस्थानमिता मध्या मुखेऽङ्गुष्ठनिपीडिता ।
वक्रा[22]प्रदेशिनी शेषे [23]वक्रोर्ध्वे कटकामुखे ॥ ११३ ॥

1. B. आवाहनमवतर 2. न 3. A.B. wanting in a syllable here.
4. A. अनेल्ययं B. अने-ल्यं 5. B. यथाम्साङ्ख्याः. The 'hands' bear names which are significant by reason of their 'similarity' (anukṛti) to the objects after which they are named. *cf.* Bharata on the basis of Hastas, आकृत्या चेष्टया चिह्नैः etc. IX. 152, Kasi edn.
6. B. सैकयोः 7. B, omits this word. 8. A. भि 9. A.B. पय 10. A. स्फाल 11. B. सर्वक 12. B. ष्ठ 13. A.B. दू 14. A.B. दने 15. A.B. शक्यामुल्लोसे 16. B. दर्शनी 17. A.B. जला 18. B. वृद्धि 19. A.B. ज्ञेया 20. A.B. खा 21. A. खीः 22. A. वरा B. वक्ता 23. B. वक्तो

[1]स्रग्दामप्रग्रहच्छत्रव्यजना[2]दर्शधारणे ।
शरवस्त्राञ्चलाकर्षे[3] ..... ॥ ११४ ॥ (कटकामुखः)

[4]भवेत्सूचीमुखो हस्तः[5] तर्जन्यस्यायता यदि ।
ऊर्ध्वानना नता लोला कम्पिता जृम्भिता तथा ।
उद्वाहिता चलेत्य[6]स्मिन् तर्जनी सप्तधा मता ॥ ११५ ॥

ऊर्ध्वानना[7] भवेदूर्ध्वा क्रियतेऽधोमुखी[8] नता ।
लोला पार्श्वान्तरं याता कम्पिता स्पन्दिता स्मृता[9] ॥ ११६ ॥

जृम्भिताभिमता किञ्चित् कुञ्चयित्वा प्रसारिता ।
उद्वाहिता व्रजन्त्यूर्ध्वं गच्छन्ती [10]कामतश्चला ॥ ११७ ॥

[11]पृथङ्मिथः प्रभेदाय विनियोगेषु युज्यते ।
[12]ऊर्ध्वास्या तर्जनैकत्वयष्टिधोणग्रहादिषु ॥ ११८ ॥

ऊर्ध्वावलोला [13]च भवेद् वाममण्डलवर्त्तिनी[14] ।
चक्रे तथाभिधे[15] शस्त्रकुलालरथदेहिनाम् ॥ ११९ ॥

---

1. A. सुद्राम B. हृदाम 2. A.B. व्यञ्जना

3. A.B. Gap. The further uses of Kaṭakāmukha are lost in the gap; further, four and a half lines and parts of one more line from the coming treatment of the next 'hand', Sūcīmukha, have strayed here and are repeated; at their end is found the name 'Kaṭakāmukha'. The further uses of Kaṭakāmukha according to Bharata are: Hotra, Havya, Khaṇḍana or Kaṇḍana, Peṣaṇa, Āyata-daṇḍa-grahaṇa, Puṣpāvacaya, Pratoda, A[n]kuśa, Śara. Jyā-ākarṣa and Strī-darśana.

4. A.B. The above mentioned gaps are indicated here. 5. B. हस्तः missing. 6. A.B. न्य 7. B. gap up to 'Pārśvāntaram' in next line. 8. A. कि...धामुखी 9. B. तथा 10. B. क 11. B. This line missing here except for...ते in the end; but in the earlier repetition, it is found in B too. 12. A.B. ऊर्ध्वास्त, but ऊर्ध्वास्या correctly in the earlier repetition. 13. A.B. च not found. 14. A.B. ना 15. A. बतविधे B. वतर्विधे. *cf.* Saṅgita-ratnākara at the same place, शस्त्रे चक्राभिधे etc. VII. 150.

ग्रहणे [1]सर्वलोकस्य वृत्तमण्डल्योरपि ।
[2]गण्डेऽनु कुण्डले[3] सौदामन्यां[4] स्फुरितकम्पिता ॥ १२० ॥

[5]उत्कृष्टा तु पताकायां मञ्जर्यां कम्पिता मता ॥
मीनादिवक्रसञ्चारे पार्श्वात्पार्श्वान्तरं गता[6] ॥ १२१ ॥

अङ्गुष्ठोपहिता[7] धूपदीपयोः काकपक्षके[8] ।
अलाब्वादिषु वल्लीषु [9]द्राक्षादिषु लतास्वपि ॥ १२२ ॥

पल्लवे पतने वक्रभावे बालभुजङ्गमे ।
विनता सृक्क[10]सम्पन्ना वराहादिषु दंष्ट्रिषु ॥ १२३ ॥

[11]वामतो दक्षिणं [12]यावत् प्रोन्नता विनता क्रमात् ।
उदयास्तमयौ दीर्घ[13]गमनात्[14] सूचयत्यसौ ॥ १२४ ॥

वाक्यं निरूपय[15]त्यास्या[16]भ्यग्रे[17] कुञ्चितजृम्भिता ।
कुण्डलाङ्गदयोः स्पर्शे कुन्तलानां प्रसाधने ॥ १२५ ॥

स्वेदस्य मार्जने[18] पत्रभङ्गादौ च प्रसारितः ।
उत्कम्पसहिता सैव भ्रामिता रोषदर्शने ॥ १२६ ॥

स्यात्तदेति स इत्यादौ सैवोत्तानी[19]कृता पुनः ।
क्रोधेन रिपुनिर्देशे कोऽसाविति[20] निरूपणे ॥ १२७ ॥

---

1. B. From here gap up to end of line and the first letter of the next line. 2. A. गन्धे B. -ड 3. B. ल 4. A.B. न्या 5. A.B. आकृष्टा which is neither suitable in Patāka nor one of the actions of Sūcī set forth above; Utkṛṣṭā meaning Ūrdhvā is quite applicable. *Cf.* also S. Ratnākara, VII. 152. 6. A.B. तम् 7. A. अङ्गुष्ठोभिहिता B. अङ्गुष्ठोहिहि 8. B. Whole pāda missing. 9. A.B. ल 10. A. सृक्त्व 11. A. पारतः B. वारतोल 12. B. gap from here upto 'udayāsta' in next line. 13. A.B. घौं 14. A. ना B. न 15. A.B. यि 16. A.B. स्था 17. B. र्णे 18. B. gap from here upto 'sahi' in next line 19. A.B. नि 20. A.B. क्रोधाविज

अग्रगा कथिता[1] [2]तत्र[3] वस्तुनश्च दवीयसः ।
[4]तिरश्च कर्ण[5]कण्डूतौ सङ्गमे सङ्गतान्यया[6] ॥ १२८ ॥

विश्लेषिता वियोगे[7] स्यात् कलहे स्वस्तिकी[8]कृता ।
मिथः[9] [10]शृङ्खलिताबन्धे[11] तालमात्रान्तरालयोः* ॥ १२९ ॥

स्वसंमुख[12]पराङ्[13]मुख्यो[14]र्दक्षिणं[15]गतयोः[16] द्वयोः ।
[17]सूर्यस्यास्तमयस्सूर्यो[18] भागस्तस्य हि दक्षिणः ॥ १३० ॥

एवं वामे शशाङ्कस्य भागस्तस्य हि सम्मतः[19] ।
भ्रान्ताग्राधोमुखी यत्र [20]कूपावर्तशिलादिषु ॥ १३१ ॥

---

1. A. तां 2. B. gap from तत्र to कण्डू in next line. 3. A. त्रै
4. A. निरश्चि B. gap 5. A. कण्ट 6. A.B. मोन्यथा 7. B. ग
8. A.B. के 9. A.B. मृत 10. B. श 11. A. वर्षे B. बद्धे

* 'तालमात्रान्तरालयोः'—This seems to refer not to a *Nṛtya*-hasta-viniyoga, but a *Nṛtta*-hasta-viniyoga; the meaning seems to be something like the Intermediate Pauses in the midst of the rhythmic sequences; in the present South Indian Bharata Nāṭya, for example, in the poses figuring in Tillāna and elsewhere too, the double Sūcī (Samyuta) hooked together as mentioned here (mithaḥ śṛṅkhalitā) occurs in the arms held over the head like a frame round the face; one whole sequence with variations is done with this pose.

12. A.B. खी 13. B. Gap from here upto सूर्य in next line.
14. A. ख्यौ 15. A. णां 16. A. यो 17. In this and the next line, the idea is clear, though not the construction. The movement to the right indicates the Sun and its setting and that to the left the Moon and its setting.
A. सूर्या B. सूर्य missing. 18. A.B. अस्तमये and सूर्ये in locative would be better. 19. This may be a corruption for सव्यतः
20. A.B. कृपा. कूप or Well is the correct object, and not रूप as printed in the G.O.S. edn. of Nāṭya Śāstra, II,P. 45, verse 77 and Kasi edn. IX.70.

सङ्कताधोमुखी [1]फाले [2]त्र्यम्बकस्य निरूपणे ।
तत्रैव तिर्यगुत्ताना सहस्राक्षस्य सूचने ॥ १३२ ॥ (सूची)

अञ्चिताङ्गुष्ठसंलग्ना चन्द्रलेखेव तर्जनी ।
निमितानामिका मध्याकनिष्ठे वलितोर्ध्वगे[3] ॥ १३३ ॥

यत्रासौ शुकतुण्डः स्याद् [4]यथार्थाख्यो विसर्जने ।
आवाहने धिगित्युक्तौ नाहमित्यादिदर्शने ॥ १३४ ॥ (शुकतुण्डः)

अङ्गुष्ठतर्जनीमध्याः सङ्कताग्राः परस्परम् ।
विरलोर्ध्वे परे[5] यत्र मतो हंसास्य इत्यसौ ॥ १३५ ॥

श्लक्ष्णत्वं[6] मृदुतालप्त्वं मर्दन[7]क्षेपणादिषु ।
किञ्चित्प्रस्प[8]न्दमानादौ यथायोगं विधीयते ॥ १३६ ॥ (हंसास्यः)

कटकामुखमध्यादिकनिष्ठान्ता अधो यदा[9] ।
तलमध्यस्थिताग्राः स्युः कपित्थोऽसौ निगद्यते ॥ १३७ ॥

[10]तोमरासिगदाचक्रकुन्त[11]सायकशक्तिषु ।
[12]छुरिकास्फोटने सत्ये पथ्ये[13] श्रेयसि[14] वेष्यते ॥ १३८ ॥ (कपित्थः)

तर्जन्यपि तलस्था[15]ग्रा कपित्थस्य, समुच्छ्रितः ।
अङ्गुष्ठस्तु यदा हस्तः शिखरः कीर्तितस्तदा ॥ १३९ ॥

[16]ग्रहणे काशपाशादौ शक्तितोमरमोचने ।
कान्तानां कुन्तलोत्क्षेपे[17] चरणाधररञ्जने ॥ १४० ॥ (शिखरः)

1. A.B. हाले 2. B. Gap from here to the end of the first quarter of the next line. 3. A. तेर्ध्वगे 4. B. Gap up to the end of the first quarter of the next line. 5. A. र्ध्वेवरे B. र्ध्ववरे 6. A. त्व B. one म extra and gap after मृ upto the first two syllables of the next line. 7.A. ने 8. A.B. स्य 9. A. दयस्तधा B. दयस्तदा 10. B. Line missing. 11. A. न्द 12. A. छदिका B.--दिका 13. A.B. पश्ये 14. A. खे 15. A.B. गा 16. B. Line lost except for last letter. 17.B. क्षेपे

अङ्गुल्यो यत्र साङ्गुष्ठा[1] विरल[2]कुञ्चितोर्ध्वगाः ।
आसन्नाग्र[3]प्रदेशाः स्युः दरहाससरोजवत् [4] ॥ १४१ ॥

[5]पद्मकोशः स विज्ञेयो बालिका[6]कुचदर्शने ।
कपित्थश्रीफलादीनां ग्रहणे चायमिष्यते ॥ १४२ ॥ (पद्मकोशः)

हंसास्यस्य [7]नतानामा विश्लिष्टाग्रास्त्रिकाग्निवत्[8] ।
यत्राङ्गुष्ठादयस्तिस्रः स काङ्गूलोऽ[9]भिधीयते ॥ १४३ ॥

शिशूनां चिबुक[10]स्पर्शे स्वल्पके तरुणे फले ।
स्याद्बधूरोषवाक्येषु सोऽङ्गुलीक्षेपणैः पुनः[11] ॥ १४४ ॥

[12]शिखरस्य[13] यदा[14]ङ्गुष्ठो मध्यमां पीडयन् स्थितः ।
तदा मुष्टिरिति ख्यातः खड्गकुन्तादिधारणे ॥ १४५ ॥

प्रहारे गात्रसंवाहे रसनिष्पीडनादिषु ।
निष्पीडे दोहनेऽङ्गुष्ठः तासां[15] गर्भस्थितोऽपि च* ॥ १४६ ॥ (मुष्टिः)

श्लिष्टप्रसारितास्तिस्रः कनीयस्युन्नता तथा ।
मध्यमामूलगोऽ[16]ङ्गुष्ठो यद्येवं चतुरस्तदा ॥ १४७ ॥

1. A.B. ष्ठो 2. A.B. णे 3. A. स्र B. श्र 4. B. Gap; whole quarter missing except for the first letter द. 5. B. Whole quarter missing. 6. B. पालिका 7. A.B. ननाम 8. A. विश्लिष्टास्त्रास्त्रिको भवत् । B. विश्वस्तिको भवेत् । 'Trikāgnivat' 'like the three sacrificial fires, Tretāgnis.' 9. B. कान्तूल: 10. B. ज 11. A.B. णे 12. A.B. A gap is wrongly indicated here. 13. A.B. शिखास्य 14. A B. पदा 15. A. नासां

*This variant form of Muṣṭi, in which the thumb is permitted to be inserted into the folded and closed fingers, is mentioned in some other texts too; it is followed in the Kathakali.

16. A.B. लक B. लङ्ग

स्यादेकेनाल्पमध्यादि द्वाभ्यां पद्मदलाक्षिणी ।
किञ्चिन्मण्डलगत्या[1] तु ताभ्यां तत्त्व*त्रपादिकम् ॥ १४८ ॥

†ऊर्ध्वगेन सितं रक्तं, मण्डलेन करेण[2] तु ।
पीतं, नीलं तथा वर्णं मृदितेन[3] प्रदर्शयेत् ॥ १४९ ॥ (चतुरः)

लग्नाग्रौ[4] मध्यमाङ्गुष्ठौ तर्जनी कुञ्चिता मनाक् ।
विरलोर्ध्वे[5] परे यत्र भ्रमरस्सोऽभिधीयते ॥ १५० ॥

दीर्घनालाब्जकह्लारकुमुदोत्पलधारणे ।
प्रसाधने मृगाक्षीणां कर्णपत्रप्रधारणे[6] ॥ १५१ ॥ (भ्रमरः)

विरले[7] वलितोर्ध्वाश्चेत्[8] मध्याद्याः फणिमस्तके § ।
अरालः[9] सत्त्वशौण्डीर्यधैर्यगाम्भीर्यकान्तिषु ॥ १५२ ॥

वारणे सौरभाघ्राणे स्वेदापनयनादिषु ।
[10]केशसंग्रहणोत्कर्षलीलयोश्च नतभ्रुवाम् ॥ १५३ ॥ (अरालः)

पताका[11]ङ्गुलयस्तिस्रो मूलेष्ववनता मनाक् ।
कनीयस्यूर्ध्वगा यत्र स करो[12] हंसपक्षकः[13] ॥ १५४ ॥

स्पर्शेऽनुलेपने[14] गण्ड[15]संश्रये स्यात्प्रतिग्रहे ।
आवापे[16] गात्रसंवाहे रोमोञ्च[17]प्रमुखेष्वसौ ॥ १५५ ॥ (हंसपक्षकः)

---

1. A.B. त्वा

* Sattva or Satya in Nāṭya Śāstra : Vicāra in Saṅgita Ratnākara ; Satya and Vicāra render Jāya's reading Tattva here correct.

† See Nāṭya Śāstra IX. 96 (K. M.), 94 (Kasi), 100 (GOS.)

2. A.B. न केन 3. A. मृद्रिकेन B. मुद्रिकेन 4. A. श्रौ B. लयाश्रौ 5. A. णेर्ध्वे B. णेर्ध्वें 6. A. प्रसारणे 7. A B. णे 8. B. र्ध्वा चेत्

§ Means Sarpaśirṣa-hasta.

9. A.B. अनालः 10. A.B. को 11. B. का missing 12. B. रा 13. B. पक्कक; 14. A.B. नुगमने 15. B. गुण 16. A. अवामे B. आवामे 17. A. रोमाञ्च

भुजङ्गशिरसोऽङ्गुष्ठो यदा स्याद्दूरविच्युतः[1] ।
ख्यातोऽर्धचन्द्रनाम्नासौ बल[2]निर्घाटने तदा ॥ १५६ ॥

कलशेन्दुकलाकाञ्ची[3]मध्य[4]कुण्डलकम्बुषु[5] ।
यथायोगं कृशाङ्गीनां लीलादौ[6] च विधीयते ॥ १५७ ॥ (अर्धचन्द्रः)

अरालस्य यदा[7]ङ्गुष्ठतर्जन्योस्सङ्गतिस्तदा ।
संदंशस्त्रिविधस्सोऽपि स्यादग्रमुखपार्श्वजः ॥ १५८ ॥

अन्योन्यनखसंश्लेषादग्रसंदंशको भवेत् ।
ग्रथनेऽपचये[8] सूक्ष्मपुष्पाणां ग्रहणे पुनः ॥ १५९ ॥

सूत्रकेश[9]तृणादीनां [10]शल्याद्युत्पाटना[11]दिषु ।
मुखसंदंशकस्तद्वत् संश्लेषादग्र[12]पर्वणोः ।
वितर्केऽसौ धिगुत्युक्तौ वृन्तात्प्रसवमोचने ॥ १६० ॥

प्रवालरचनावर्तिशलाकालेख्यकर्मसु ।
लाक्षानिष्पीडने नेत्ररञ्जनादौ प्रजायते ॥ १६१ ॥

मुक्तादिवेधने चाणे ब्रह्मसूत्रस्य मार्जने ।
लक्ष्ये ध्याने गुणादौ च[13] सद्वितीयो[14] भवेदसौ ॥ १६२ ॥

तथैव पार्श्वसंश्लेषात्[15] संदंशः पार्श्वजो मतः ।
[16]सदोषवचनं कुत्साम[17]सूयापेलवादि[18] च ।
हस्तप्रयोगनिपुणो वामेनानेन दर्शयेत् ॥ १६३ ॥ (संदंशः)

1. A.B. विद्युतः 2. A B. बाल. Bala-nirghāṭana means forcible necking out; the word 'bala' is added by Jāya from Abhinavagupta's gloss; and Śāṅgadeva too has it.
3. A.B. कौञ्ची 4. A.B. ध्ये 5. A. कंपिषु B. कंबिषु 6. A. टौ 7. A.B. था 8. A. वचये 9. सूतकेथ 10. A. B. ल 11. A. दना 12. A. षादर B. षद। 13. B. च missing 14. A. सद्वितीयः B. साद्वतीयः 15. A. B. षा 16. A.B. सं 17. B. म missing 18. A.B. वेलवादि

पञ्चाप्य[1]ङ्गुलयो यत्र सङ्गताग्रास्समुच्छ्रिताः ।
मुकुलोऽसौ सरोजादिमुकुलानां निरूपणे ॥ १६४ ॥

अर्चने देवतादीनां बलौ[2] कामुकचुम्बने ।
वलयामोचने पञ्चसंख्यायां चायमिष्यते ॥ १६५ ॥ (इति मुकुलः)

अङ्गुल्यः पद्मकोशस्य[3] नितान्तावनता यदि ।
ऊर्णनाभो भवेदेषां शिरःकण्डूयने करः ॥ १६६ ॥

कर्षाश्मचौर्यकेशादिग्रहे कुष्ठस्य[4] दर्शने ।
चिबुके स्वस्तिकीभूनौ[5] श्वापदानां निरूपणे ॥ १६७ ॥ (ऊर्णनाभः)

आवर्त्तिन्यः कनिष्ठाद्या विरलाः पृष्ठगाः क्रमात् ।
यस्मिन्नङ्गुल्यः सोऽय समुद्दिष्टोऽलपल्लवः ॥ १६८ ॥

कस्य त्वमिति नास्तीति प्रतिषेधाय भाषणे ।
शून्ये च वचने स्त्रीणामात्मसम्भावनेऽपि च ।
अलपद्मममुं चाहुश्चलपद्मानुकारतः ॥ १६९ ॥ (अलपल्लवः)

भ्रमरस्य यदा नाम कनीयस्यौ[6] तले स्थिते ।
ताम्रचूडस्तदा ज्ञेयः कुक्कुटेऽल्पनिराकृतौ[7] ॥ १७० ॥

सशब्दविच्युतः[8] ताले शैघ्र्ये[9] विश्वासने क्षणे ।
आह्वाने बालकादीनां भर्त्सने नृपजृम्भणे ॥ १७१ ॥ (ताम्रचूडः)

इत्यसंयुक्तहस्ताः ।

---

1. A.B. भ्य 2. A.B. बलि 3. B. पदके...स्य 4. A.B. पृष्ठस्य 5. A.B. ते
6. B: ग्यसौ 7. A. निलोधृतौ B. निलाधृतौ 8. A. B. विधुतः
9. A. B. ल्ये

[1]पताकतल्योःश्लेषाद्[2] अञ्जलिः प्रणतौ क्रमात् ।
भूदेवगुरुदेवानां वक्षोवक्त्रशिरःस्थितः ।
*क्रोधे च परिहासे च नास्त्ययं नियमः पुनः ॥ १७२ ॥ (अञ्जलिः)

स्वस्तिकाकारताश्लिष्टौ भवेतां कटकामुखौ ।
मणिबन्धप्रदेशे चेत् कटकावर्धमानकः ।
अन्योन्यामिमुखं चैनं केचिदाहुर्मनीषिणः ॥ १७३ ॥

असौ शृङ्गारकार्येषु ताम्बूलग्रहणादिषु ।
रुष्टप्राणेश्वरीपादप्रणामेष्वपि चेष्यते ॥ १७४ ॥ (कटकावर्धमानः)

स्यादरालीकृतस्सोऽयं वामपार्श्वगतो यदा ।
उत्तानश्च तदा ज्ञेयः स्वस्तिको मुनिसम्मतः ॥ १७५ ॥

दीर्घवस्तुवनोत्तुङ्गभूविस्तीर्णाम्बुदाव्ययाः[1] ।
विच्युतेन नृणां[3] योज्याः पताकेन तु योषिताम् ॥ १७६ ॥ (स्वस्तिकः)

करयोः करशाखाः स्युरन्योन्यान्तरनिर्गताः ।
यत्रासौ कर्कटो ज्ञेयो जृम्भणे हनुधारणे ।
स्थूलाङ्गे ग्रहणे कंबोः[4] [5]आलस्याच्चाङ्गमोटने ॥ १७७ ॥ [कर्कटः]

अन्योन्यपार्श्वसंश्लेषात् कपोतस्सर्पशीर्षयोः ।
वक्षस्थ[6]श्चावगन्तव्यो गुरुसम्भाषणे तु सः[7] ॥ १७८ ॥

---

1. B. वातक 2. A. B. शेषाद्

* In anger or laughing at, the palms are rubbed; in those cases, there is no rule about the height at which the double Patākā hands should be held.

† The last 'Avyaya' refers to heaven or sky.

3. A.B. नरा. नृणां is supported by योषिताम् later and the difference in prayoga in this case for men and women.

4. A. कंजा 5. A. लीलसा B. लीलासा 6. A.B. स्यै: 7. A.B. सा

विनये प्राङ्मुखः[1] स्त्रीभिः कम्पितो भयशीतयोः ।
कूर्मकं कथयन्त्येन[2]मपरे कूर्मकाकृतिम्[3] ॥ १७९ ॥ (कपोतः)

कूर्पराभ्यन्तरे[4] धृत्वा[5] भुजं वामेन दक्षिणम् ।
[6]अन्यं मुष्टिकृतं वामे कूर्पराभ्यन्तरे[7] न्यसेत् ॥ १८० ॥

यद्येतन्निषधः सोऽयं स्तम्भाश्लेषे भये भवेत् ।
औत्सुक्य[8]सौष्ठवाटोपस्थैर्य[9]गर्वमदादिषु ॥ १८१ ॥

*भट्टाभिनवगुप्तोऽस्य लक्ष्म[10] दूरान्तरं जगौ ।
वेष्टितः[11] स्यात्कपित्थेन मुकुलो निषधस्त्विति[12] ।
†निरुक्ति§विनियोगाभ्यां व्याख्यायां व्यक्तमब्रवीत्[13] ॥ १८२ ॥

अनेन वर्त्मना यातास्त्वन्य[14] तन्त्रविधायिनः$ ।
पूर्वलक्षणमेवास्य मेने कीर्तिधरः पुनः ॥ १८३ ॥ (निषधः)

अरालौ सर्पशीर्षौ वा व्यत्यासाद्[15] भुजयोः[16] स्थितौ ।
प्रकोष्ठस्वस्तिकौ तावदुत्सङ्गः स्यात्[17] स्वसम्मुखौ ॥ १८४ ॥

निष्पीडामर्षरोषेषु परोक्षस्पर्शशीतयोः ।
[18]कण्ठाश्लेषे[19] वरोरूणाम् ईर्ष्यायां[20] कुचगोपने ॥ १८५ ॥ (उत्सङ्गः)

1. A.B. ख 2. A. ख्ये B. त्य 3. A. तिः 4. A.B. कूर्पराण्यन्तके
5. A.B. कृत्वा 6. B. अन्यजुष्टि 7. B. कूर्पन्तरे... 8. A. कयं 9. B. यें

* See Abhinavabhāratī, GOS. II. p. 60, Śl. 147 of N. S. and comments on it. Abhinavagupta read a definition of Niṣadha totally differrent from the one given above and which Jāya reproduces below.

10. A.B. लक्ष्यं 11. A.B. त 12. A.B. स्विति

† Abhinavagupta's etymology of Niṣadha referred to here is "तदभ्यन्तरे निषण्णमास्त इत्यतोऽयं निषधः।" GOS. edn. II. p. 60.

§ Its Viniyogas, not reproduced by Jāya, are :

सङ्ग्रहपरिग्रहौ धारणं च समयश्च सत्यवचनं च ।
संक्षेपः संक्षिप्तं निपीडितेनाभिनेतव्यम् ॥

13. A. व्यक्तमन्त्रवित् B. व्यक्तमन्त्रवीत् 14. A.B. स्वन्य

$ Eg. Someśvara and Śārṅgadeva.

15. A.B. व्यत्यास्याद् 16. A B. यो 17. A.B. डत्सङ्गस्या 18. A. कर्ण
19. A.B. वो 20. A.B. ड्डष्टायां

अंसकूर्परयोर्मध्ये धारयेते परस्परम् ।
भुजङ्गशिरसी[1] यत्र गजदन्तस्स कीर्तितः ।
[2]भारस्तम्भग्रहे[3] चैव शैलाद्युत्पाटने मतः[4] ॥ १८६ ॥ (गजदन्तः)

अधिवक्षोऽञ्चितौ स्यातां शुकतुण्डौ[5] पराङ्मुखौ ।
शनैर्वर्तनयाधस्तात् नीतो यस्मिन्नधोमुखौ ।
सोऽवहित्थो भवेत्कार्श्य[6]श्वासोत्कण्ठादितानवे[7] ॥ १८७ ॥ (अवहित्थः)

[8]आस्कन्धाभ्यामधः स्यातां पताकौ पार्श्वलम्बितौ ।
यस्मिन्नेष भवेद्दोलो विषादे सम्भ्रमे मदे ।
अभिघातामयावेगमूर्च्छाशस्त्र[9]क्षतादिषु ॥ १८८ ॥ (दोलः[10])

मिथः करभयोः* श्लिष्टो भुजङ्गशिरसौ यदा ।
तदा पुष्पपुटः प्रोक्तो याच्ञायां[11] देवतर्पणे ।
पुष्पपानीयधान्यानां भक्ष्याणामपि धारणे ॥ १८९ ॥ (पुष्पपुटः)

[12]पराङ्मुखौ हंसपक्षौ[13] वर्धमानस्य उच्यते ।
द्वारवातायनोद्घाटे स्वस्तिकीभूय विच्युतः ॥ १९० ॥

[14]रिपूरःपाटनाद्येषु नैकट्याद्विच्युतस्समः ।
भुजङ्गशिरसा[15] चैनं कीर्तयन्त्यपरे बुधाः ॥ १९१ ॥ (वर्धमानः)

पताकावुन्नताङ्गुष्ठौ व्यादीर्णाग्रावधःस्थलौ ।
मणिबन्धाग्रविन्यासौ स्यातां चेन्मकरः स्मृतः ॥ १९२ ॥
तरक्षुव्यालसिंहानां नक्राद्यम्बुनिवासिनाम् ।
क्रव्यादानां[16] नदीपूरप्रभृतीनां[17] च दर्शने ॥ १९३ ॥ (मकरः)

---

1. A.B. सि 2. A.B. हार 3. A.B. गृहे 4. A.B. ततः 5. A. शुकतुण्डौ B. शुककण्डौ 6. A. काश्य B. कास्य 7. B. तोनने 8. A.B. अस्कन्दाभ्यासधौ 9. A. B. मूर्छशास्त्र 10. A. दोषलः

* Karabha is the outer edge of the palm.

11. A.B. याज्ञयां 12. A.B. प्राङ्मुखौ 13. A. adds चेत् B. adds द्वे चेत् 14. A. रिपुः B रिपु 15. A. B. से 16. A.B. दीनां 17. B. भूतीन

अभिनेयं जगत्सर्वम्[1] अनन्तोऽभिनयोऽप्ययम् ।
य एव युज्यते हस्तो[2]* [..... ॥
.....] तत्तेषामप्यनन्तता ॥ १९४ ॥

मत्वेति प्रायिकं[3] यद्यद्रूपं तत्तत्[4] जगौ मुनिः ।
अभिनेयपदार्थानामाभिमुख्यस्य सिद्धये ॥ १९५ ॥

अभीष्टानां तु दृष्टार्थं यस्मादेते करास्ततः ।
अन्येऽपि बहवो लोकविदिनास्सन्ति तान्सुधीः ॥ १९६ ॥

देशकालप्रयोगार्थ[5]वेदी[6] नेत्रादिचेष्टितैः† ।
अनुकूलैः प्रयुञ्जीत स्थायिसञ्चारिसूचकैः ॥ १९७ ॥

कापि नाम्नः[7] कचिल्लोकात् कुलचिद्वित्रयोगतः§ ।
लक्ष्यं कचन निश्चेयं[8] संप्रदायवशादिह ॥ १९८ ॥

पताकात्रिपताकाद्या विज्ञेया नामतो बुधैः ।
मुष्टिप्रभृतयो लोकात्, काङ्गूलचतुरादयः ॥ १९९ ॥

---

1. A. B. मादं 2, A. B. हस्तौ

* After this the two mss. indicate no gap, but the meaning of the author requires here something more, between the quarter य एव युज्यते हस्त: and तत्तेषामप्यनन्तता. The second and third quarters of the verse seem to be missing, and तत्तेषां etc. appears to be the last quarter of the verse. The meaning is "the whole universe is to be rendered in gesture ; hence gesture is infinite ; however only the 'hand' that is suitable (is used; even so many are the suitable hands;) hence, the 'hands' are also infinite; therefore the Sage set forth only the more common ones."

3. A.B. प्रायकं 4. B. only one तत् 5. A. B. र्थो 6. A.B. दि

† *Cf.* Bharata IX. 155.

7. A. B. त्म:

§ द्वि-त्र-योगत: means 'by application of two or three principles, Nāman, Loka and Sampradāya.' *Cf.* Saṅgita Ratnākara: VII. 94 and Kallinātha thereon. 8. A.B. निश्चैलम्

द्वियोगात् निषधारालप्रमुखाः सम्प्रदायतः ।
श्रेष्ठमध्यकनीचानां विदधीत प्रयोगवित् ।
क्रमेण फालवक्त्रोरःक्षेत्रसञ्चारिणः करान्[1] ॥ २०० ॥

यथावल्लक्षणोपेताः प्रयोज्याः श्रेष्ठमध्यमैः ।
अधमैर्लौकिका[2] हस्ता अवस्थावशतः पुनः ॥* २०१ ॥

उत्तमैरपि दर्पादिदर्शने नीच[3]पात्रवत्[4] ।
प्राप्य कालं प्रयोगं च नीचैरुत्तममध्यवत् ।
हस्ताः कार्या न वा[5] कार्या मुनेराशयवेदिभिः ॥ २०२ ॥

विकर्षाकर्षणोत्कर्षा निग्रहोऽथ परिग्रहः ।
मोक्षरक्षणविक्षेपा[6] विसर्गश्छेद[7]भेदने ॥ २०३ ॥

संश्लेषाह्वानविश्लेषास्तोदस्ताडन[8]तर्जने ।
धूनानामोटन[9]स्फोटा इत्याख्यातानि विंशतिः ।
कोविदैः करकर्माणि दधत्यन्वर्थसंज्ञताम् ॥ २०४ ॥

॥ इति हस्तकर्माणि ॥

येन क्रियाविशेषेण विशेषोऽ[10]भिनया[11]श्रयः ।
स्वसिद्धावनपेक्षायामङ्गुलीचाल[12]नात्मना ॥ २०५ ॥

क्रियते करणं तस्मात्, तच्चतुर्विधमुच्यते ।
अप[13]वेष्टनमुद्वेष्टो व्यावर्त[14]परिवर्तने ।
हस्तानां करणान्येवं जन्यानि जनकानि च ॥ २०६ ॥

1. A. करात् B. क्षणात् 2. B. लोकिका
* *Cf.* Bharata, N. S. IX. 165 (Kasi edn.).
3. A. न द्व B.-च 4. B. वित् 5. A. नैव 6. A.B. पि 7. B. र्गाच्छेद
8. B. थातन 9. B. दन 10. A. षा 11. B. भिथा 12. A. बा
13. B. प्र 14. A.B. र्त्ति

तर्जन्याद्यङ्गुलीनां तु पूर्वमावेष्टनक्रमात् ।
अन्तः पाणि[1]र्निजात्[2] पार्श्वाद्वक्षोगच्छत्यधस्तलः[3] ॥ २०७

यत्र तत्करणं प्रोक्तं नृत्त[4]ज्ञैरपवेष्टितम् ।
तथैवोद्वेष्टनं तासां कुर्वन्नु[5]त्तानितो बहिः ।
वक्षसः पार्श्वमायाति यस्मिन्नुद्वेष्टितं तु तत् ॥ २०८ ॥

कनिष्ठाद्यङ्गुलीनां चेदन्तरावर्तनं क्रमात् ।
उत्तानितस्य हस्तस्य वक्षःप्राप्तस्य पार्श्वकः ।
व्यावर्तितं तदाख्यातं नृत्तविद्याविशारदैः ॥ २०९ ॥

तथैव बाह्यत[6]स्तासां[7] यत्र स्यात्परिवर्तनम् ।
अधस्तस्य तु हस्तस्य वक्षसा पार्श्वगामिनः ॥ २१० ॥

नृत्तविद्यारहस्यज्ञैः तदुक्तं परिवर्तितम् ।
एतच्चतुष्टयं हस्तं प्रयोज्यं नाट्यनृत्तयोः ॥ २११ ॥

युक्तं[8] भ्रू[9]मुखरागाद्यैः करणं कुर्वतः क्वचित् ।
हस्तस्यानुचरीभूत्वा दृष्टिर्धावति धावतः ॥ २१२ ॥

॥ इति हस्तकरणानि ॥

[हस्तप्रचाराः]

उत्तानोऽधस्थलः[10] तिर्यक् तथो[11]र्ध्वाधोमुखा इति ।
प्रचाराः[12] पञ्च हस्तस्य यथार्था मुनिसम्मताः ॥ २१३ ॥

ऊर्ध्वाधस्तिर्यगग्रस्वसंमुखोपपदास्तलाः ।
स्युः पञ्चोपपदैरेभि[13]रेवं पञ्चमुखा अपि ।
एवं दशविधं चारं करस्याभिदधुः परे ॥ २१४ ॥

---

1. A.B. णि 2. A.B निजाः 3. A. स्थलः B. स्थलात् 4. A.B. तत्तनृत्त 5. A. अकुर्वन्तु B. कुर्वद 6. A. B. त missing. 7. A. प extra. B. च extra. 8.A.B. क्ता 9. B. भू 10. A. B. ले 11. A. B. लो 12. B. प्रचराः 13. A. हि

ऊर्ध्वाधोमुखयोर्लीनौ संमुखाग्रतलावुभौ ।
तलभेदेषु संसृष्टमवशिष्टं मुखत्रयम् ।
इत्याशयपरो भेदान् पञ्चैव मुनिरब्रवीत् ॥ २१५ ॥

ऊर्ध्वगोऽधोगतस्तिर्यग्गतो[1]ऽन्यस्त्वग्रतोगतः ।
संमुखागत इत्यन्ये पञ्चहस्तगतीः[2] जगुः ॥ २१६ ॥

इत्येवं गतिभेदात्तत्पञ्चधा हस्तपञ्चकम् ।
उत्तमैस्सत्त्वभूयस्त्वाद्धस्ताः स्वल्पप्रचारिणः ॥ २१७ ॥

मध्यप्रचारिणः कार्या मध्यमैः[3] मध्यमत्वतः[4] ।
नीचैरत्यन्तविक्षिप्ताः सत्त्वहीनो[5]ऽधमो यतः ॥ २१८ ॥

[बाहुप्रकाराः]

ऊर्ध्वगः पृष्ठगस्तिर्यग्गतः स्वस्तिकमण्डलौ ।
अपविद्धाञ्चितावित्थकुञ्चिताधोमुखा इति ।
आहुर्दशविधं बाहुं[6] नाट्ये नृत्ते च तद्विदः ॥ २१९ ॥

ऊर्ध्वगश्शिरसोऽप्यूर्ध्वं, गच्छन् स्वस्यैव पृष्ठतः ।
पृष्ठगः, पार्श्वगस्तिर्यग् गतो बाहुः[7] परेण चेत् ॥ २२० ॥

स्वस्तिकः स्वस्तिकीभूतो, मण्डलः परितो भ्रमन् ॥
ततो मण्डलवन्निर्यन्[8] अपविद्धस्तु[9] वक्षसः ॥ २२१ ॥

प्राप्योरस्तः[10]शिरःक्षेत्रमुरः प्रत्याहृतोऽञ्चितः[11] ।
[12]स्यादाविद्धोऽन्तरा[13] क्षेपात्, कुञ्चितस्तीक्ष्णकूर्परम् ।
भवेद् द्विगुणतां नीतो[14]ऽधो[15]मुखः [16]क्षितिसंमुखः[17] ॥ २२२ ॥

1. A. दतो 2. A. गति B. गती 3. A. B. मे 4. A. B. मध्य एव तः
5. B. नी 6. A.B. हुः 7. A.B. बहुः 8. A. B. वध्वं तिर्यन्
9. A.B. अविद्धस्त 10. स्तद 11. A.B. हारोञ्चिता 12. B. य
13. A.B. रात् 14. A. द्विगुणितानीतः 15. B. सो 16. A. खी
17. A. खम्

सरलान्दोलितौ[1] नम्रोद्वेष्टितोत्सारिता[2]स्तथा[3] ।
प्रसारित इति प्राहुः बाहुमन्ये तु षड्विधम् ॥ २२३ ॥

प्रसृतः पार्श्वयोरूर्ध्वम्[4] अधो वा सरलः स्मृतः ।
भवेदान्दोलितोऽन्वर्थो नम्रः स्याद्वक्रितो[5] मनाक् ॥ २२४ ॥

[6]भवेदुद्वेष्टितस्तिर्यक् मणिबन्धविवर्तितः[7] ।
स्वस्वपार्श्वान्तरात्पार्श्वं गच्छन्नुत्सारितौ मतः ॥ २२५ ॥

अनुधावन् पुरोदेशं समाख्यातः प्रसारितः[8] ।
[9]स्वोक्तावान्तरभेदत्वादिमान् मुनिरमुञ्चत[10] ॥ २२६ ॥

॥ इति बाहुप्रकरणम् ॥

[11]द्रुतमध्यादिवैचित्र्यात् समस्तव्यस्त[12]योजनात् ।
पर्यायशो हि[13] बाहूनां करणेषु[14] चतुर्ष्वपि ।
[15]वर्तनाः क्रियमाणास्तु सम्भवन्तु परञ्शतम् ॥ २२७ ॥

यच्चत्वारिंशतं केचित् शतं केचिदिमान् जगुः[16] ।
सङ्ख्यायां[17] नियमस्तस्मादिति कर्तुमसांप्रतम् ॥ २२८ ॥

चिन्ताशोक[18]जरारोगशीतप्रालेयवृष्टिभिः ।
[19]तन्द्रामूर्च्छाजुगुप्साभिः[20] पीडितेषु विषादिनि[21] ॥ २२९ ॥

प्लवौदन्वत्तपः[22]स्थेषु ह्रीते[23] ग्लाने नभश्च्युते[24] ।
सङ्ग्रामत्रस्त[25]निश्चेष्टहस्तहीनेषु हर्षिते ॥ २३० ॥

1. A.B. तो 2. B. दिताः 3. A. तदः B. तदा 4. A.B. तोदूर्ध्वम्
5. A. द्धकितः B. द्धता 6. A.B. भवेद्वे 7. A B. नः 8. A.B. ताः
9. सोक्ता 10. B. मुचत 11. A.B. दूतमध्यादि 12. A. स्यस्त 13. A. भि
14. B. षु wanting. 15. A.B. वर्त्मनाः 16. A B. बहुः 17. A. संप्यूया
18. A मेक 19. A.B. तन्मूर्च्छा 20. A B. मुगुप्साभिः 21. A.B. नी
22. A.B. स्थप 23. A. द्दते B. दूते 24. A.B. नभच्यते 25. A. ग्रस्त

स्वप्ने स्वप्नायिते[1] मत्ते प्रमत्तोन्मत्तयोर्जडे ।
नाभिनेयाः[2] करा बाह्यान्[3] द्रव्यादीन्[4] गमयन्ति ये ॥ २३१ ॥

यथा सर्पशिराः सर्पं यथा च मकरो झषम्[5] ॥
सूचयत्यान्तरीं[6] चित्तवृत्तिं सात्त्विकभाववत् ॥ २३२ ॥

यो यो भावः स्वभावत्वात् तेषामभिनयो मतः ।
[7]शुकास्यस्य यथेर्ष्यायां पताकस्य यथा मुदि ॥ २३३ ॥

यथा त्रासे कपोतस्य शोके डोलस्य वा यथा ।
एवं भावविशेषेऽपि कार्यं हस्तानुकूल्यतः ॥ २३४ ॥

[नृत्तहस्ताः]

चतुरश्रत्वमङ्गस्य नृत्ते जीवितमुच्यते ।
तदाकरतया[8] पूर्वं चतुरश्रावुदाहृतौ ।
प्रायेण नृत्तहस्तानां प्रभव[9]त्वाच्च सूरिभिः ॥ २३५ ॥

[10]विम्बसूत्रसमस्कन्धकूर्परौ कटकामुखौ ।
पराङ्मुखौ यदा स्यातामुरसोऽष्टाङ्गुलान्तरौ ॥ २३६ ॥

चतुरश्रौ तदा ज्ञेयौ सौष्ठवेनापि संयुतौ ।
आकर्षणे स्रगादीनां विष्णोरभिनये पुनः ॥ २३७ ॥ (चतुरश्रः)

चतुरश्रौ करौ पूर्वं कृत्वोद्वेष्टितकर्मणा ।
हंसपक्षीकृतौ वक्षः[11]क्षेत्रे वैचित्र्यतस्तयोः ॥ २३८ ॥

एको व्यावर्तनेऽन्यश्च युगपत्परिवर्तने[12] ।
यदोद्वृत्तौ तदा स्यातामूर्ध्ववर्तनया त्विमौ ॥ २३९ ॥

---

1. A. धिते 2. A.B. नेयाः 3. A. B. ह्या 4. A. द्रव्याति B. द्रव्यादि 5. A.B. षः 6. A.B. करिं 7. A.शुकस्यास्य B. शुकस्यास्य 8. A B. कारतया 9. A.B. प्रभाव 10. What the expression बिम्बसूत्र means is not known. 11. A.B. पक्षः 12. A B. ते

तालवृन्तस्य तुल्यत्वात् तालवृन्तापराभिधौ ।
अत एव मता[1]वेतौ तालवृन्तनिरूपणे ॥ २४०. ॥ (उद्वृत्तौ)

चतुरश्रौ करौ हंसपक्षौ कृत्वेव पूर्ववत् ।
अन्योन्याभिमुखौ[2] त्र्यश्रौ[3] समान्तौ स्वस्वपार्श्वगौ[4] ।
कार्यौ तलमुखावेवं ह्रद्य[5]मद्दलवादने[6] ॥ २४१ ॥ (तलमुखौ)

स्वास्तिकौ मणिबन्धान्ते भूत्वेवैतौ स्व[7]लक्षणौ । (स्वस्तिकौ)
स्वस्तिकोऽध[8]स्तथा वाशु विच्युतौ विप्रकीर्णकौ ॥ २४२ ॥ (विप्रकीर्णकौ)

पूर्वेपूर्वोपजीवित्वमेतेषां विद्यते क्रमात् ।
पताकस्वस्तिकौ पूर्वमलपद्मविधानतः ॥ २४३ ॥

व्यावृत्तपरिवृत्तौ च कृत्वोर्ध्वौ पद्मकोशकौ[9]
व्यावृत्तपरिवृत्तौ च ततः कृत्वा तयोः पुनः ॥ २४४ ॥

अरालमेकमन्यं तु विद्ध्यात्कटकामुखम् ।
चतुरश्रेण चेत्स्यातामरालं कटकामुखम् ॥ २४५ ॥

[10]आचार्याः स्वस्तिकेनेति केचित्प्राहुरिमौ पुनः ।
प्रागरालौ परे प्राहुः [11]कटकास्यावतःपरम् ॥ २४६ ॥ (अरालकटकामुखौ)

अंसाभ्यां कूर्पराभ्यां च भुजाभ्यां च क्रमद्यथा ।
कुटिलाभ्यां विलासेन पताकौ[12] वर्तितौ तदा ।
अवाङ्मुखतलौ ज्ञेयौ बुधैराविद्धवक्त्रकौ[13] ॥ २४७ ॥ (आविद्धवक्त्रौ[14])

व्यावृत्तपरिवृत्ताभ्यां[15] प्रथमं चतुरश्रगौ ।
पताकौ भवतः पश्चात् तथा स्तः फणिमस्तकौ । २४८ ॥

1. B. ममा 2. A.B. खो 3. A. त्यश्रो B. त्यश्रो 4. B. श्वगौ 5. B. द्यं
6. A.B. नैः 7. A.B. स 8. A. स्त 9. A.B. शिकौ 10. A.B. आचार्य
11. B. परत्रो 12. B. कटकावस्या 13. A. वक्त्रकौ 14. A. क्त्रौ
15. B. वर्ताभ्याम्

ततस्तथैव सूच्यास्यौ पार्श्वे[1] तिर्यक् प्रसारितौ ।
पर्यायेण च[2] सूच्यास्यौ[3] ज्ञेयौ नृत्तप्रयोक्तृभिः ॥ २४९ ॥ (सूच्यास्यौ)

भ्रमतो रेचितौ सन्तौ हंसपक्षौ द्रुतं यदि ।
प्रसृतोच्चतलत्वेन विख्याताविति[4] रेचितौ ।
उक्तौ नरहरेरेतौ दैत्योरस्तटपाटने ॥ २५० ॥ (रेचितौ)

यद्येको रेचितस्तद्वद् अपरश्चतुरश्रगः ।
पर्यायेण करावेव[5]मर्धरेचितसंज्ञकौ ॥ २५१ ॥ (अर्धरेचितौ)

[6]अंसगण्डकफालानां[7] समक्षेत्रे क्वचित् स्थितौ[8] ।
त्रिपताकौ मनाक् तिर्यगुत्तानौ संमुखौ तथा ।
कूर्परांसं चलत्किञ्चित् स्यातामुत्तानवञ्चितौ ॥ २५२ ॥ (उत्तानवञ्चितौ)

व्यावर्तेत भुजादूर्ध्वं प्रसार्य परिवर्तनात् ।
पताकौ मणिबन्धस्थौ शिथिलौ स्वस्तिकीकृतौ ॥ २५३ ॥

सम्पद्यत यदा विद्धः काथतां पल्लवा तदा ।
केचित्पताकयोः[9] स्थाने त्रिपताकाविहाब्रुवन् ॥ २५४ ॥ (पल्लवौ)

उत्तानितौ मुखार्धेन[10] विचित्तौ स्कन्धदेशतः ।
निष्क्रान्तौ पूर्ववच्चेतौ केशबन्धावुदाहृतौ ॥ २५५ ॥ (केशबन्धौ)

प्रलंबितभुजौ तिर्यक् पताकौ चेत्प्रसारितौ ।
लताख्याविति विज्ञेयौ नृत्ताभिनयगोचरौ ।
नितंबप्रभृतिष्वेषु त्रिपताकौ जगुः परे ॥ २५६ ॥ (लताख्यौ)

लताहस्तो भवेत्पार्श्वात् पार्श्वं दोलावदुन्नतः[11] ।
[12]कर्णेऽन्यस्त्रिपताकश्चेत् करिहस्तं विदुर्बुधाः । २५७ ॥

---

1. B. श्वे 2. A.B. no च 3. A. सौ 4. A.B. विकृतावि 5. A. करा चैव
6. B. अस्त 7. B. पोलानां 8. A. समक्षेत्रेक्वि B. ईनांसक्षेत्रविक्वविद्यथा
9. A.B. Visarga missing. 10. B. श्चेन 11. A.B. रः 12. A. कण्ठे

कटकामुखमत्तान्ये[1] केचित्पूर्वं ललाटकम् ॥ (करिहस्तौ)
त्रिपताकौ कटीमूर्ध्नि दत्ताग्रौ[2] पक्षवञ्चितौ ॥ २५८ ॥ (पक्षवञ्चितौ)

कटीपराङ्मुखाग्रेण[3] पक्षप्रद्योतकाविमौ[4] ।
एतौ शोभावहौ नित्यं पक्षप्रद्योतपूर्वकौ ॥ २५९ ॥ (पक्षप्रद्योतकौ)[5]

तौ पताकीकृतौ सन्तावधस्तल[6]मधोगतौ ।
[7]उत्पतन्तौ च तरसा तार्क्ष्यपक्षावुदाहृतौ ॥ २६० ॥ (तार्क्ष्यपक्षौ)

वक्षःक्षेत्रं श्रयत्येको येन कालेन पार्श्वतः ।
व्यावृत्या हंसपक्षाख्यः तेनैव परकीयतः ॥ २६१ ॥

प्रसारितभुजोऽन्यस्तु[8] तिर्यक् पर्यायशः[9] पुनः ।
एवमङ्गान्तरेणापि क्रिया स्याद्दण्डपक्षयोः ॥ २६२ ॥

उभयोर्यौगपद्येन प्राहुः बाह्वोः प्रसारणम् ।
व्यावृत्तपरिवृत्तं च क्रमेणात्र क्रियाविदः ॥ २६३ ॥ (दण्डपक्षौ)

व्यावृत्त[10]वक्षसौ फाल[11]वर्त्मना[12] पार्श्वमागतौ ।
ततो मण्डलवद् भ्रान्तौ प्रसारितकरौ भुजौ ॥ २६४ ॥

पताकौ चेन्मतावूर्ध्व[13]मण्डलौ नृत्तकोविदैः ।
चक्रवर्तिनिकेत्यन्यत्[14] प्रथितं नाम लोकतः ।
प्राह कीर्तिधराचार्यः करयोरनयोरिति ॥ २६५ ॥ (ऊर्ध्वमण्डलौ)

तौ मिथस्समुखौ पार्श्वविन्यस्तौ पार्श्वमण्डलौ[15] ।
स्कन्धक्षेत्रादधः स्वस्वपार्श्वयोर्भ्रमणं परे ॥ २६६ ॥

---

1. A.B. त्तान्ये 2. न्ताग्रौ 3. A. मुखाग्रे तौ B. मुखग्रेण 4. A.B. धौ 5. A.B. This title is found at the end of the previous line. 6. A.B. स्थल 7. A. B. उत्पन्नौ तरसा [A. तरसाता] तार्क्ष्य... ...पक्षावुदाहृतौ । Restored from context and meaning. 8. A. भुजान्यस्तु B. भुजन्यस्तः 9. A. तः 10. A.B. त्ता 11. हाल 12. B. वर्त्तना 13. A.B. मनादूर्ध्व 14. B. त्य wanting. 15. B. ला

आबिद्धभुजयोरूचुः तयोरन्वर्थवादिनः ।
कक्षवर्तिनिकेत्यन्यदनयोर्नाम कल्पितम् ॥ २६७ ॥ (पार्श्वमण्डलौ)

उद्वेष्टश्चापवेष्टश्च स्यातां चेदेककालतः ।
हस्तयोरुरसः स्थानात् पार्श्वयोर्भ्रान्तयः क्रमात् ॥ २६८ ॥
उरोमण्डलिनौ, अन्ये प्राहुर्वक्षःस्थयोरिति ।
एतद्भेदद्वयं केचिदुरोवर्तनिकां जगुः ।
ऊर्ध्वदिङ्मण्डलेष्वेषु हंसपक्षौ[1] विदुः परे ॥ २६९ ॥ (उरोमण्डलौ)

व्यावर्तितेन हस्तश्चेदलपल्लवशंसिना ।
पार्श्वञ्च वक्षसः प्राप्य प्रसारितभुजो भ्रमन् ॥ २७० ॥

अरालं दधदावेष्ट[2]करणेन श्रयत्युरः ।
तदानीमेव पार्श्वं स्वमतो[3] गच्छति पूर्ववत् ।
मण्डलेन ततोऽप्येवमुरः पार्श्वार्धमण्डलौ ॥ २७१ ॥ [उरःपार्श्वार्धमण्डलौ]

करणेनापवेष्टेन स्यादेकः[4] कुञ्चितो यदा ।
तदान्योऽप्यञ्चितो भूत्वोद्वेष्टितेन मुहुः[5] क्रमात् ॥ २७२ ॥

स्वस्तिकौ कटकास्यौ चेन्मुष्टिकस्वस्तिकौ मतौ ।
यत्परम्परया मुष्टेर्जातौ तौ मुनिना ततः ॥ २७३ ॥

तयोक्तौ[6] मुष्टिशिखरकपित्थकटकेष्वपि ।
स्यातामन्यतमावेतावित्याशयवतामुना[7] ॥ २७४ ॥

एकः स्यात्कुञ्चिता मुष्टिः कटकास्येऽञ्चितः परः ।
इति कीर्तिधरः प्राह मुष्टिकस्वस्तिकौ करौ ।
खड्गवर्तिनिकेत्यन्यन्[8] नामधेयं च कल्पितम् ॥२७५॥ (मुष्टिकस्वस्तिकौ)

---

1. B. क्ष 2. A.B. कावेष्ट 3. A.B. मनो 4. A.B. स्वादेनः 5. A.B. बहुः
6. A.B. क्तो 7. A. तामुनः B. तमुना 8. A.B. न्य missing.

पद्मकोशाभिधौ हस्तौ व्यावर्तादिक्रियाकृतौ ।
[1]आश्लिष्टौ स्वस्तिकक्षेत्रे व्यावृत्तपरिवर्तितौ ॥ २७६ ॥

मिथः पराङ्मुखौ स्यातां नलिनीपद्मकोशकौ ।
मणिबन्धसमाश्लिष्टौ कनिष्ठाङ्गुष्ठसंमुखौ[2] ॥ २७७ ॥

श्लिष्टलक्षणसंयुक्तावेतावन्यै[3]रुदीरितौ[4] ।
एतावन्यतमक्षेत्रे स्कन्धवक्षोजजानुषु[5] ॥ २७८ ॥

प्रोक्तौ विवर्तितौ कैश्चिन्नलिनीपद्मकोशकौ ।
एतौ **कीर्तिधराद्यास्तु** पद्मवर्तनिकां जगुः ॥ २७९ ॥(नलिनीपद्मकोशकौ)

उद्वेष्टितेन निष्पन्नौ स्यातां चेदल[6]पल्लवौ ।
वक्षसः[7] स्कन्धयोरूर्ध्वं प्रसारितभुजाविमौ[8] ॥ २८० ॥

स्कन्धाभिमुखमाविद्धौ चलितौ चाङ्गुलीदलैः ।
अलपद्मोल्बणौ वाहुर्वातवर्तिनिकां परे ॥ २८१ ॥ (अलपद्मोल्बणौ)

एतावेव करावूर्ध्व[9]क्षेत्रगौ ललितौ मतौ ।
कटकास्यौ शिरोदेशलग्नाग्रौ तौ[10] परे जगुः ॥ (ललितौ) ॥
लताख्यौ वलितौ प्रोक्तौ कूर्परस्वस्तिकीकृतौ ॥ २८२ ॥ [वलितौ][11]

॥ इति नृत्तहस्ताः॥

प्रोक्तं हस्तद्वयं कैश्चिदसंयुक्तो निकुञ्चकः ।
युक्तो द्विशिखरो[12], नृत्यहस्तंकौ वरदाभयौ ॥ २८३ ॥

अनामा पार्श्वसंलग्ना चतुरस्य कनीयसी ।
यस्मिन्निकुञ्चको वेदभाषणे स्वल्पदर्शने ॥ २८४ ॥

1. A.B. अ 2. A. खम्, 3. A.B. न्य 4. B. दाहृतौ 5. A.B. जानन:
6. A.B. र्ध 7. A.B. लक्षणं 8. A.B. The name अर्धपल्लवौ marked here additionally. 9. A. वाचलामूर्ध्वं B. दूर्ध्वं 10. A B. भ्रौ त।
11. A.B. Name missing. 12. A.B. रे.

समं[1] शिखरयोर्योगाद् भवेद् द्विशिखराभिधः ।
शापार्थ[2]मङ्गुलीस्फोटे भामिनीकोपकर्मणि ॥ २८५ ॥

अस्य विश्लेषणा[3]दिष्टौ नास्तीत्यभिनये[4] बुधैः ।
पराङ्मुखतलौ भिन्नौ पताकौ कटिपार्श्वगौ ।
अध ऊर्ध्वमुखौ[5] स्यातां क्रमेण वरदाभयौ[6] ॥ २८६ ॥

॥ इति हस्तलक्षणम् ॥

[7]सममुद्वाहिताभुग्ननिर्भुग्नानि प्रकम्पितम् ।
इत्युक्तं पञ्चधा वक्षो[8] लक्षणानि प्रचक्ष्महे[9] ॥ २८७ ॥

चतुरश्रकृतं सर्वैः अङ्गैः सौष्ठवशालिभिः ।
समं सम्मतमेतस्य स्वभावाभिनये[10] भवेत् ॥ २८८ ॥ (समम्)

उत्तुङ्गत्वे तु बिभ्राणमुद्वाहितमुदीरितम् ।
जृम्भायामायताघ्राणे[11] दीर्घोच्छ्वासादिमेषु[12] च ॥ २८९ ॥ (उद्वाहितम्)

[13]अधः पतदिव स्कन्धद्वितयं दधदानतम् ।
मध्ये मध्ये श्लथीभावं भजत् पृष्ठे समुन्नतम् ॥ २९० ॥

आभुग्नं सम्भ्रमे भीतं विषादगदयो[14]श्च्युति ।
मूर्च्छाहृच्छल्यमन्दाक्ष[15]शीतस्पर्शनवृष्टिषु ॥ २९१ ॥ (आभुग्नम्)

[16]निर्भुग्नांसं नमत्पृष्ठं स्तम्भशोभि धृतोन्नति ।
निर्भुग्नं कथ्यते मानग्रहणे सत्य[17]भाषणे ।
विस्मयालोकिते[18] स्तम्भे दर्पोक्ता[19]वहमि[20]त्यदः ॥ २९२ ॥ (निर्भुग्नम्)

1. A. मा 2. A. र्ध B. त्थ 3. B. षा 4. A.B. यो 5. A. अतः ऊर्ध्वालगौ B. अत ऊलगौ 6. A.B. भवेत् 7. A.B. समुद्वा 8. A.B.पक्षौ 9. A. लक्षणं तस्य चक्ष्महे 10.A.B. स्वभावेभिनयो 11. A.B. तो घ्राणो 12. A. सेदिगेषु B. सादिगेषु 13. A.B. अतः पततीव 14. A.B. गतयोः 15. A.B. क्षः 16. A. निर्भ 17. A. त्त्व 18. B. के 19. B. क्तौ 20. A.B. दि

प्रकम्पितं कृतं ज्ञेयमूर्ध्वो[1]त्क्षेपैः[2] निरन्तरैः ।
हसितक्रन्दितत्रासश्रम[3]श्वासामया[4]दिषु ॥ २९३ ॥ (प्रकम्पितम्)

[इति वक्षोलक्षणम्]

उरोलक्ष्माभिधा[5]येति ब्रूमहे पार्श्वलक्षणम् ।
विवर्तितापसृते[6] तद्वत्[7] प्रसारितस[8]मुन्नते ॥ २९४ ॥

नतं चेति मतं पार्श्वकर्म पञ्चविधं बुधैः ।
त्रिकस्य परिवर्तेन परावर्तौ विवर्तनम् ॥ २९५ ॥ (विवर्तितम्[9])

विवर्तितपरित्यागात् निवृत्तेऽपसृतं स्मृतम् । (अपसृतम्)
आयामात् पार्श्वयोः प्रोक्तं प्रकर्षादौ प्रसारितम् ॥ २९६ ॥ (प्रसारित[ब])

कटीपार्श्वभुजस्कन्धे दधत्युन्नति[10]मुन्नतम् ।
अभ्यधायि बुधैरस्य विनियोगोऽपसर्पणे[11] ॥ २९७ ॥ (उन्नतम्)

उन्नतादपरं पार्श्वम् उपसर्पे[12] नतं मतम्[13] । (नतम्)
इत्युक्तं पार्श्वयोर्लक्ष्म विनियोगैस्समन्वितम् ॥ २९८ ॥

[इति पार्श्वलक्षणम्]

वक्षसः[14] पार्श्वयोः पृष्ठ[15]लक्ष्मणोऽन्तर्गते:[16] मुनिः ।
[17]नोवाचेति मयाप्युक्तं[18] न पृथक् पृष्ठलक्षणम् ॥ २९९ ॥

क्षामं खल्वं ततः पूर्णमित्युक्तं जठरं त्रिधा ।
तनु क्षामं स्मृतं हास्य[19]जृम्भानिःश्वासरोदने ॥ ३०० ॥ (क्षामम्)

नतं खल्वं मतं श्रान्ते[20] क्षुधि रोगे तपस्यपि ॥ (खल्वम्)
[21]पूर्णमाध्मातमुच्छ्वासात्यशनस्थूलभोगिषु ॥ ३०१ ॥

॥ इति जठरकर्माणि ॥

1. A. र्धो 2. A. पौ 3. B. भ्रम 4. A. श्वासमया B. श्वासमया 5. B. धे 6. B. प्रसृते 7. A.B. स्तद्वे The pāda is hypermetric by one syllable. 8. A.B. स omitted. 9. B. missing 10. B. ती 11. B. योगप्रसर्पणा 12. A. र्पे 13. A. न तल तम् B. न तन्मतम् 14. A.B. स्थ 15. A.B. पृष्ट absent. 16. A. तर्जते B. तर्जतेः 17. A.B. नें 18. B. मया युक्तम् 19. A.B. स्यं 20. A.B. न्ता 21. A.B. पूर्णमाध्मातनिश्वा

रेचिता कम्पिता छिन्ना[1] निवृत्तोद्वाहिता ततः ।
पञ्चधेति कटिर्नाट्ये नृत्ते च परिकीर्तिता[2] ॥ ३०२ ॥

रेचिता परितो[3] भ्रान्ता भ्रमणेषु विधीयते ।
यातायातैस्तिरश्चीनैर्वेगितैः[4] कम्पिता मता ॥ ३०३ ॥

नीचवामनकुब्जानां गतानुकरणेष्वयम् ।
मध्यस्य वलनाच्छिन्ना[5] श्रमे पृष्ठविलोकिते ॥ ३०४ ॥

पृष्ठतो वलनात्पूर्वकाये सति[6] पराङ्मुखे ।
नरस्याभिमुखी या सा निवृत्तावर्तने[7] मता ॥ ३०५ ॥

समकालं शनैः पार्श्वकट्योरुद्वाहनाद्भवेत् ।
उद्वाहिता पृथु[8]श्रोण्या गमनेऽपि परस्य वा ॥ ३०६ ॥

॥ इति कटिलक्षणम् ॥

कम्पनं वलनं [9]स्तंभ उद्वर्तननिवर्तने ।
इत्यूर्वोः पञ्चधा कर्म विज्ञेयं नटनर्तकैः ॥ ३०७ ॥

पतनोत्पतनैः पार्ष्णेः कम्पनं वेपनं मुहुः ।
स्याद्गतौ कान्दिशीकानां नीचपात्रपरिक्रमे ॥ ३०८ ॥

जानुनोऽभ्यन्तरगतौ वलनं समुदीरितम् ।
[10]स्वेच्छासंक्रमणे[11] स्त्रीणां करणे वलितोरुके[12] ॥ ३०९ ॥

परित्यक्तक्रियं[13] प्रोक्तं स्तम्भनं भीविषादयोः ।
द्रुतः[14] वलिताविद्धो भवेदुद्वर्तनं तदा ॥ ३१० ॥

---

1. A.B. ळिना 2. A.B. तः 3. A.B. ता 4. A. तः 5. B. ळिना
6. A. चेति 7. B. र्तामर्तने 8. B. थक् 9. A.B. स्तंभादु 10. B. स्व
11. A.B. क्रमे 12. A. वलिते रुणे B. वलिते रुणि 13. B. स्त्रियं 14. B. रु

व्यायामे ताण्डवे ; पार्ष्णावभ्यन्तर[1]गते पुनः ।
निवर्तनं समुद्दिष्टं संभ्रमादि[2]परिक्रमे ॥ ३११ ॥

॥ इत्यूरुकर्माणि ॥

उन्नतं विवृतं नम्रम् अर्धकुञ्चितकुञ्चिते ।
संहतं सममित्येवं सप्तधा जानु कथ्यते ॥ ३१२ ॥

शैलाद्यारोहणे नृत्ते चोन्नतं स्तनसंमितम् ।
जानुनोऽ[3]श्लिष्टतो हस्त्यारोहणे विवृतं मतम् ॥ ३१३ ॥

[4]भूमौ चेच्चुम्बनं[5] नम्रं नमस्कृतिनिपातयोः[6] ।
भवेन्नृत्ते नितंबस्य नमनादर्धकुञ्चितम्[7] ॥ ३१४ ॥

[8]ऊरुजंघस्य संश्लेषात् कुञ्चितं मनुजासने ।
संहतं जानुनोः[9] श्लेषात्[10] स्त्रीणामीर्ष्यात्रपादिषु[11] ।
स्वभावस्थं समं स्थाने समपादे प्रयुज्यते ॥ ३१५ ॥

॥ इति सप्त जानुकर्माणि ॥

परिवृत्तं नतं क्षिप्ता[12]वर्तितोद्वाहितान्यथ[13] ।
इति पञ्चविधं कर्म जङ्घायाः कथ्यते स्फुटम् ॥ ३१६ ॥

परिवृत्तं गतं प्रोक्तं पृष्ठतस्ताण्डवादिषु ।
स्थानासनगताद्येषु[14] कुञ्चनात्[15] जानुनोः[16] नतम् ॥ ३१७ ॥

पादविक्षेपणात्क्षिप्तं व्यायामोद्धतनृत्तयोः ।
पर्यायादन्यपार्श्वाभ्यां गच्छतश्चरणौ यदि ॥ ३१८ ॥

---

1. B. रे 2. B. स्तंभादि 3. A.B. No avagraha. 4. A. भ्र B. भ
5. B. बिंन 6. A. त्वन्नसन्निपातयोः B. नसन्निपातिनिवातयोः 7. A. ते
8. A. Gap. Three lines here lost. 9. B. नो 10. B. षां
11. B. त्रिपादिषु 12. A.B. क्षीणा 13. A.B. तोन्यथा 14. A. गताद्यष्ट
15. A. कुंजरं B. कुञ्चुरां 16.A.B. नो

आवर्तितं तदा प्रोक्तं विदूषकगतागते ।
आविद्धगमानादौ[1] स्यादुद्ग्राहितमुदञ्चितम्[2] ॥ ३१९ ॥

भ्रामितं निस्सृतं कम्पः[3] तिरश्चीनं बहिर्गतम्[4] ।
इत्येतदपि जङ्घायाः कर्मोक्तं[5] पञ्चधा परैः ॥ ३२० ॥

भ्रामितं मण्डलभ्रान्त्या वाद्ये[6] डमरुकाभिधे[7] ।
[8]छलभ्रमरिकाद्येषु; निस्सृतं [निर्गतं][9] पुरः[10] ॥ ३२१ ॥

कम्पः[11] स्याद्धूननं त्रासे[12] घर्घरीणां च वादने ।
पार्श्वगामि[13]तिरश्चीन[14]मुक्तं पद्मासनादिषु ।
बहिर्गतं क्षितेः[15] पार्श्व[16]निर्गतं खण्डसूचके ॥ ३२२ ॥

॥ इति जङ्घाकर्माणि ॥

समाग्रतलसञ्चारकुञ्चितोद्धट्टिताञ्चिताः ।
इति पाद[17]भिदाः[18] पञ्च भवेयुर्मुनिसंमताः ॥ ३२३ ॥

समस्थाने स्वभावे च भूमिसंस्थः[19]समो मतः[20] ।
यत्रोत्क्षिप्तो भवेत्पार्ष्णिः अङ्गुष्ठाङ्गुलयोऽञ्चिताः[21] ॥ ३२४ ॥

---

1. B. दू found in addition 2. A. मुञ्चनम् B. मुन्नतम् 3. A. पं B. प 4. A.B. तः 5. B. कमोक्ति 6. A.B. पाद्ये 7. A. समरभिये 8. A. A short gap of 2. or 3 words, probably wrongly, indicated.
9. B. Gap. 'निर्गतं' restored from Someśvara's text, which has these five Janghā-karmans, with the diference that in place of Bhrāmita of Jāya, Someśvara has Parāvṛtta which is adopted by Śārṅgadeva. 10. A.B. परम् 11. A.B. No visarga. 12. A. सा B. स 13. A.B. मी 14. A. नं B. नि
15. A.B. क्षितौ; क्षितेः ablative, makes the meaning clearer; the meaning is 'with a side lifted up from the ground, as in the case of one lame or one with a wound or prick of a sharp object'. 16. A.B. पार्श्वे 17. B. दा 18. A.B. धाः 19. B. साः 20. A. ताः 21. A. यो खुताः यो शिताः

[1]स्यादग्रतलसञ्चारी[2] सविक्षेपे निकुट्टने[3] ।
.....[ग्रन्थपातः].....
अतिक्रान्तक्रमोदारगत्युद्वर्तित[4]वर्तिते ॥ ३२५ ॥

स्थित्वा यत्र तलाग्रेण पार्ष्णितो घट्यते क्षितिः ।
उद्घट्टितस्तदाख्येषु करणेषु स कीर्तितः ॥ ३२६ ॥

प्रयोगानुकृतौ चारी[5] प्रसारे चा[6]सकृत्सकृत् ।
ऊर्ध्वमग्र[7]तलं भूमौ पार्ष्णिरङ्गुल्योऽञ्चिताः ॥ ३२७ ॥

यस्मिन् पादेऽञ्चितः स स्यात् पदाग्रक्षतचङ्क्रमे[8]।
वर्तितोद्वर्तिते पादाहतौ भ्रमरकेऽपि च ॥ ३२८ ॥

ताडितो [9]घट्टितोत्सेधो घट्टितो मर्दितोऽग्रगः[10] ।
पार्ष्णिगः[11] पार्श्वगः सूचीसंज्ञकोऽङ्गुलिपृष्ठगः ॥ ३२९ ॥

तलाहतिरिति[12] प्राहुरस्य भेदान् परे[13] दश[14] ।
पार्ष्णिना भुवमालम्ब्य तलस्याग्रेण ताडयन्[15] ॥ ३३० ॥

ताडितः कोपगर्वादौ घर्घराणां च वादने ।
पार्ष्णिना ताडयन्नग्रतलेनापि मुहुर्मुहुः ॥ ३३१ ॥

---

1. A. स्वादभ्रमल 2. A. रि
3. There is an unindicated gap here, probably of two or three lines, in which are lost the further usages of Agratalasañcāri, Todana, Sthita, Piḍana, Bhūmitāḍana, Bhramaṇa and various Recaka movements (*see* N.S. IX. 274,GOS.), as also the definition of "Kuñcita":

उत्क्षिप्ता यस्य पार्ष्णिः स्याद् अङ्गुल्यः कुञ्चितास्तथा ।
तथा कुञ्चितमध्यश्च स पादः कुञ्चितः स्मृतः ॥ (N.S. IX.27, GOS).

4. B. गुप्तवर्तित 5. A. रि 6. A.B. च 7. A. भ्र 8. A.B. चक्रमे
9. A.B. घटि 10. A.B. हः 11. A.B. पार्श्वगः 12. A.B. दिति
13. A. रमेदनापमे B. मेदनापमे 14. A.B. शा 15. A.B. त्

[1]घट्टितोत्सेध[2]संज्ञः[3] स्याद् वर्घरीवादनादिषु[4] ।
घट्टितः पार्ष्णिना विघ्नन् करभाश्वादिनोदने[5] ॥ ३३२ ॥

[6]घृष्यत्तिर्यक् तलेनोर्वीं मर्दितः किङ्किणीविधौ[7] ।
पुरतः स्खलितः शीघ्रमग्रगः पथि पिच्छिले[8] ॥ ३३३ ॥

[9]पृष्ठतः पार्ष्णिना गच्छत् पार्ष्णिगः [कोकणावधौ ।
तिष्ठन् पार्श्वेन[10] गच्छन् वा पार्श्वगः कण्टकोद्धृतौ[11] ॥ ३३४ ॥

आसने च भवेन्नृत्ते[12] सस्फुरो बहुभंगिभिः* ।
पार्ष्णिमुत्क्षिप्य यो भूमौ[13] अङ्गुष्ठाग्रेण तिष्ठति ॥ ३३५ ॥

1. B. घटि 2. B. द 3. B. ज्ञ 4. A. reads here, alone, the name घट्टितः somewhat wrongly.
5. A. करपार्श्वौ दिनेदने B. करपार्श्वादिनोदने. Reconstructed on the basis of meaning. The application of the hind-foot as goad to the animals one is riding is clear ; Someśvara who gives these varieties of foot has here अश्वादिप्रेरणे। 6. B. धु
7. The usages of Mardita are not given by Śārṅgadeva ; Someśvara gives them, but all those mentioned by him apply to Nṛtya, except one Apasarpaṇa, i.e., moving without the sole giving up the contact of the floor, which refers to Nṛtta ; the sole usage of Mardita mentioned by Jāya, viz , किङ्किणीविधि, seems to refer to the same Apasaraṇa-movements of Nṛtta, those in which the sole is moved close on the floor, called so probably, because the tinkling of the bells alone indicate the Tāla and Laya in this. *Cf.* Bālarāmabharata, TSS., p. 106. See also below usage of Pārṣṇiga.
8. A. विच्छले B. विचिछले 9. B. first word missing. 10. B. नि 11. B. के धृतौ 12. A.B. त्ये
* This line is almost identical with what is found in the corresponding context in Someśvara. (p. 178 of my collated Transcript). 13. A. भूयोदो

स सूचीति मतो नृत्ये विलासाव[1]स्थितावपि ।
[$]तिष्ठन् सर्वाङ्गुलीपृष्ठैः अङ्गुलीपृष्ठगो भवेत् ॥ ३३६ ॥

स्फुरितायां तथा स्थाने बुधैर्नृत्ये विधीयते ।
सशब्दं ताडनं भूमेः[2] तलेन स्यात्तलाहतिः[3] ।
ताण्डवे धावने कोपे घर्घरीणां च वादने ॥ ३३७ ॥

॥ [इति] पादलक्षणम् ॥

ब्रूमः [4]पादाङ्गुलीलक्ष्म पादलक्ष्मप्रसंगतः ।
उत्क्षिप्ताः कुञ्चिताः[5] स्तब्धाः अव[6]क्षिप्ताः[7] स्वभावजाः ॥ ३३८ ॥

अनङ्गुष्ठयुता[8]ङ्गुष्ठसंयुक्ताश्चेति सप्तधा ।
उत्क्षिप्ता मुहुरुन्नीतास्त्रपायां मुग्ध[9]योषितः ॥ ३३९ ॥ (उत्क्षिप्ताः)

यदा सङ्कोचरूपेण नामिताः कुञ्चितास्तदा ।
मूर्च्छितस्रस्तशीतार्तग्रहाविष्टेषु कीर्तिताः ॥ ३४० ॥(कुञ्चिताः)

काष्ठवन्निश्चलाः[10] स्तब्धाः मृतौ[11] स्तम्भेऽङ्गमोटने[12] । (स्तब्धाः)*
अवक्षिप्ताः[13] समाख्याता अधोनीताः पुनःपुनः ॥ ३४१ ॥

पृष्ठतस्सरणे स्त्रीणां बिब्बोके[14] किलकिञ्चिते ॥ (अवक्षिप्ताः)
प्रकृत्यैव स्थिता भूमौ प्रकृतौ स्युः स्वभावजाः ॥ ३४२ ॥ (स्वभावजाः)†

1. A.B. सा missing

$ The Aṅgulipṛṣṭhaga and Talāhati are not given by Someśvara or Śāṛṅgadeva.

2. B. मैः 3. A. हति B. इति 4. B. प 5. B. त 6. A. B. ल
7. A.B. visarga missing. 8. A. यता B. वता
9. B. मट, evidently the Dravidian equivalent for Mugdha.
10. A.B. No visarga. 11. A.B. मतौ 12. A.B. मोदने.

* Someśvara calls theso 'प्रसारिताः'; so also Śāṛṅgadeva.

13. B. क्षा 14. A.B. को

† 'निजाः' in Someśvara.

अनङ्गुष्ठयुताः[1] प्रोक्तास्त्यक्ताङ्गुष्ठा मिथः श्रिताः ।
पादत्रारोहणे पूगदण्डादि[2]ग्रहणे क्षितेः[3] ॥ ३४२ ॥ (अनङ्गुष्ठयुताः)

[4]अङ्गुष्ठसंयुताः प्रोक्ताः सहा[5]ङ्गुष्ठा मिथः[6] श्रिताः ।
अङ्घ्रेः[7] स्तंबेरमस्येव[8] रज्जुगर्भप्रवेशने ।
आमुक्तौ नूपुरादीनां दूरस्थाकर्षणे[9]ऽपि च ॥ ३४३ ॥ (अङ्गुष्ठसंयुताः)

अङ्गुष्ठस्सर्वसंयोगाद् अङ्गुलीत्वं[10] क्वचिद्व्रजेत्[11] । §
उत्क्षिप्तो[12]ऽवनतोऽङ्गुष्ठस्सहजश्चेति स त्रिधा ॥ ३४४ ॥

उन्मुखीकृतमुत्क्षिप्तः[13] प्राङ्नखमुखादिषु । (उत्क्षिप्तः[14])
नागिनोऽवनतोऽधस्तात् क्रिया भूम्यादि[15]लेखने । (अवनतम्)
सहजस्तु[16] स्वभावस्थः प्रन्थितौ परिकीर्तितः ॥ ३४५ ॥ (सहजः[17])

॥ इति पदाङ्गुलीनां लक्षणम् ॥

अङ्गानां लक्षणं सर्वं विनियोगसमन्वितम् ।
प्रोक्तं जायन्नमूपेन मुनेरागमवेदिना ॥ ३४६ ॥

इति श्रीमन्महाराजाधिराज-गणपतिदेव-गजसाधनिक-
जायसेनापति-विरचितायां शुक्रनीतावल्यां
अङ्गनिरूपणनाम द्वितीयोऽध्यायः ॥

---

1. A.B. यता 2. B. गण्डादि 3. A त B. तौ 4. A. अनङ्गु 5. A.B. भा 6. AB. तः 7. A B. No visarga. 8. A.B स्तंभेरमस्यैव 9. A. णो 10. A.B. ल्वं 11. A.B. येत्

§ The meaning is : The toe, when taken together with the other fingers in contact, partakes of the character of the 'fingers' of the foot and as such, the Aṅguli-varieties given above will then apply to the toe also; but, when it is separate, it has three special varieties set forth in the next line.

12. A. क्षा 13. A.B. क्षं 14. A.B. क्षाः 15. B. भूत्यादि 16. A. जं तु 17. B. संहतः

[अथ तृतीयोऽध्यायः]

लीलोल्लसच्चाषगतिप्रबन्धमृगीप्लुतो[1]द्यद्भ्रमरीमनोज्ञाम्[2] ।
[3]सस्यन्दिताब्जां जनितोरुशोभां वक्ष्यामि चारीं वनराजितुल्याम् ॥ १ ॥

भवेद्दौणादिकत्वादिञ्[4] चरेः करणभावयोः ।
कृदिकारात्कृते ङीषि[5] सिद्धं चारीत्यतः[6] पदम् ॥ २ ॥*

चार्यः[7] कट्यादिपादान्तचेष्टयैव[8] भवन्ति यत् ।
विनियोगः [9]पृथक् तासां न प्रत्येकं भवेत्ततः ॥ ३ ॥

ध्रुवं पादस्य यत्कर्म तज्जङ्घोरुकृतं यतः ।
पादजङ्घोरुकरणं ततः कुर्युर्ध्रुवं समम्[10] ॥ ४ ॥

[11].....चरणावू[12]रुजङ्घे यतस्ततः ।
तुल्यत्वकरणादेषां पादचारी[13] प्रशस्यते ॥ ५ ॥

पादस्यैकस्य यश्चारः स चारीति निगद्यते ।
करणं पादयोश्चारः, खण्डस्तु करणैस्त्रिभिः ॥ ६ ॥

खण्डैस्त्रिभिश्चतुर्भिर्वा मण्डलं मिलितैर्मतम् ।
गतौ युद्धे नियुद्धे च चक्रशक्त्यादिमोचने ॥ ७ ॥

1. A. तौ B. षो 2. A.B. ज्ञा
3. A. सस्यंजिताब्जां B. सस्यन्दिताभ्यां. Syandita is evidently used here in the Śleṣa as meaning a stream, Syandanika.
4. A.B. दीन् 5. B. corrupt. 6. B. चरि यतः
* This is based on Abhinavabhārati on N.Ś. X. 1. (GOS. Vol. II p. 93, lines 4-5.) *Cf.* Sangitaratnākara VII. 904 and Kallinātha thereon.
7. A.B. र्य 8. B. न्तोद्वेषयैव 9. B. प्र 10 A.B. ध्रुवैस्समम् 11. In both A.B. the line begins रणा without indication of any gap; the gap is however indicated after यतस्ततः..... ।
12. A.B. मू 13. A.B: चाग्नि

नृत्ते नाट्ये[1] च चारीभि:[2] विना किंचित् [न वर्तते][3] ।
समपादा[4] स्थितावर्ता जनिता स्यन्दिता मता ॥ ८ ॥

तथावस्यन्दिता बद्धा[5] शकटास्याथ विच्यवा ।
एलकाक्रीडिता चाषगतिरु[6]त्स्यन्दिताङ्किता[7] ॥ ९ ॥

[8]समोसारितमत्तल्ली मत्तल्यध्यर्द्धिका[9] तत:[10] ।
ऊरूद्वृत्तेति [11] भूचार्य:[12] षोडशैता: प्रकीर्तिता: ॥ १० ॥

अतिपार्श्वापपूर्वा:[13] स्यु: [14]क्रान्तास्सूचीमृगप्लुता: ।
भुजङ्गत्रासितालाता[15]विद्धा नूपुरपादिका ॥ ११ ॥

आक्षिप्ता भ्रमरी दण्डा विद्युद्भ्रांताभिधा तत: ।
ऊर्ध्वजानुरथो[16]द्वृत्ता दोलापादेति षोडश ॥ १२ ॥

आकाशिक्य:[17] स्मृताश्चार्या:[18] प्राक्तनै: [19]भरतादिभि: ।
भूम्याकाशचरत्वेन प्रायशस्तास्तदाह्वया: ॥ १३ ॥

स्थित्वैव[20] समपादेन भौमी[21]माकाशिकी[22]मपि ।
यत: कुर्यात्ततश्चारी[23] समपादा निगद्यते ॥ १४ ॥

श्लिष्ट: पार्ष्णिनखं [यस्मात्][24] तिष्ठन्त्येकैकशो व्रजेत् ।
समं पाददृयं तस्मात्[25] समपादेति संस्मृता ॥ १५ ॥

---

1. B. नटे 2. B. रिभि: 3. A.B. Gap. For the restoration, see N.S. X, 6, GOS. edn. II. p. 95. 4. A. ता B. त 5. A. वर्द्धा B. बद्ध 6. B. मृ 7. A.B. स्थिता 8. A.B. समोसरि 9. A. द्यद्धिता B. ध्यधिता 10. A.B. नत: 11. A. ऊरूवृत्तेति B. ऊरुवृत्ते तु 12. A.B. र्या 13. A. पपर्वा B. पूर्वा 14. A.B. का 15. A.B. लताल and then gap upto रपाटि(दि)का 16. A. यो B. धे 17. A.B. क्य 18. A.B. चर्य 19. B. मारता 20. A. स्थित्वेव B. सत्वेव 21. A.B. मि 22. A. शकी 23. A.B. श्चारी missing. 24. A.B. The line is wanting in two syllables and a word like this. 25. A. स्यामत् B. स्यात्तत्

मुनेराशयमज्ञात्वा कैश्चित् शास्त्रविधायिभिः ।
समपादयुगस्थानमात्रेणैषा[1] प्रकीर्तिता[2] ॥ १६ ॥

यद्येवं करणं न स्याद् [3]मि[त्रं समनखाभिधम्]* ।
अस्याश्चलनशील[4]त्वात् पादैरित्यब्रवीन्मुनिः ॥ १७ ॥ (समपादा)

पादस्याग्रतलेनोर्वीं घर्षन्पार्श्वेऽन्यतः क्षिपेत्[5] ।
जानुभ्यां स्वस्तिकं यावत् कुर्यादन्तरमण्डलम् ॥ १८ ॥

तदन्यमुत्क्षिपन् स्वस्य पार्श्व एव निवेशयेत् ।
[6]स्थिनावर्ता भवेत् [चारी][7] स्थित्वा स्थित्वा प्रवर्तनात् ॥ १९ ॥

अनुक्तास्तु[8] बुधैरेव ज्ञेयाश्चार्यो[9]निरुक्तयः[10] । (स्थिनावर्ता)
वक्षोजप्रणयी मुष्टिरन्योऽप्यायर्तितः करः[11] ॥ २० ॥

यस्यां सा जनिता ज्ञेया पादस्तु तलसञ्चरः ।
एतां[12] देशीविदः केचिद् ऊचुर्मुसलघाटिकाम्[13] ॥ २१ ॥ (जनिता[14])

---

1. B. ष 2. B त: 3. A.B. भिन्ना and then gap.

* The restoration here is based on the sense of the passages; Jaya takes Samapāda cari to be a real Carī involving movement according to its name and not a cārī by courtesy as all writers including Abhinavagupta (p. 97 GOS. II) and Śārṅgadeva (p 757, S. R. II, Anandasrama edn.) have taken it; more of this will be dealt with in the Introdution; suffice it to point out here that, what Jaya means in this verse is that Carī involves movement, and says that Bharata too intends so by using the plural 'pādaiḥ'; otherwise, if it is a mere pose, we cannot have, as distinct from this, the Karaṇa called *Samanakha*. For Samanakha, see below and N.Ś. IV. 65 (GOS. I).

4. A.B. शीत 5. A. क्षिपत् B. After this a short gap wrongly shown. 6. B. सि 7. A.B. The line wants two syllables and the Mss. indicate a short gap in between the two स्थित्वा s. 8. A. नु 9. A ज्ञेयाश्चानि B. ज्ञेया चारि 10. B. नियुक्तयः 11. A.B. अन्योन्यावर्जिताः कराः 12. A.B. ता 13. B. का 14. A.B. जनी

[1]निषण्णोरुः[2] समो[3] वामः[4] तिर्यगन्यः प्रसारितः ।
पञ्चतालान्तरं यस्यां स्यन्दितेयं[5] निगद्यते ।
तालस्तत्तत्करा[6]ङ्घ्रिमध्ययोस्ततयोर्मितिः[7] ॥ २२ ॥ (स्यन्दिता)

स्यादवस्यन्दिता तद्वद् अस्या एव विपर्ययात् ।
यद्यपि स्फुटमालीढप्रत्यालीढसमे[8] इमे ।
[9][तयोरचल्योर्भिन्ने] तथाप्येते यतश्चले ॥ २३ ॥ (अवस्यन्दिता)

भवेत्स्वस्तिकरूपेण संवेधो जङ्घयोर्मिथः ।
ततो वलनमूरुभ्यां यस्यां बद्धेति सा स्मृता[10] ॥ २४ ॥

अस्यां स्वस्तिकविश्लेषं यावत्पादतलाग्रयोः ।
मण्डलभ्रमणात्स्वस्वपार्श्वयोर्गि[मनं ....][11] ।
[12]इत्यूर्वोर्वेलनं युक्तं केचिद् ऊचुर्विपश्चितः ॥ २५ ॥ (बद्धा)[13]

उद्ग्राहितमुरःपूर्वनिषण्णाङ्घ्रिः स्वपार्श्वतः[14] ।
तिर्यक् प्रसारयेदेकं चरणं तलसंचरम् ।
स्थितेऽन्यस्मिन् समे पादे [15]शकटास्यामिधीयते ॥ २६ ॥

1. A B. वि 2. A.B. रु 3. A.B. मे 4. A.B. मे 5.A.B. यन्नि 6. B. कुरा 7. A.B. मतम् 8. A.B. मा
9. A.B. लानुन्न..... तथा. Restored tentatively on the basis of sense. the Cāris Syanditā and Avasyanditā involve the same poses as the Sthānakas Ālidha and Pratyālidha, but the two are different, the former having a movement, and the latter being static.
10. A.B. निसामृता 11. A.B. योग .. gap. Jāya's verse here giving the alternate definition of Baddhā being only a metrical recast of Abhinavagupta's words पार्श्वयोग can be restored as पार्श्वयोर्गमनं, but still two syllables, not however essential for sense, are wanted for the foot.
12. इत्यूर्ववेलनं B. इत्यूचुः.....मलन 13. A.B. यंध...
14. A.B. जः 15. A.B. शकटस्य

एतया शकटं क्षेप्यमिति प्राप्ता यथार्थता[1] ।
[2]....कल्प्यते कैश्चिद् अयं पादस्य रेचनात् ॥ २७ ॥ (शकटास्या)

क्रमात्पादतलाग्राभ्यां महीतल[3]निकुट्टनैः ।
विच्युते:[4] समपादायां विच्यवेत्यभिधीयते ॥ २८ ॥ (विच्यवा)

तलसञ्चरयो[5]र्यस्यां पादयोः क्रमशो[6] भवेत् ।
उत्प्लुत्य पतनं[7] सेय[8]मेलका[9]क्रीडिता.... ॥ २९ ॥ (एल[10]काक्रीडिता)

पुरः प्रसारितस्सव्यं तालमात्रं ततः पुनः ।
द्वितालं किञ्चिदुत्प्लुत्य वामेन[11] सह पृष्ठतः ।
श्लिष्टः[12] स्यादेवमभ्यासी[13] पादश्चाषगतिर्भवेत्[14] ॥ ३० ॥ (चाषगतिः)

कनिष्ठाङ्गुष्ठभागाभ्यां बाह्याभ्यन्तरतः क्रमात् ।
पादस्सर्पन् शनैः[15] र्य[16][त्र कुरुते च ग]तागतम्[17] ॥ ३१ ॥

रेचकस्यानुसारेण सेय[18]मुत्स्यन्दिता मता ।
रेचितः कैश्चिदत्रोक्तो[19] नृत्तहस्तो[20] विचक्षणैः ॥ ३२ ॥ (उत्स्यन्दिता)

1. A.B. ताम्
2. A.B. gap ....त्यते. The three initial syllables cannot be guessed. the sense is complete even otherwise; see Abhinavagupta on this alternate lakṣaṇa of Śakaṭāsyā, GOS. II; p. 97, lines 10-11.
3. B. टे 4. A. विचितिः 5. A.B. रंचारधा 6. A.B. क्रमणे which does not fit in here. 7. A. पदनं 8. B. सेध
9. A.B. Gap. क्रीडिता is restored; two more syllables are wanting; no essential word is however lost there.
10. A.B: ल missing. 11. A.B. वादने 12. A.B. Visarga wanting.
13. A. मभ्यासि B. मस्यापि 14. A.B. गतो भवेत् 15. A.B: शशनैः
16. A.B.Gap. 17. A.B. तागतिः 18. A.B. येस 19. B. तो
20. A.B. स्त

समस्थितस्य पादस्य द्वितीयस्तलसंचरः ।
अग्रे पृष्ठे[1] च सुश्लिष्टः क्रमात् सा चाङ्किता मता[2] ।
अग्रथेति प्रसिद्धेति गुरुः कीर्तिधरोऽब्रवीत् ॥ ३३ ॥ (अङ्किता)

[3]तलसञ्चरमेकेन[4] घूर्ण[5]मानेन कुर्वता ।
अन्येन स्वस्तिकं यस्यां पर्यायेणोपसर्प्यते ॥ ३४ ॥

[6]समोसरितमत्तल्ली[7] मतेयं[8] मध्यमे मदे ।
अन्ये तु स्वस्तिकं हित्वा युगपद्घूर्ण[9]मानयोः ॥ ३५ ॥

पादयोर्वलना[10]दस्यां[11] कथयन्त्युप[12]सर्पणम्[13] ।
मत्तपादेति लोकेऽस्याः[14] प्रसिद्धमभिधान्तरम् ॥ (समोसरितमत्तल्ली)[15]

जङ्घास्वस्तिकयोगेन लग्नाखिल[16]तलौ भुवि ।
[17]घूर्णमानौ मुहुः किञ्चित् व्याश्रिता[18]वुपसर्पतः[19]॥ ३७ ॥

पादौ हस्तौ तथो[20]द्वेष्टैरपवेष्टैश्च संयुतौ ।
भवेतां यत्र मत्तल्ली नाम्नाहुस्तरुणे[21] मदे ।
अपसर्पण[22]मित्येके स्खलत्पादाभिधां परे ॥ ३८ ॥ (मत्तल्ली)

1. A.B. पूर्वं which is not applicable here. *Cf.* also N.S. X. 23 and Abhinavabhāratī, GOS. II. p. 99.
2. A. reads the title Addita here. 3. B. त missing 4. A. मानेन B. सानेन 5. A. पूर्ण B. पूर्वी 6. A. तमो 7. A.B. मुत्तल्लि 8. A.B. मतेयन् 9. A. त्पूर्ण B. त्पूर्णि 10. B. वलिना 11. A. दस्मा B. दस्मात् 12. A B कथमित्युप 13. A.B. Gap...रम् 14. लोकर्या B. लोके तु 15. A.B. This title is taken as first pāda of the next line and a half-line gap is then indicated. 16. A. लिव B. लिल 17. A. पूर्ण B. पूर्णि 18. A. त्यश्रिता B. यश्रिता 19. A. धापरेः B. धापरे. After this the title मत्तल्ली is wrongly found.
20. A.B. तो 21. A.B. तारुणे 22. B. र्प missing.

सव्यस्य पृष्ठदेशे स्याद् वा[1]म[..... ।

.....[अत्र ग्रन्थपातः].....

.....नृत्तज्ञैरूरूद्वृत्तपदेरिता[2] ॥ ३९ ॥ (ऊरूद्वृत्ता)

प्रसार्य पुरतः किञ्चित् पात्रप्रकृति[3]भेदतः ।
यत्रोत्क्षिप्तं [4][चतुस्तालाद्यन्तरं..... ।
अग्रेण पातयेद् भूमा]वतिक्रान्तेति तां विदुः ॥ ४० ॥

अनुक्त[5]त्वाद्विशेषस्य मुनिना तस्य चित्तवित्* ।
पादस्य पार्श्व एवेति न्यायात् कीर्तिधरोऽब्रवीत् ॥ ४१ ॥(अतिक्रान्ता)[6]

[7]कुञ्चितं चरणं तिर्यग् गत्वा पार्श्वे समुत्थितम्[8] ।
यदा चोद्घाटितं[9] न्यस्येत् [पार्श्वाद्ये][10]यमिति श्रुता ॥ ४२ ॥

1. B. Gap in which definitions of Adhyardhikā and Ūrūdvṛttā are lost. A. सव्यस्य प्रपदेशे स्याद्वा, the beginning of the Adhyardhikā definition and then without indication of the gap, the concluding part of the Ūrūdvṛttā definition. For the sake of reference, Bharata's definitions of Adhyardhikā and Ūrūdvṛttā are given here (N. S. X. 17 and 22, GOS. pp. 97, 99):

सव्यस्य पृष्ठतो वामश्चरणस्तु यदा भवेत् ।
तस्यापसर्पणं चैव ज्ञेया साध्यर्धिका बुधैः ॥

तलसञ्चारपादस्य पार्ष्णिर्बाह्योन्मुखी यदा ।
जङ्घ ञ्चिता तथोद्वृत्ता ऊरूद्वृत्तेति सा स्मृता ॥

2. B. Gap. A. has the words वेत्तज्ञैः उकद्वृत्तपदेरिता 3. B. त
4. A.B. Gap. Words in square brackets restored on the basis of Abhinavabhāratī whose words are closely followed by Jāya. *Cf.* also Saṅgita Ratnākara, VII. 951-2. 5. A.B. कृ

* तस्य चित्तवित्—मुनेः आशयज्ञः— Kirtidhara who understood Bharata's intention.

6. This name has strayed to a line below. 7. B. अंचितं 8. A. तः 9. A. द्धटितं 10. Gap. पार्श्वेद्या means पार्श्वापूर्वा अतिक्रान्ता; see enumeration above. Restoration necessitated by what is left in the mss.,—इयमिति श्रुता ।

[1]ऊरक्षेत्रे द्वितीयस्य यावदुत्क्षिप्य पातयेत् ।
पादमुद्[घाटिते]नास्य[2] लक्ष्म[3] कीर्तिधरोऽभ्यधात् ।
[4]तत्राब्रवीत् पार्ष्णिचण्डघातेति किल लोकतः ॥ ४३ ॥ (पार्श्वक्रान्ता)[5]

बद्धां चारीं [6][विधायादौ] पादमुद्धृत्य कुञ्चितम्[7] ।
स्वपार्श्वे[8] निक्षिपेत् यस्यामपक्रान्तेति सा स्मृता ॥ ४४ ॥ (अपक्रान्ता)

उत्क्षिप्य पादं तत्.....पार्श्वतो[9] न्यसेत् ।
इति कीर्तिधरस्त्वाह[10] विक्षेप[11]वलनाभिधाम् ॥ ४५ ॥ (अपक्रान्ता)[12]

पादं कुञ्चितमुत्क्षिप्य पुरो जङ्घां प्रसारिताम् ।
जान्वन्तामथवोर्वन्ताम्[13] अग्रयोगेन पातयेत्[14] ॥ ४६ ॥ [सूची]

अतिक्रान्तोदितं[15] पादमुत्क्षिप्योत्प्लुत्य[16] पातयन् ।
पृष्ठदेशे परां जङ्घामञ्चिताङ्घ्रि समुत्क्षिपेत् ।
यस्यामेवं भवेत्सेयं[17] वृद्धैर्ज्ञेया मृगप्लुता ॥ ४७ ॥ [मृगप्लुता]

उत्क्षिप्य कु[18]ञ्चितं पादं स्वपार्श्वगत[19]जानुकम् ।
त्र्यश्रमे[20] वोरुमूलस्य समक्षेत्रे विवर्तयेत् ॥ ४८ ॥

यस्यामेषा समाख्याता भुजङ्गत्रासिता मता ।
पादोपान्त[21]भुजङ्गार्थ[22]त्रासनिष्पा[23]दिता यतः ॥ ४९ ॥ (भुजङ्गत्रासिता)

---

1. B. Absent. 2. A. Gap. पादमुत...कस्य 3. नाम which cannot fit in the context, see next line. 4. B. line has strayed above, as it refers to Atikrāntā. 5. A.B. Name found at the end of previous verse. 6. A B. Gap. 7. B. ता 8. B. र्ध्व
9. B. पान्यतो 10. B. स्सत्वा 11. A.B. सविक्षेप 12. The name found at the end of the previous verse.
13. A.B. थ चेदर्वाक्नाग्र 14. B. सातयेत् 15. A.B. पितं 16. A.B. प्येल्पत्य 17. B. सैयं 18. A B. Gap between कु and पार्श्वे. Restored on the basis of the Abhinavabhārati which is very closely followed (GOS. II p. 105).
19. B. र्ध्वत 20. B. मो 21. A.B. पात 22. A. सा 23. B. ष्या

पृष्ठप्रसारितं पादं[1] वलनाभ्यन्तरीकृतम् ।
तलस्य संमुखान्योरुं[2] स्वपार्श्वे पार्ष्णिना क्षिपेत् ।
यस्यां सेयमलातेति कीर्तिता नृत्तकोविदैः ॥ ५० ॥ (अलाता)

पादो विश्लिष्टजङ्घस्य स्वस्तिकस्येव कुंचितः[3] ।
अग्रे[4] प्रसारितो यत्र विद्धः पार्श्वे निजे पुनः ॥ ५१ ॥

अन्यपार्ष्णि निजे क्षेत्रे पार्ष्णिना पातितौ[5] भवेत् ।
अविद्धा सा भवेत्केचिदाक्षिप्ता पूर्विकां विदुः[6] ॥ ५२ ॥ (आविद्धा)

स्फिक्पार्ष्णिश्लेषपर्यन्तमञ्चितं पृष्ठतो नयन्[7] ।
पादमन्वितजङ्घं च पार्श्व एव भुवि क्षिपेत् ॥ ५३ ॥

तरसा यत्र विज्ञेया सेयं नूपुरपादिका ।
यथा शोभं[8] स्फिजम्त्वर्वाक्[9] स्वयं मन्यामहे पुनः ॥ ५४ (नूपुरपादिका)

त्रितालान्तरमुत्क्षिप्य कुंचितं चरणं पुनः ।
[10]सजङ्घास्वस्तिकं भूमौ वामनः पार्ष्णिना क्षिपेत् ।
यस्यामेषा मताक्षिप्ता खण्डे चिन्तापरामिधा (?)[11] ॥ ५५ ॥ (अक्षिप्ता)

भुजङ्गत्रासितां कुर्वन् द्वितीयेन तलेन चेत् ।
शरीरं भ्राम्यते वेगात्[12] भ्रमरी सा प्रकीर्तिता ॥ ५६ ॥ (भ्रमरी)

कुर्वन्नूपुरपादोक्तं[13] कुञ्चितं चरणं पुनः ।
देहसम्मुखजान्वग्रक्रियं [14]वेगात्प्रसारयेत् ।
यत्र सा दण्डपादेति पण्डितैः परिकीर्तिता ॥ ५७ ॥ (दण्डपादा)

1. A.B. पार्श्व 2. A.B. नोरुं 3. A. तं 4. A. ग्रौ 5. A.B. पतितः
6. B दः 7. A.B पृष्ठयन् 8. A.B. फं 9. A.B. स्वर्वाक् 10. A.B. स्व
11. The alternate name given, most probably by Kirtidhara: is not clear.
12. B. वेगात् missing. 13. B. वादोक्तं 14. B. ग्रात्

पृष्ठतो वलिताश्लिष्टपृष्ठः पादः प्रसार्यते ।
ऊर्ध्वा[1]धः पार्श्वदेशेषु भ्रान्तो मण्डलवद्यदा ।
कीर्तितेयं तदा विद्युद्भ्रान्ता लक्ष्येऽतिदुष्करा ॥ ५८ ॥ (विद्युद्भ्रान्ता)

जानुस्तन[2]समं यावत् कुंचितं पादमुद्धरेत् ।
यत्र स्तब्धी[3]कृतोऽन्योऽङ्घ्रिः[4] ऊर्ध्वजानुरियं मता ॥ (ऊर्ध्वजानुः)

आविद्धं पादमन्योरु[5]क्षेत्रे पार्ष्णिं यथा भवेत् ।
भ्रान्त्वो[6]त्पत्य यदा [7]बाह्यभ्रमर्युत्पातयेद्भुवि ।
[8]तदोद्धृता मनोवर्ता लोके भूचारपूर्विका (?) ॥ ६० ॥ (उद्धृत्ता)

उत्क्षिप्य कुञ्चितं पादं पार्श्वयोर्लोलयन् क्षिपेत् ।
स्वपार्श्वे पार्ष्णिना[9] यस्यां डोलापादेति सा स्मृता ॥ (डोलापादा)

पादस्य मुख्यता क्वापि हस्तस्यापि क्वचिद्भवेत् ।
उभयोः कुत्रचित् ज्ञेया यथाशोभं प्रयोगतः ॥ ६२ ॥

[10]हस्ताववनतौ स्यातां यदा पादस्य मुख्यता ।
अग्रगौ[11] स्तः स्वमुख्यत्वे,[12] द्वयोश्चेत्[13] समगौ पुनः ॥ ६३ ॥

यतश्चारीप्रयोगेऽङ्घ्री ततो हस्तौ, यतः करः ।
तत[14]स्त्रिकं यतः तत्[15] स्यात् नेत्राद्यं[16] योजयेत्ततः ॥ ६४ ॥

पादचार्यां[17] कृतार्थो[18] वा पादो याति भुवं यथा ।
हस्तः स्वकार्यनिष्पत्तौ [19]कटिमाश्रयते तथा ॥ ६५ ॥

1. B. ध्वों 2. A.B. र 3. A. स्तण्डि B. स्तण्डी 4. A. न्यंन्योः B. न्यश्रीः
5. A.B. अन्योन्यं 6. A.B. न्तो 7. B. वाह्य 8. A.B. ततो. After उद्धृत्ता the line is not clear; it mentions a more common name for the same which is not clear. 9.B. पाणिना
10. A.B. हस्ताद 11. B. गो 12. A. र्थं 13. A. द्वयौश्चेत् B. द्वयोचत्
14. A. र B. रा 15. A. त B. omits तत् 16. A.B. जेत्राद्यं
17. A.B. र्यं and then a तु extra. 18. A.B. र्थं 19. A. कक्षिम्

हस्तः स्यादर्धचन्द्रोऽत्र नाट्ये, नृत्तविधौ पुनः ।
पक्षवञ्चितकौ पक्षप्रद्योतौ वामतौ सताम् ।
एतत्त्रयमपि ब्रूमो[1] नृत्ये लक्ष्यनि[2]रीक्षणात् ॥ ६६ ॥

अनन्तेषु विभेदेषु गतीनां ललितात्मिकाः[3] ।
चार्यो द्वात्रिंशदेवोक्ता मुनिनान्वर्थसंज्ञकाः[4] ॥ ६७ ॥

चरितमिव सुराज्ञां युक्तदण्डाभिरामं
गिरिश[5]मिव भुजङ्गत्रासितालोकनीयम् ।
जलदमिव [6]सविद्युद्भ्रान्तमश्रान्तलक्ष्मि[7]
[8]व्यरचयदिह चारी[9]लक्षणं[10] जायनार्यः[11] ॥ ६८ ॥

॥ इति चारीलक्षणम् ॥

आसामाद्यन्तभावार्थमधुना[12] स्थानमुच्यते ।
करणाधारभावेषु स्थानशब्दो निरुच्यते ॥ ६९ ॥

भाविगत्यनुकूलेन स्थानकेन हि केनचित् ।
[13]स्थित्वा गच्छेत्[14] तदन्तेऽपि[15] तिष्ठेदित्यत्र कश्चन ॥ ७० ॥

प्रयोगो न[16] विना येन तस्मादेतन्निरूपयेत् ।
शरीरस्याङ्गविन्यासविशेषो[17] भावयोर्विपत् (?) ॥ ७१ ॥

---

1. B. भूमौ 2. A ति 3. A.B. ललि.....काः *Cf.* Bharata here, X. 50. GOS. ललिताङ्गक्रियात्मिकाः । 4. A.B. ता 5. A B. ज 6. A. पु 7. A.B. क्ष्मीं 8. B. omits व्य 9. A.B. रि 10. A.B. विलक्षणम् 11. A.B. जायनार्यमः 12 A.B. भावार्गदधुना. For restoration see Saṅgita Ratnākara, VII. 1027. 13. A.B. स्थिता 14. A.B. ति 15. A.B. दन्तेऽपि 16. B. गे
17. A.B. The words भावयोर्विपत् are corrupt; either there is something here in dual qualifying 'नेत्रयोः' and meaning 'expressive of emotion' or something independently going with 'विन्यासविशेषः' and meaning the same thing.

नेत्रयोः सहगः[1] कोऽपि निश्चलः स्थानमुच्यते ।
वैष्णवं समपादाख्यं वैशाखं मण्डलाभिधम् ॥ ७२ ॥

आलीढसंज्ञितं प्रत्यालीढाख्यं चेति षण्णृणाम् ।
एकः पादः समो यत्र त्र्यश्रः पार्श्वमुखोऽपरः ।
अनयोरन्तरं सार्धतालद्वितयसंज्ञकम् ॥ ७३ ॥

जङ्घायामञ्चितं किञ्चित् सौष्ठवेनोपशोभितम् ।
वैष्णवं स्थानकं[2] यस्मात् विष्णुरत्रा[3]धिदैवतम् ॥ ७४ ॥

अनेनाभिनयो विष्णोः नरयोः[4]: श्रेष्ठमध्ययोः[5] ।
कर्तव्यः[6] सूत्रधारादौ[7] [8]संलापोऽपि स्वभावजः ॥ ७५ ॥ [वैष्णवम्]

तालमात्रान्तरौ स्यातां[9] स्वभावात्[10] चरणौ समौ ।
सौष्ठवं सहजं यत्र समपादं तदुच्यते ॥ ७६ ॥

विमानस्यन्दनाकाश[11]व्रतलिंगस्थितेषु तत् ।
विवाहपक्षि[12]निर्देशे विप्रमङ्गलवाचने ।
अधिदैवतमेतस्य कीर्तितः कमलासनः[13] ॥ ७७ ॥(समपादम्)

सार्ध[14]तालत्रितयवत्[15] त्र्यश्र[16]पक्ष[17]स्थपादयोः[18] ।
अन्तरं[19] स्याद्व्यवस्थेयम्[20] ऊर्वोरपि[21] निषण्णयोः ॥ ७८ ॥

---

1. A. ज: B. गा: 'नेत्रयोः सहगः' means closely following the eye-movement; the eye, the seat of feeling, is the essential thing which every other movement appropriately follows.

2. A.B. जं 3. B. त्ता 4. A.B. अनयोः For the restoration, see Bharata here नृभिः and Abhinavagupta अस्त्रीप्रधानस्य. 5. A.B. प्ययोः 6. B. visarga wanting. 7. A B. ख्यौ 8. A.B. स्त्र 9. A.B. मात्तात.....10. A.B. सौमवेत्वां 11. B. कां 12. A.B. क्ष 13. A.B. ने 14. A. र्धं B. द्धं 15. A B. तालवत् 16. A.B. त्यश्र 17. B. क्ष 18. A. वादयोः 19. A.B. अन्तर 20. A B. स्थाय 21. A:B. कुर्वोरपि

यस्मिन्वैशाखमाख्यातं ताद्विशाखाधिदैवतम्[1] ।
व्यायामे निर्गमे स्थूलभङ्गे वाहनवाहने ॥ ७९ ॥ (वैशाखम्)

[2]त्र्यश्रौ पार्श्वमुखौ पादौ[3] चतुस्तालं[4]तरान्वितौ[5] ।
निषण्णोरू कटी यत्र जायते जानुनोस्समा[6] ॥ ८० ॥

बुधैर्मण्डलमाख्यातं तदाखण्डल[7]दैवतम् ।
प्रयोगे[8] चाप[9]वज्रादे:[10] स्कन्धे(?)[11] सिन्धुरवाहने ।
गरुडादिमहास्थूलपक्षीणां च निरूपणे ॥ ८१ ॥ (मण्डलम्)

वाम: पादो निषण्णोऽत्र कुञ्चितो जानुना पुन: ।
तेन तुल्ये[12] कटी पृष्ठे त्र्यश्र:[13] सव्य:[14] प्रसारित: ॥ ८२ ॥

पञ्चनालमितस्तिष्ठन्ननयो: पार्ष्णिगुल्फयो: ।
आलीढमिदमाख्यातं रुद्रस्तस्याधिदैवतम् ॥ ८३ ॥

उत्तरोत्तरनो जल्पे रोषामर्ष[15]समुद्भवे ।
वीररौद्रकृते मल्लास्फोटे रिपुनिरूपणे ।
[16]तदभिद्रवणे[17] शस्त्रमोचने चेदमुच्यते ॥ ८४ ॥ (आलीढम्)

अस्यैवाङ्ग: परीवर्त्ते प्रत्यालीढं प्रकीर्तितम् ।
विमुञ्चेदमुना शस्त्रं सर्वमालीढसंहितम्[18] ।
आलीढस्यैव भेदत्वात् रुद्रोऽस्याप्यधिदैवतम् ॥ ८५ ॥ (प्रत्यालीढम्)

[न्याया:]

शस्त्राणां मोचने न्याया: चत्वार: कथिता बुधै: ।
रणे स्वपरशस्त्राणां कर्तुं पातनसारणे ।
उचिता वर्तनाज्ञानां न्यायोऽत्र परिकीर्तित: ॥ ८६ ॥

---

1. A.B. त: 2. B. अग्रौ 3. A.B. दे 4. B. स्तौलं 5. A. न्विता B.वितौ
6. A. मा: 7. B. स्वमण्डल 8. A.B. गे missing 9. A. वाप 10. A. विज्ञादे B. विज्ञाते 11. What the usage 'स्कन्धे' means is not clear. 12. A.B. ल्य 13. A B. स्तस्य 14. A.B. सल्ल: 'Savya' here is to be taken as 'Daksina'. 15. B. र्षी 16. B. तदा 17. A. ण; 18. A.B. ज्ञकम्

भारतः सात्वतो वार्षगण्यः[1] कैशिक[2] इत्यमी ।

क्रमान्न्यायाः कटीपादवक्षोमूर्ध्नां[3] विभेदने ॥ ८७ ॥

खेटं वामेन हस्तेन पर[4]शस्त्र[5]निवारणम् ।

[6]धृत्वा शस्त्रं तदन्येन प्रसार्येते पुनः पुनः ।

आक्षिप्य भ्रामयेत् पश्चात् पार्श्वात्[7] पार्श्वं[8] ततः परम् ॥ ८८ ॥

धृतशस्त्रेण हस्तेन मस्तकं परिवेष्टयेत् ।

मणिबन्धविवर्त्तेन कपोल[9]प्रान्तयोः पुनः ॥ ८९ ॥

कुर्यादुद्वेष्टनं भूयो मस्तकं परिवेष्टयेत् ।

ललिते वेष्टने द्वाभ्यां यत्रासौ भारतः स्मृतः ॥ (भारतः)

सात्वते सर्वमेतत्स्यात् कर[10]शस्त्रं तु पृष्ठतः ॥ ९० ॥ (सात्वतः)

वार्षगण्ये[11] तदा कुर्यात् प्रक्रियां सात्वते यथा ।

उद्वेष्टनं तु शस्त्रेण वक्षस्यङ्गेषु च स्मृतम् ॥ ९१ ॥ (वार्षगण्यः)

[12]कैशिके प्रविचारस्तु सर्वो भारतवन्मतः[13] ।

भ्रामयित्वा द्विषन्मूर्ध्नि शस्त्रं तावन्निपातयेत् ॥ ९२ ॥ (कैशिकः)

॥ इति न्यायाः ॥

नाना चारी भवेन्न्यायैः अमीभिरुपलक्षिता ।

प्रविचारा[14] भवन्त्यत्र शस्त्रमोचनगोचराः ॥ ९३ ॥

1. A.B. ण्डः 2. A.B. कौशिकः 3. B. र्ध्वं 4. B. परः 5. A.B. शास्त्र
6. A.सृत्वा 7. A.B. पश्चात् 8. B. पार्श्वे 9. A.B. लः 10. A.B. कार
11. A.B. ण्डे 12. A.B. कौ 13. A. वत्म[र्त्म]तः 14. B. र

हस्तेनैकेन हस्ताभ्यां प्रयोज्यमिति तद्विधा ।
तत्राद्यं खड्गशक्त्यादि[1] धनुःकुन्तादिकं परम् ॥ ९४ ॥

प्रकृष्टत्वाद्विशिष्टत्वाद् अन्वर्था[2] तद्वतामिधा[3] ।
[4]रङ्गे प्रहरणैर्भेदच्छेदशोणितविस्रुतिः[5] ।
व्यक्तघातश्च नो कार्यः चित्तोद्वेगकरं च यत्[6] ॥ ९५ ॥

कार्यं वाभिनयैरेव[7] भेदनाद्यं[8] विधानतः ।
दर्शनादेव जानाति येन[9] सामाजिको जनः ॥ ९६ ॥

व्यायामं[10] सौष्ठवोपेतैरंगहारैर्मनोहरम् ।
लयतालसमायुक्तं कारयेत यथाबलम् ॥ ९७ ॥

सुतरां सौष्ठवे यत्नः कार्यो व्यायामकारिभिः ।
साधकस्तेन हीनाङ्गो नाट्ये नृत्ते[11] न शोभते ॥ ९८ ॥

यत्र नाङ्गमतीवोच्चं[12] नातिगर्वमचञ्चलम् ।
विश्रान्तावयवं लोलपादं[13] वक्षः[14] समुन्नतम् ॥ ९९ ॥

समकंठकटीशीर्षकूर्परांसं[15] प्रयुज्यते ।
सौष्ठवं तत्समाख्यातं बुधैर्व्यायामगोचरम् ॥ १०० ॥

चतुर्भिरथवाष्टाभिरथ द्वादशभिर्मता ।
जानुवंक्षण[16]* सन्नामास्त्वंगुलेः[17] खर्वता[18] मता ॥ १०१ ॥

---

1. B. दे 2. A. अन्वास्तात् B. अन्वस्तात् 3. A.B तोभिधा: 4. A.B. रंगै:
5. A.B. स्मृता: 6. B. द्वेगश्चरेत् 7. A. येनैव 8. B. द्य 9. A. येम
10. A. व्यायामः B. व्यायाम 11. A. नृत्ये 12. A. व्यरन्न
13. A.B. पाद 14. A.B पक्ष 15 B. कूवरं सं 16. A. वक्षण
17. A. त्वांगुले B. त्वांगुले: 18. B. खलुता

* वंक्षणः means ऊरुसंधिः

इच्छया भूमिपालानां तत्तद्देशानुसारतः ।

अतः परं तु खर्वत्वं परं[1]नृत्ते[2] न शोभते[3] ॥ १०२ ॥

वैष्णवं स्थानकं यत्र समुन्नतमुरःस्थलम् ।

कटिनाभिचरौ हस्तौ युगपत् क्रमशोऽथवा ।

चतुरश्रमिदं प्रोक्तमङ्गं [4]नेत्रसुखावहम् ॥ १०३ ॥

[5]असियुद्धे* यथान्याया[6] धनुषः करणं तथा ।

परिमार्जनमादानं† [संधानं मोक्षणं तथा] ॥ १०४ ॥

.....[1] ग्रन्थपातः].....

1. B. पर 2. A.B. त्ये 3. A B. शोभने 4. A नेत्वनुखावहम् B. नष्ट
5. A अंसे B. अंशे 6 A नार्या B. न्याय्या

* For this reconstruction see Abhinavabhāratī, GOS. II, p. 115, line 5.

† Here occurs a gap in the text not noticed by the scribe On the reconstruction of the second quarter of the line and on the topic of the fourfold handling of the bow see Nāṭya Śāstra, xi. 92-3 Kasi edn . X. 92 K.M. edn.

The topic found dealt with next is the 'Sitting poses', 'Upaviṣṭa-sthāna' or 'Āsana-vidhi', which Bharata deals with later, ch. XIII. 193. *ff.* Kasi edn. and XII. 202 *ff.* GOS. II. Here the text begins abruptly, with the end of definition of the pose called 'Utkaṭa.'

The first of the 'sitting poses', whose description is lost in the gap is 'Svastha' which Bharata describes thus :

विष्कम्भेनाञ्चितौ पादौ त्रिकं किञ्चित्समुन्नतम् ।
हस्तौ कटूरुविन्यस्तौ स्वस्थे स्यादुपवेशने ॥ XIII. 194-5 Kasi.

XII. 203 GOS. In K M. here, there is a gap after the third foot in which the last quarter of this verse, the whole of the next verse and the first quarter of the next are lost.

*.....उत्कटमुदाहृतम् ।

देवादितर्पणे सन्ध्याजपहोमादिषु स्मृतम् ॥ १०५ ॥ (उत्कटम्)

चिबुकं कर्कटे[1] न्यस्य हस्ते[2] स्कन्धाश्रितं शिरः ।

यत्रेन्द्रियाणि खर्वाणि[‡] स्युः तद्योग[3]कृतं स्मृतम् ॥ १०६ ॥

रणरङ्गपराभूते शोकव्याकुलता[4]दिषु ।

क्रान्तमित्य[5]भिधामस्य कथयन्त्यपरे[§] पुनः ॥ १०७ ॥ (योगकृतम्)

आसने द्विगुणः पादो मनागन्यः प्रसारितः ।

शिरोऽञ्चिततया यत्र किञ्चित्पार्श्वमुपागतम् ॥ १०८ ॥

तत्स्याच्चिन्ताकृतं चिन्ताविप्रलंभमदा[6]दिषु ।

[†]अन्यैः पुनस्समाख्यातं मदालससमाख्यया[7] ॥ १०९ ॥ (चिन्ताकृतम्)

---

1. B. कर्कटीस्थ 2 A. स्त 3 A. स्युस्तजोक B. व्युजजोक 4. A B. व्याकुल्यलीना 5. B त्था 6 A. दो 7. A इदं मन्दालसाख्यया B. इदं मन्दालसमाख्यया

* For the definition of Utkaṭa, see N. S. GOS. II. p. 170. śl.

208 :—तथा चोत्कटिकास्थानं स्फिक्पार्ष्णीनां समागमः ।
पित्र्ये निवापे जप्ये च सन्ध्यास्वाचमनेऽपि च ॥

and S. Ratnākara, VII. 1111:— समासनसमं स्पृष्टभूतलं चरणौ समौ।
यदा तदोत्कटं योगध्यानसंध्याजपादिषु ॥

‡ Means distracted or dispirited ; *Cf.* N.S. GOS. XII. 206 संप्रणष्टेन्द्रियमनाः

§ The name Krānta is given to this in the S. Ratnākara VII. 1108.

† For this alternate name, see S. Ratn. VII. 1107. The name Madālasa is found in the Saṅgitamuktāvali too.

भुजालिङ्गितयोः[1] न्यस्य जानुनोश्चिबुकं यदा ।
पिण्डीकृत्य स्थितो देहमवहित्थं मतं तदा ।
अवहित्थामय[2]व्रीडाध्याननिद्रादिकेषु तत् ॥ ११० ॥ (अवहित्थम्)*

† .....[ग्रन्थपातः].....

1. A. B. नयोः 2. A. B. त्थां मय

* The K. M. text (XII. 173) and the fn. readings of Kasi and GOS. texts preserve Avahittha among the uses of this Āsana.

† There is again a gap in which the remaining Āsanas are lost. Neither the nomenclature nor the enumeration of these in Bharata is clear: according to the S. Ratnākara, Bharata gives nine of these (S. R. VII. 1036-7) Svastha (lost in the ms. of our text), Madālasa (our Cintākrta), Krānta (our Yogakṛta), Viṣkambhita (lost in our ms.), Utkaṭa, Svasthālasa, Jānugata, Muktajānu and Vimuktaka (the last four lost in our ms.). Bharata XII. 206-7 (GOS) is obviously S.Ratn.'s Svasthālasa :

प्रसार्य बाहू शिथिलौ तथा चोपाश्रयाश्रितः ।
मूर्छामदश्रमग्लानिविषादेष्वुपवेशयेत् ॥ (*Cf.* S Ratn VII 112)

Viṣkambhita : Bharata XII 209-10 (GOS.) :

विष्कंभितं पुनश्चैव [should be श्चैकं] जानु भूमौ निपातयेत् ।
प्रियाप्रसादने कार्यं होमादिकरणेषु च ॥

But this definition and application are found in S. Ratn. for 'Muktajānu' (VII. 1115), and Viṣkambha is defined differently (VII. 1109-10); the Sangītamuktāvali has Muktajānu, but omits Viṣkambhita. The Avahittha of our text, which has its basis in Bharata, is not found in S. Ratn.

For the rest we have in Bharata (GOS. XII. 210-213) the following verses :

महीगताभ्यां जानुभ्यामधोमुखमवस्थितम् ॥
देवाभिगमने कार्यं रुषितानां प्रसादने ।
शोके चाक्रन्दने तीव्रे मृतानां चैव दर्शने ॥

[सुप्तस्थानानि]

समं[1] प्रसारिताभिख्य[2]मुद्वाहितविवर्तिते[3] ।

नत[4][माकुञ्चितं] चेति[5] स्थानं सुप्तस्य षड्विधम् ॥ १११ ॥

कृत्वा वदनमुत्तानं पाणिपादं प्रसार्य चेत् ।

शयीत सममाम्नातं स्वस्य संवेशने तदा ॥ ११२ ॥ (समम्)

उपधानं भुजं कृत्वा प्रसार्य यदि जानुनी ।

सुप्यात्[6] प्रसारिताभिख्यं तदा स्यात्सुखनिर्वृते[7] ॥ ११३ ॥ (प्रसारितम्)

स्कन्धे मूर्धानमाधाय सुप्याद्भूमिस्थ[8]कूर्परः ।

यस्मिन्नुद्वाहितं तत्स्यात लीलयाश्रितमास्थितौ ॥ ११४ ॥ (उद्वाहितम्)

अधो वदनमादाय संविशेद्यत्र तत्स्मृतम् ।

विवर्तिताभिधं तत् (स्यात् ?)[9]रोगशस्त्रादिपीडिते ॥ ११५ ॥ (विवर्तितम्)

अन्तर्हस्तद्वयो[10] जंघे प्रसार्य च मनाग्यदा[11] ।

निद्रायेन्नतमुद्दिष्टं तदालस्यश्रमादिषु[12] ॥ ११६ ॥ (नतम्)

ग्रामने च कुमत्त्वानां नीचानां चैव याचने ।
होमयज्ञक्रियायां च प्रेष्याणां चैव कारयेत् ॥

which give for a general pose with knees on ground several applications : it is out of these that Śārṅgadeva makes up the two Jānugata and Vimukta (S. Ratn. VII. 1113-4 and 116a). 'मृगदर्शने' in S. Ratn. VII. 1114 Anandasrama edn.) should read 'मृतदर्शने'

1. A. मा 2. B. ख्या 3. A. B. र्त्तने 4. A.B. Gap. The gap in B. extends from after नतम् up to भुजं कृत्वा in the third line below. 5. A. तश्चेति 6. A B. स्तुष्यात् 7. B. र्विते 8. A.B. भूमिषु 9. A.B. gap. 10. A द्वयोः B. This bit is twice written. 11. A. ता B. चन्मनागता 12. B. क्रमादिषु

आविद्धे[1]जानुनी बिभ्रद् वपु[2]श्चाकुञ्चितं यदा ।

सुप्यादा[3]कुंचितं प्रोक्तं तदा शीतेन पीडिते ॥ ११७ ॥ (आकुंचितम्)

[स्त्रीणां स्थानानि]

[4]आयताख्यावहित्थाश्वक्रान्तानि[5] त्रीणि योषिताम् ।

स्थानानि मुनिनोक्तानि तेनैवाथापि चेति तु[6] ॥ ११८ ॥*

ब्रुवतान्यानि कतिचित् सूचितानि, गतागतम् ।

वलितं मोटिता[7]भिख्यं विनिवर्तितनामकम्[8] ।

प्रोन्नतं चेति संभूय स्युरष्टौ तानि चक्ष्महे ॥ ११९ ॥

यत्र पादस्समस्सव्यः वामस्त्र्यश्रोन्नतो[9] भवेत् ।

गुल्फपार्ष्ण्यो:[10] स्थितो[11] मध्ये तालेनोर:[12] समुन्नतम् ॥ १२० ॥

प्रसन्नो मुखरागः स्यान्नितम्बे पाणिरुन्नते[13] ।

अर्धचन्द्रो, लनाहस्तो वाम:[14] तन्मतमायतम् ॥ १२१ ॥

---

1. A. आविधे B. अविधे 2. A. वप्र 3. B. दु 4 A.B. यथायथा 5 A.B. त्थाय कुन्तानि 6. A. तेनैव वाधापि चेति तु B. तेनैव वातापि चेतितुम् 7. A. मोदिता B. मोहा 8. A. मानकम् 9. A.B. त्यस्रोनयो 10. B. पार्श्वयो 11 A. स्थितं B. न्मितं 12. B. तानोर 13. A.B. दे 14 B. पामः

* See also S. Ratn. VII. 1030-1, where again Bharata is said to have given three Sthānas for ladies and indicated with the words 'अथापि च' further possible Sthānas. This refers to Bharata XII. 159-177 (GOS.), XII 157-170 (Kasi), XII 138-149 (K. M.) where Bharata describes, in the midst of the treatment of Gati, the three Sthānas of ladies Āyata etc. and ends with the words 'अथापि च'. The Abhinava-bhāratī has no comments referring to these. While the S. Ratn. mentions only four additional Sthānas of women, our text adds a fifth, Pronnata.

कायस्यायमनाद्[1] अस्य दैवतं कमलालया ।

निर्वर्णनेषु[2] चिन्तायामावाहनविसर्गयोः[3] ॥ १२२ ॥

प्रवेशे रंगमध्यस्य पुष्पाञ्जलिविमोचने ।

गाम्भीर्यप्रभवे मौने तर्जनादा[4]विदं भवेत् ॥ १२३ ॥* (आयतम्)

अस्य पादकटी[5]हस्त[6]व्यत्यासा[7]दवहित्थकम् ।

अन्वर्थमवहित्थाख्यं भावसंसूचनाद्भवेत् ॥ १२४ ॥

अधिदैवतमेतस्य देवी महिषमर्दनी ।

सल्लापे सहजे तर्के परितोषे विनिश्चये[8]† ॥ १२५ ॥

लज्जायां[9] सान्द्रसौभाग्य[10]गर्वादात्मनिरूपणे[11] ।

[12]वरस्यागमनोत्कण्ठा[13]वीक्षादा[14]विदमिष्यते ॥ १२६ ॥ (अवहित्थम्)

अंचितं दक्षिणं पादं यदा सूचीसमाह्वयम् ।

समस्थितस्य पादस्य पार्ष्णि[15]भागे वि[16]निक्षिपेत् ॥ १२७ ॥

---

1. A B. ट् 2. A.B. निर्वर्ण्यतेषु 3. B. र्जयो: 4. A.B. तज्जना
5 A.B. टि 6. A.B. हस्तस्य 7. A. व्यात्यासा B. व्यात्यासापा
8. B. परितोषेपि निश्चरीक्ष 9. A.B. लज्जां 10. B. ग्यं 11. A. निरीक्षणे
12. A.B. परस्य 13. A. र्णा 14. A.B. यि 15. B. र्षि 16. A. sपि

* The N. S. in the GOS. edn. gives two sets of definitions and the editor says in the fn. (Vol. II. p. 163) that Jāyasenāpati follows the first set; but this statement is not wholly true; for Jāya compounds both.

† The S. Ratn. reads विस्मये; but for विनिश्चये which is correct see N. S. GOS. II. XII. 171-2; here again Jāya draws also upon the bracketted extra readings; note also the application Lajjā which is not found in S. Ratn. and is found only in the bracketted readings in N. S. GOS.

यद्वा समाख्य[1]मेवात्मपार्श्वे तालेन[2] सम्मिते ।

यत्राश्वक्रान्तमेतत्स्यादे[3]तेनाश्वाधिरोहणात् ॥ १२८ ॥

पादोऽत्रानियतः प्रोक्तः कैश्चित्संशयितात्मभिः ।

अंचितोऽत्राथवा[4] सूचीमतो दक्षिण एव नः ॥ १२९ ॥

यतोऽश्वा[5]रोहणारम्भे मङ्गल्यामिवृद्धये ।

दक्षिणेनाङ्घ्रिणा पादकटकाक्रमणं परम् ॥ १३० ॥

अधिदैवतमेतस्य स्मृता देवी सरस्वती ।

पुष्पस्तबकसंग्राहे विटपस्यावलंबने ॥

नीचानां विश्रमे चैतन्नराणां विनियोज्यते ॥ १३१ ॥ (अश्वक्रान्तम्)

गन्तुं चरणमुत्क्षिप्य मध्ये गीतादि[6]हेतुना ।

हस्ताद्यभिनयं यस्मिन् नर्तकी प्रवितन्वती[7] ॥ १३२ ॥

गतिस्थितिनिरुद्धात्मा[8] निष्ठेतत्स्याद्[9] गतागतम् ।

संभ्रमप्रभृतावस्य[10] विनियोगः[11] प्रकीर्तितः ॥ १३३ ॥ (गतागतम्)

किंचिद्विवलमानाङ्गं पदं वलनपार्श्वगम् ।

भूमिस्पृष्टकनिष्ठं[12] च भूमिगां[13]गुष्ठकं परम् ।*

[14]कुर्वीत वलितं प्रोक्तं सामिलाषविलोकिते ॥ १३४ ॥ (वलितम्)

1. A.B. स्वव्याख्य 2. A B. ताडिन 3. A.B. मेतस्यामे 4. A.B. लघवाः
5. B. यातोश्वा 6 A. मध्ये गितादि B. मध्यगोतानि 7. A.B. तं च ती
8. B. मा 9. A.B निष्ठनस्याद् 10. B. मस्य 11. B. जः 12. B यनिष्ठं
13. B. सभूमिजां 14. A. कुर्वन B. कुर्वात

* A. leaves space here unnecesarily for a line.

[1]अर्धाङ्गुलितलः पादः कुञ्चितोऽन्यः समुत्थितः[2] ।

[3]ऊरोः कुञ्चितपादस्य पुरतः कर्कटः करः ।

[4]यत्र तन्मोटिताभिख्यं कामावस्थासु कीर्तितम् ॥ १३५ ॥ (मोटितम्[5])

अस्मिन्नंगपरावृत्या[6] पृष्ठतो वि[7]निवर्तनम् ।

तद्भेदः[8] स्यादमुष्यापि विनियोगस्तु पूर्ववत् ॥ १३६ ॥ (विनिवर्तितम्[9])

समपादतलाग्राभ्यामङ्गुलीनां तलैरपि[10] ।

आयतीकृत्य गात्रं चेत् तिष्ठेत्[11] स्यात्प्रोन्नतं[12] तदा ॥ १३७ ॥

*नासिकाद्वयसे तोये[13] दृ(ह्यू ?)र्ध्वाता(ना)मन्तरीक्षणे‡ ।

प्रांशुप्राप्यप्रमाणस्य(स्थ?)फलादिग्रहणादिषु ॥ १३८ ॥ (प्रोन्नतम्)

॥ इति स्थानलक्षणम् ॥

विचित्रभूषा ललितांगयष्टिकावर्तनालभ्रमराल[14]काभा ।

संक्रान्तकान्तिर्विहृता[15]भिरामा[16] निरूप्यते मण्डलराजिरामा ॥ १३९ ॥

पारंपर्येण चारीणां मंडलं[17] चारु[18] गुंफितम्[19] ।

दामेव पुष्पजातीनां न कस्य नयनोत्सवः ॥ १४० ॥

---

1. A.B. ऊर्ध्वा　2. A.B. कुञ्चितान्यसमुत्थितः　3. B. उरोः　4. B. यत्तत्
5. B. तः　6. A.B. ल्य　7. B. पि　8. A B. द　9. B. निवर्तितम्
10. A.B. तरपि　11. A.B. निष्ठ　12. A. सं B. डं　13. A.B. तोचे
14. B. भ्रमनाल　15. A. विनिहृता　B. विनिहिता　16. B: रामान् repeated.　17. A.B. लां　18. B. तारु　19. A. B. कंपितम्

* नासिकाद्वयसे means आनासिकम्, for showing water or flood of depth to the height of a man up to his nose.

‡ For showing the act of looking into the interior of some container which is high.

हेतोः[1] चारीप्रयोगस्य प्राचुर्यान्[2] मण्डलान्यपि ।

भौमान्याकाशगा[3]नीति प्रसिद्धानि तदाख्यया * ॥ १४१ ॥

यथायोगं[4] यथोशोभं[5] सर्वशस्त्रविमोचने ।

सर्वाण्यपि गदायुद्धे प्रयोज्यानि[6] यथोचितम् ॥ १४२ ॥

भ्रमरा[7]स्कन्दिते पिष्टकुट्टं चाषगताडिते[8] ।

[9]एलकाक्रीडिताध्यर्द्धे[10] आवर्तं शकटास्यकम् ॥ १४३ ॥

समोसरितमित्येवं भौमानि ब्रूमहे दश ।

सूचीविद्धमति[11]क्रान्तदण्डपादमलातकम् ॥ १४४ ॥

विचित्रं विहृतं[12] वामबन्धं[13†] ललितसंचरम् ।

[14]क्रान्तं ललितमेतानि दशाकाशभवान्यपि ।

अंघ्रे[15]र्विशेषं निभृताः(?)चार्यः[16§] पुंस्यत्र संमताः ॥ १४५ ॥

1. A.B. हेतः 2. A B. र्यं 3. A.B. का 4. B. योची 5. B. रेफं 6. B omits नि 7. B. ण 8. B. द्धितो 9. B. एडका 10. A. स्यर्धे B. स्यद्धे 11. A.B. इति 12. B विहितं 13. A. वाम-द्धं B. वांबन्धं 14. A. का 15. A.B. घ्रे 16. A.B. चर्यः

* Cf. S. Ratn. VII. 1156.

† This is found in mss. of N. S both as Vāmabandha and Vāmaviddha ; see N. S. GOS. II. p. 123; S. Ratn. has it as Vāmaviddha ; in our text, A reads Vāma(vi)ddha and B Vām(vāma)bandha, and later, in the lakṣaṇa-grantha, both A and B read Vāmabandha.

§ The first quarter of this line is corrupt in both mss.; but the meaning is clear : in regard to the definition of each Maṇḍala, the poses of the legs involved have to be specified ; and for this, the Cārī-names themselves are used in masculine gender and applied to the leg-poses which characterise each. *cf.* S. Ratn. VII. 1158 a.

दक्षिणं जनितं वामं [1]स्यन्दितं दक्षिणं पुनः ।
शकटाख्यं ततो[2] वाममपस्यन्दितमाचरेत् ॥ १४६ ॥

दक्षिणां भ्रमरीं तत्र द्विः[3] त्रिकं परिवर्तयेत् ।
वामं तु स्यन्दितं सव्यं शकटाख्यामिधं ततः ॥ १४७ ॥

वामं चापगतिं सव्यं भ्रमरीं स्यन्दितामपि ।
आदध्याच्चरणं यत्र भ्रमरं तदुदाहृतम् ॥ १४८ ॥ (भ्रमरम्)

दक्षिणे भ्रमरी वामे[4] मतं भ्रमरकं[5] च तत् ।
दक्षिणं शकटाख्यमूरु[6]द्वृत्तं तमेव च ।
वाममध्यर्धकं नं च भ्रमरी दक्षिणं पुनः ॥ १४९ ॥

स्यन्दितं दक्षिणादन्यं [7]शकटाननमेव तु ।
आस्फा[8]लितमहीपृष्ठं पादमास्कन्दितं विदुः ॥ १५० ॥ (आस्कन्दितम्)

सूची सव्यमप[9]क्रान्तं वामं तदनु दक्षिणम् ।
भुजङ्गत्रासितं वाममपि तं रचयन्[10] मुहुः ।
मण्डलं पूरयेद्यत्र पिष्टकुट्टं तदीरितम् ॥ १५१ ॥ (पिष्टकुट्टितम्)

सर्वैश्चापगतैः पादैः मण्डलं परिपूरयेत् ।
भ्राम्यं तत्र [11]चतुर्दिक्षमिदं चापगतं मम ॥ १५२ ॥ (चाप[12]गतम्)

1. B. स्प 2. A.B. मो 3. A B द्वि. 4. B. म 5. A.B. कः 6. B. सुभ्रू
7. A. शकटास्यन B. शकटस्यन 8. B स्था 9 A B. व. 10. B. भस्यन्
11. B. चतुर्द्दि 12. A. पं

पार्श्वक्रान्तक्रमं सव्यमावर्तं स्यन्दितं च तम् ।

शकटास्यं ततो वामं सव्यं चापगतिं ततः ॥ १५३ ॥

वाममङ्गित[1]मन्यत्तु [2]कुर्यादध्यर्द्धिकं[3] ततः ।

वामं तु भ्रमरं[4] चान्यत्[5] स्यन्दितं तेन भूतलम् ।

यस्मिन्नास्फालयेदेतत् परिकीर्तितमङ्गितम् ॥ १५४ ॥ [अङ्गितम्]*

सूचीविद्धैर्मही[6]संस्थै[7]रेलकाक्रीडितैरपि ।

[8]पूर्णैस्त्रिकविवर्तैश्च सूचीविद्धापविद्धकैः ।

मण्डलं तत्क्रमात्कार्यमेलकाक्रीडिताभिधम् † ॥ १५५ ॥(एलकाक्रीडितम्)

विधाय चरणं सव्यं जनितं स्यन्दितं क्रमात् ।

वाममध्यर्द्धिकं सव्यं शकटास्यमनन्तरम् ॥ १५६ ॥

विदधीत चतुर्दिक्कमण्डल[9]भ्रमणं क्रमात् ।

यत्राध्यर्धमिदं प्राहुः युद्धे प्रायेण कीर्तितम् ॥ १५७ ॥ (अध्यर्धम् ।)

प्रथमं जनितं वामवृद्धवृत्तमथेतरम्[10] ।

शकटास्यं तमेवोरुवृत्तं चापगतिं परम् ॥ १५८ ॥

दक्षिणं स्यन्दितं वामं शकटास्यं तथेतरम्

भ्रमरं चरणं कुर्यात कृतविक्रावचलनम् ।

वामं चापगतिं यत्र तदावर्तमुदाहृतम् ॥ १५९ ॥ (आवर्तम्)

---

1. B. मण्डन 2. A. B. कुर्यु 3. A दध्यर्द्धिकं B. दध्यादिकं 4. A B. र
5 A. B मान्य 6. A. B. ह्रीं 7. A सस्थै B. सस्थे 8. A.B वर्ण
(For the reconstruction offered in the text, see S. Ratn. VII. 1179). 9. A B. लं 10. A मिथेतरम् B. मिथेतरम्

* A.B. Name missing.

† Second half of the line dropped by haplography in B.

दक्षिणं जनितं कुर्यादूरुद्वृत्तं तमेव च ।

शकटास्यं क्रमेणाथ वामं स्यन्दितसंज्ञितम्[1] ॥ १६० ॥

शकटास्यैस्ततः पादैः मण्डलं परिपूरयेत् ।

यस्मिन्नेतत्समाख्यातं शकटास्याभिधं बुधैः ॥ १६१ ॥ (शकटास्यम्)

समपादैः स्थितस्थाने संप्रसार्य तथा करौ ।

शिष्टमूर्ध्वतलावेतावावेष्ट्योद्वेष्टितौ[2] क्षिपेत् ॥ १६२ ॥

[3]कटीतटे[4] ततस्सव्यवामाभ्यां क्रमशो भजेत् ।

चरणाभ्यां स्थितावर्त्तौ वामं त्वग्रे[5] प्रसारयेत् ।

चतुर्दिक्कं[6] ततो भ्राम्येत्[7] समोसरितसंज्ञितः ॥ १६३ ॥ (समोसरितम्)

॥ [8]इति भूमण्डलानि दश ॥

वामं सूचीं प्रकुर्वीत तदेव[9] भ्रमरीमपि ।

दक्षिणं पार्श्वतः क्रान्तमतिक्रान्तं ततोऽपरम् ॥ १६४ ॥

अन्यत्सूचीमपक्रान्तं वामं वामेतरं पुनः ।

पार्श्वक्रान्ता[10]भिधं यत्र सूचीविद्धं तदुच्यते ॥ १६५ ॥ (सूचीविद्धम्)

जनितं चरणं कृत्वा शकटास्यं च दक्षिणम् ।

अलातमपरं पार्श्वक्रान्तं[11] दक्षिणमाचरेत् ॥ १६६ ॥

वामं समाचरेत्सूचीं पार्श्वक्रान्तं तु दक्षिणम् ।

* वामपादं ततस्सूचीमपक्रान्तं तु दक्षिणम् ॥ १६७ ॥

1. B. संशितम् 2. A.B तो 3. A.B. शकटी 4. A. कटे 5. A.B. न्वग्रे
6. B. र्द्विकं 7. A.B. भ्राम्येत् 8. B. Omits इति 9. A.B. तदव
10. B. न्त 11. B. कांतं

* Line missing in B.

सूचीं वामेऽनुकुर्वीत सव्येन[1] भ्रमरीमपि ।

तेनोद्वृत्तमलातं तु वामेन करणं ततः ।

[2]छिन्नं सव्येन वामेन बाह्यतो भ्रमरीं[3] भजेत् ॥ १६८ ॥

अतिक्रान्तं तमेवाङ्घ्रिं दण्डपादं तु दक्षिणम् ।

यस्मिन्निदमतिक्रान्तं व्यायामे परीकीर्तितम् ॥ १६९ ॥ (अतिक्रान्तम्)

दक्षिणे [4]जनितं कुर्युः दण्डपादं तमेव च ।

वामं सूचीं भ्रमर्या च सव्यमुद्वृत्तसंज्ञकम् ॥ १७० ॥

अलातं वामतः पादं पार्श्वक्रान्तं तु सव्यतः ।

भुजङ्गत्रासितं तद्वदतिक्रान्तं तथेतरम्[5] ॥ १७१ ॥

*दक्षिणं दण्डपादं तु वामं सूचीमनन्तरम् ।

तमेव भ्रमरीं कुर्युर्दण्डपादं तदीरितम्॥ १७२ ॥ (दण्डपादम्)

विदध्याद्दक्षिणं सूचीमतिक्रान्तं तथेतरम् ।

पार्श्वक्रान्तं ततस्सव्यं तस्मादन्यमलातकम् ॥ १७३ ॥

[6]षट्कृत्वस्सप्तकृत्वो[वा] चारीरावर्त्तयन्त्विमाः[7] ।

चतुर्दिक्कं परिभ्रम्य ललितैः पादविक्रमैः ॥ १७४ ॥

अपक्रान्तं पुनस्सव्यमतिक्रान्तं तथा[8]परम् ।

भ्रमर्याख्यं च कुर्वीत यत्रालातमुशंति तत्[9] ॥ १७५ ॥ (अलातम्)

1. A.B. सख्यन 2. B. किन्नं 3. A.B. री. 4. A. ज्ञ 5. A तथा परम् 6. A B. षष्टय 7. A.B. न्विमाः 8. A. यथा 9. B तम्

* 3 lines from here missing in B.

दक्षिणं जनितं कुर्या[1]दूरुद्वृत्तं तमेव च ।

अपरं[2] स्यन्दितं पार्श्वक्रान्तं तदनु दक्षिणम् ॥ १७६ ॥

वामं सूचीमपक्रान्तं दक्षिणं चरणं पुनः ।

भुजङ्गत्रासितं वाममतिक्रान्तं ततोऽपरम् ॥ १७७ ॥

उद्वृत्तममुमेवाङ्घ्रिमलातं वाममाचरेत् ।

पार्श्वक्रान्तक्रमं [3]सव्यं सूचीमन्यमनन्तरम् ॥ १७८ ॥

निक्षिप्य दक्षिणं वाममपक्रान्तोक्तमाचरेत ।

यत्र तत्स्याद्विचित्तास्यं[4] योग्यायां* विनियुज्यते ॥ १७९ ॥ (विचित्तम्)

कुर्वीत जनितं सव्यमूरुद्वृत्तं तमेव च ।

स्यन्दितं वाममुद्वृत्तं सव्यं वाममलातकम् ॥ १८० ॥

सव्य[5] सूचीं पुनर्वामं पार्श्वक्रान्तमनन्तरम् ।

आक्षिप्तं भ्रमरीदण्डपादं सव्यं क्रमात्ततः ॥ १८१ ॥

वामं सूचीं भ्रमर्यां च भुजङ्गत्रासितामिधम् ।

|सव्यवाममतिक्रान्ता यस्मिन् तद् विहतं मतम् (विहतम्) ॥ १८२ ॥

सूचीं वामेतरं कुर्युरपक्रान्त[6]मथापरम् ।

दण्डपादं ततः सव्यं सूचीपादं तु वामतः ॥ १८३ ॥

तमेव भ्रमरीं पार्श्वक्रान्तं वामेतरं ततः ।

आक्षिप्तं दण्डपादं च वामं सव्यं यथाक्रमम् ॥ १८४ ॥

---

1. A.B. र्यु 2. B. र. 3 सव्ये 4. A.B त्रके 5 A B गर्व 6. A.B. जांत

* योग्या means व्यायाम, physical exercises.

| Here A repeats three lines.

ऊरूद्वृत्तं ततः सव्यं सूचीं च भ्रमरीमपि ।
अलातं च यथा वामं पार्श्वक्रान्तं च दक्षिणम् ।
अतिक्रान्तं परं यत्र वामबन्धं तदीरितम् ॥ १८५ ॥ (वामबन्धम्)

ऊर्ध्वजानुकृतं कुर्यात् पादसूचीं च दक्षिणम् ।
अपक्रान्तं ततोऽप्यन्यं पार्श्वक्रान्तं तु दक्षिणम् ॥ १८६ ॥

अतिक्रान्तं ततोऽप्यन्यं पादसूचीं च दक्षिणम् ।
*अतिक्रान्तं ततो वामं पार्श्वक्रान्तं तु दक्षिणम् ॥ १८७ ॥

वामं पुनरतिक्रान्तं [1]छिन्नाख्यं करणं ततः ।
बाह्यभ्रमरकं वाममस्मिन् ललितसंचरे ॥ १८८ ॥ (ललितसंचरः)

दक्षिणं [2]चरणं सूचीमतिक्रान्तं तथापरम् ।
कुर्यात् सव्यं च वामं च पार्श्वक्रान्तक्रमं ततः ॥ १८९ ॥

पर्यायेणाथ चारीभिरेताभिः परितो भ्रमन्[3] ।
सूचीं वाममपक्रान्तं कुर्यात् सव्यमनन्तरम् ॥ १९० ॥

ततः सहजया गत्या[4] मण्डलाकारतो भ्रमेत्[5] ।
यत्र कान्ततरं क्रान्तं[6] व्यायामे नृत्तकोविदैः ॥ १९१ ॥ (क्रान्तम्)

चरणं दक्षिणं सूचीमपक्रान्तं ततोऽपरम् ।
[7]पार्श्वक्रान्तं ततः पूर्वं भुजङ्गत्रासितं च तत् ॥ १९२ ॥

1. A.B. चि 2. A.B. व 3. B. त् 4.B. त्य 5. B. मत् 6. A. क्रान्तं तदाक्रान्तं B. कान्तदरक्रान्त. 7. A.B. पार्श्वः

* Line missing in B.

अतिक्रान्तं ततो वाममाक्षिप्तं दक्षिणं पुनः ।
अलातं वामकं पार्श्वक्रान्तं वामेतरं ततः ॥ * १९३ ॥

अतिक्रान्तं तथा चोरुद्वृत्तं सूचीं च वामकम्[1] ।
अपक्रान्तं पुनर्वामः[2] यत्र[3] तल्ललितं[4] भवेत् ॥ १९४ ॥ (ललितम्)

॥ इत्याकाशमण्डलानि दश ॥

एतानि मण्डलानि[5] दर्शितानि समासतः[6] ।
अन्यौन्ययोजनाद् योग्य[7]चारीणां[8] चतुरा[9]शयैः ॥ १९५ ॥

अतः परमपि स्वैरं कल्प[10]नीयानि कान्यपि ।
तानि पूर्वोक्तलक्ष्या(क्ष्मा ?)णि(?) चारीभिस्त्वेकजातिभिः ॥ § १९६ ॥

* After this A. B. have eleven lines repeated from the definitions of Vāmabanda, Lalitasañcara and Krānta.

1. B. वामरुम् 2. A.B. न्तमपूर्वं 3. B. यन 4. A.B. तल्लितं
5. A.B. Foot wanting a syllable. 6. B. समन्तत:

Samāsataḥ is supported also by Bharata XII, end; on the other hand 'Samantataḥ' of B. may be suspected to carry a true variant, as '*Sama*' is given by Bharata and Abhinavagupta as an example of a mixed Maṇḍala which could be formed by the mixing of appropriate ones either of the Bhauma or the Ākāśa [group; but then the anvaya of the succeeding lines becomes difficult.

7. A. योजनार्योग्य B. योजनं योग्य 8. A. चारिणि B. चारिणी 9. B. रां
10. B. कम

§ The sense is these additional Maṇḍalas are composed by mixing different Cāris of the same class, Bhauma or Ākāśa. In पूर्वोक्तलक्ष्याणि an instrumental plural qualifiying चारीभिः is needed; also for 'lakṣya,' we should have a word meaning 'lakṣaṇa'.

एतानि खण्डसहितान्यपि मण्डलानि
[1]लीलांगयष्टिमधुराणि[2] मनोहराणि।
वाद्यानुगानि विविधानि बुधो[3] नियुद्धे
युद्धे[4]ऽथ नर्तनविधौ विधिवद्विदध्यात् ॥ १९७ ॥

[5]आवर्तकांतं ललितं विचित्रमास्कन्दितं कांतविधिं दधानम् ।
इत्यब्रवीन्मण्डललक्ष्म सुश्रीस्तुरंगतुल्यं[6] गजसैन्यनाथः ॥ १९८ ॥

इति श्रीमन्महाराज-गणपतिदेव-गजसाधनिक-जायसेनापति-
विरचितायां नृत्तरत्नावल्यां
चारीस्थानकमण्डललक्षणन्नाम
तृतीयोऽध्यायः

1. A.B. नी 2. A.B. मधुरंत 3. A.B. वुधः
But बुधैः accords not with the verb विदध्यात्. If 'बुधैः' is to be retained, it should be taken to mean 'with the help of the knowing' one should do them; the subject will then have to be taken as understood.

4. B. omitted. 5. B. अ 6. A.B. तुल्यां.
'Turaṅga- tulyam' : By Śleṣa, Maṇḍala is compared here to the 'horse'.

[अथ चतुर्थोऽध्यायः]

आश्लिष्यद्ध्वलितोरु[1]वर्त्तित[2]शिवाक्षिप्तस्फुरन्नूपुर[3]-
क्रान्तांघ्रिं हरिण[4]प्लुताश्रयकरं चंचद्भुजङ्गाञ्चितम् ।
पार्श्वक्रान्तपदापविद्धवृषभक्रीडोर्ध्वजानूत्सुकं
व्याचष्टे करणौघ[5]मद्रितनयाकान्तोपमं[6]* जायनः ॥ १ ॥

स्थानानां नृत्यहस्तानां चारीणां यस्समागमः[7] ।
उचितानां समाख्यातम्(ता?) सेयं करणमातृका[§] ॥ २ ॥

हस्ताङ्घ्रिप्रमुखानां तु पूर्वाधःकायवर्तिनाम्[8] ।
अंगानां क्षेत्रतः क्षेत्रप्राप्ति[9]रूपात्र या[10] क्रिया[11]§ ।
विलास[12]निर्ग(र्भ ?)रा नृत्त[13]करणं तदुदाहृतम् ॥ ३ ॥

भीमसेनाभिधा यद्वत् भीम इत्येकदेशतः† ।
विज्ञातव्यं[14] तथा नृत्त[15]करणं करणं त्विति ॥ ४ ॥

तलपुष्पपुटं[16] क्रान्तं[17] छिन्नं[18] समनखांचिते ।
[19]शकटास्यं कटिच्छिन्नमुद्धट्टितनिकुट्टके[20] ॥ ५ ॥

---

1. B. omits रु 2. B. वर्त्तत 3. B. भ्रुपुर 4. A.B. णा 5. A.B. करणौय 6. A.B. क्रान्तोपमं 7. B. तः 8. B. कार्यवर्तनाम् 9. A. प्राप्त 10. B. त्रिधा 11. A.B. क्रियाम् 12. A. सं 13. B. रान्नृत्त 14. B. विज्ञानयन् 15. B. त्तं 16. A.B. ट 17. A.B. तां 18. A. छन्न B. ळिन्न 19. B. च 20. A.B. ने

* There is comparison here by Śleṣa between Karaṇa and Śiva.

§ See N.Ś. IV. 59 (GOS.)

§ For this line, see the words of Abhinavagupta, Abhi. Bhā., GOS. I. p. 92, last but one line.

† For this also, see ibid., p. 93, ll. 2, 3.

ललितं वलितं[1] लीनं[2] स्खलितं चक्रमण्डलम् ।
निवेशं[3] स्वस्तिकं सूची विद्ध*मप्यर्धसूचिकम् ॥ ६ ॥

वक्षःस्वस्तिकमुन्मत्त[4]मर्धरेचितमर्ग[5]लम् ।
अर्धस्वस्तिकमावर्तं पृष्ठस्वस्तिकवर्त्तने ॥ ७ ॥

भुजंगांचितविष्कम्भे विक्षिप्तं दण्डरेचितम् ।
अर्धमत्तल्लिमत्तल्ली मदस्खलितलोलिते ॥ ८ ॥

प्रेङ्खोलितनितंबोर्ध्व[6]जानुपार्श्वनिकुट्टकम् ।
पार्श्वक्रान्तमपक्रान्तमतिक्रान्तं निकुञ्चितम् ॥ ९ ॥

विद्युद्भ्रान्तं कटिभ्रान्तमुरोमण्डलसन्नते ।
विनिवृत्तनिवृत्तापविद्धानि गरुडप्लुतम् ॥ १० ॥

ललाटतिलकं[7] दोल[8]पादं तल[9]§विलासितम् ।
तलसंस्फोटितं दण्डपक्ष[10]माक्षिप्तरेचितम् ॥ ११ ॥

जनितोपस्तृतोद्वृत्तान्यवहित्थनिशुंभिते[11] ।
[12]विक्षिप्ताक्षिप्तमाक्षिप्तं भुजङ्गत्रस्तरेचितम्[13] ॥ १२ ॥

1. A.B. व्यवलितं 2. B. नम 3. A.B. शा 4. B. मौन्मसु 5. A. ङ्ग 6. B. र्ध्वं 7. B. नीलकं 8. B. ला 9. B. नल 10. A.B. वक्ष 11. C. gap. निशुं missing. 12. A.B. तथा विक्षिप्तमाक्षिप्तं C. विक्षिताक्षिप्तं 13. C. Corrupt.

* By Viddha we have to understand Sūcividdha; or the line may be reconstructed as सूची सूचीविद्धार्धसूचिके ।

§ From here we have a third ms. in a fragment in the Royal Asiatic Society of Bengal, Calcutta; it is referrcd to as 'C'; as the writing in it is very incorreet, I do not refer in these footnotes to minor differences and obvious corruptions.

मण्डलस्वस्तिकं दण्डपादं पादापविद्धकम् ।
भुजङ्गत्रासितं विष्णुक्रान्तं स्वस्तिकरेचितम् ॥ १३ ॥

[1]एलकाक्रीडसंभ्रान्ते सिंहाकर्षितसर्पिते[2] ।
नागापसर्पितं पार्श्व[3]जानु वृश्चिकरेचितम् ॥ १४ ॥

[4]लतावृश्चिक[5]वैशाख[6]रेचिते हरिणप्लुतम् ।
दिक्स्वस्तिकगजक्रीडा[7]चतुराणि कटीसमम् ॥ १५ ॥

मयूरललितालाते सिंहविक्रीडकुंचिते[8] ।
वृश्चिकं व्यंसितं[9] कंप(?)परिवृत्त[10]विवर्त्तिते[11] ॥ १६ ॥

रेचकादि[12]निकुट्टोरूद्वृत्ते वृश्चिककुट्टितम् ।
तलसंघट्टितं[13] [14]गण्डसूची भ्रमरनूपुरे ॥ १७ ॥

घूर्णितं[15] वृषभक्रीडं करिहस्तं प्रसर्पितम् ।
[16]वलितोरुकगृध्रावलीने[17] अर्धनिकुट्टितम्[18] ॥ १८ ॥

गङ्गावतरणं चैवमुक्ता[19]न्यष्टोत्तरं शतम् ।
एतेषामेव मुख्यत्वं वाक्यार्थाभिनये सति ॥ १९ ॥

1. C. The line लतावृश्चिक etc. coming below is repeated here in corrupt form. From here C. shows a number of errors in the names of Karaṇas, but these errors are not noted here in these notes. 2. A.B. मर्द्दितसर्पते 3. A.B. र्श्व 4. A.B. ता 5. A.B. त 6. B. खे 7. A. जलक्रीडा B. जलक्रीड 8. B. तः 9. B. व्यसितं. After this A.B. have कंप and C. merely कं; there is however no gap in enumeration of Karaṇas. 10. B. वर्त्त 11. B. र्त्तते 12. A.B. रेचिकादी 13. B. gap. 14. A. खण्ड 15. A. पूर्तितं B. पूर्णितं 16. A. चलितोरुगक B. वलितोन्नक 17. A. लिने 18. A. कम् 19. A. चास्युरुत्ता B. चाशुरुत्ता C. चैव स्फुक्ता(?)

[1]पदार्थाभिनयेऽप्येकवाक्यार्थानुप्रवेशतः ।
आदौ मध्येऽवसाने वा कुर्यात्तानि यथोचितम् ॥ २० ॥

प्राधान्यख्यापनायेति रहस्यमिदमीरितम् ।
यत्राभिनयहस्तानां प्राधान्यं[2] करणे भवेत् ॥ २१ ॥

वाक्यार्थाभिनयस्तत्र कार्यो, नृत्ते[3] न केवले ।
नृत्त[4]हस्तप्रधानं तु करणं तत्र शस्यते ॥ २२ ॥

समपादं लताहस्तावंगस्य[5] चतुरश्रता ।
साधारणमिदं[6*] नृत्यप्रयोगारंभ इष्यते ॥ २३ ॥

करणेषूरसि[7] प्रायो वामः[8] स्यात् कटकामुखः ।
चरणस्यानुवादी तु करो[9] वामेतरो भवेत् ॥ २४ ॥

यदा वामकरस्यादौ प्रयोगः[10] स्यात्तदा पुनः ।
[11]वक्षःक्षेत्रे विधातव्यो लताहस्तस्तु दक्षिणः ॥ २५ ॥

चतुरश्रत्वहेतुत्वात् वैष्णवं केचिदूचिरे ।
करणाभिनयेष्वेषु हस्तो वा चरणोऽथवा ॥ २६ ॥
प्राथम्याद्दक्षिणः प्रोक्तो विशेषो यत्र नोच्यते ।

---

1. B. पादाकला C. वायार्था 2. C. This word omitted, but next word repeated. 3. A.B. त्ये 4. A. त्ते B. त्ये C. त्य 5. A.B. शस्त्व 6. A.B. gap of two letters. 7. A. उदितः B. उदितम् 8. B. म 9. A.B. रे 10. B. ग 11. A. पक्षक्षेत्रे

If the reading is वक्षःक्षेत्रे it goes with the previous line and Vāma-kara ; if it is पक्षक्षेत्रे, it would go with Latāhasta, the Dakṣiṇa-kara which follows.

C. gap indicated ; this line missing.

* See N.Ś. GOS. IV. 58 first line.

[अष्टोत्तरशतकरणलक्षणानि]

[1]तलपुष्पपुटं तत्स्यात् यत्राध्यर्धिकया पदम् ॥ २७ ॥

निष्क्रामेद्दक्षिणं पार्श्वव्यावृत्त्या समगौ करौ ।
परिवृत्त्या तयोर्वामं संनतं पार्श्वमागतौ[2] ॥ २८ ॥
वामस्तनसमक्षेत्रे स्यातां पुष्पपुटीकृतौ ।
तलसंचरपादश्च कर्त्तव्यः प्रोक्तलक्षणः[3] ॥ २९ ॥

तलमित्येकदेशेन ज्ञेयोऽत्र तलसंचरः ।
तेन पुष्पपुटं युक्तं तलपुष्पपुटं विदुः ॥ ३० ॥

एवं सर्वत्र विज्ञेयाः करणेषु निरुक्तयः ।
दीयते नर्तनारंभे देवेभ्यः कुसुमाञ्जलिः ॥ ३१ ॥
अनेन करणेनेति पूर्वमस्य[4] प्रकीर्त्तनम् ।
अन्ते मङ्गलरूपत्वात् गंगावतरणं स्मृतम् ॥ ३२ ॥ (तलपुष्पपुटम्) (१)

कृत्वा चारीमपक्रान्तां[5] पात्यमानं[6] निकुञ्चितम् ।
पृष्ठतः स्थापयित्वाङ्घ्रि पुरतस्तं प्रसारयन् ॥ ३३ ॥

व्यावर्तितेन[7] निष्क्रान्तमाक्षिप्तपरिवर्त्तितम् ।
करं वक्षसि तद्दिक्कं[8] विदध्यात्कंटकामुखम् ॥ ३४ ॥
यदाङ्गान्तरमप्येवं तदा क्रान्तमुदीरितम् ॥ (क्रान्तम्) (२)
वैशाखस्थानकं[9] यत्र [10]छिन्ना स्यात्क्रमशः[11]कटी ॥ ३५ ॥

1. C. Corrupt. 2. A.B. आततौ 3. C. Repeats the line. 4. C. ध्ये Corrupt. 5. A.B. तं C. Corrupt अत्तमत्तं 6. C. Corrupt. पत्पमानां 7. B. वर्तनेन 8. C. तं दिक्कं 9. C. के 10. B. छिन्न always as लि(ळि)न 11. C. त्क dropped here.

अलपद्मस्तथा पार्श्वक्षेत्रे तस्याः* करो भवेत् ।
तत्तालभञ्जने छिन्नमंगस्य प्रतिसारणे[1] ॥ ३६ ॥ (छिन्नम्) (३)

पादौ समनखश्लिष्टौ स्यातां यत्र लताकरौ ।
स्वभावावस्थितः काय:[2] स स्यात् समनखाभिधः ॥ ३७ ॥

नृत्यप्रवेशनारंभे विनियोगो[3]ऽस्य[4] संमतः ।
जपादिविषये[5] प्रोक्तो विचारविमुखैः परैः ‡ ॥ ३८ ॥

प्रलंबिताविति प्रोक्तौ भरतेनात्र यौ करौ ।
तौ [6]दोलाविति मन्यन्ते यत्तत्केचिन्न सांप्रतम् § ।
[7]शोकैकविषयावेताविति मन्यामहे वयम् ॥ ३९ ॥ (समनखम्) (४)

---

1. C. णैः 2. A.B. कार्यं 3. A. गे 4. A.B. प्य 5. B. यो 6. B. डो
7. B. Gap in this line; क and षयावे missing.

* तस्याः = कट्याः See Abhinavabhārati.

‡ See how close Jāya keeps to Abhinavagupta who says here (GOS. I. p. 100) जप्यमङ्गलादिविषये तु नास्य प्रयोगो युक्तः यथा कैश्चिदिष्टः ।

§ Here again Jāya bases himself on Abhinavagupta who interprets Pralambitahasta as Latā and adds: 'not Dolā', ibid. p 100: "प्रलम्बितौ करावितिलताहस्तौ मन्तव्यौ । न तु दोलाहस्तौ— ।" Then Abhinavagupta assigns the reason why it cannot be Dolā which too Jāya reproduces in the next line as: शोकैकविषयावेतौ (i e., दोलाहस्तौ). In the GOS. edn. however this portion is corrupt and the editor fails to note that the passage as printed makes no sense: तयोरेकविषययोरत्र etc. Here तयोरेक should read तयो: शोक. For Śoka as the application of Dolā; see section on Samyukta-hastas, N. Ś. IX, 149. (GOS. II) and our own text above p. 47, verse 188.

[1]उक्तोऽर्ध[2]स्वस्तिके हस्तो दक्षिणो यस्स एव चेत् ।
व्यावृत्त्या परिवृत्त्या[3] च नासादेशे[4]ऽलपद्मवत्[5] ॥ ४० ॥

अञ्चितांघ्र्यनुसारी स्यात्[6] तदञ्चितमुदाहृतम् ।
एतस्य संमुखीनात्म[7]विषये भृशकौतुकात्[8] ।
वाक्यार्थे विनियोगः स्यान्मतो[9] निर्वर्णनात्मके ॥ ४१ ॥ (अञ्चितम्[10]) (५)

[11]पादेन शकटास्यायां[12] § समं हस्तं प्रसारयेत्[13] ।
तद्विक्रमपरं कुर्याद्वक्षःस्थं[14] कटकामुखम् ॥ ४२ ॥

यत्र स्यात् शकटास्यं तत् क्रीडागोपालखेलने[15] * ।
[16]अभ्यधत्त करावत्र[17] भट्टतण्डु[18]स्तु रेचितौ[19] ॥ ४३ ॥

पादावादाय हस्ताभ्यां द्विस्त्रिः कुर्याद्गतागतम् ।
[20]शकटाकारतां बिभ्रदिति की(कै)र्तिधरं मतम् ॥ ४४ ॥ (शकटास्यम्)(६)

1. B. उक्ते 2. C. र्धः 3. A. and B. drop परिवृत्त्या 4. A.B. a gap wrongly indicated. 5. B. पवत् C. पंचवत्. 6. A. अंचितां व्यप्यनुसारि स्यात् B. अंचिताघ्र्यनु etc. C. अंचितांघ्रिणुसारी स्यात् 7. A.B.C. नाम 8. C. कम् 9. C. गतो 10. C. From here the Karaṇas are numbered. 11. A.B. पादे 12. A. शकटकस्याधः B. शकटस्याधः 13. A.C. यन् 14. A.B. पक्षस्थं 15. B. ने missing. 16. C. Before this C has in addition शकटाकारतां बिभ्र and drops अभ्य, the former additional pāda evidently repeated from below where it occurs. A. अभ्यकर्म B. ...धर्म 17. A.B. क्त 18. A.B. तण्ड C. Corrupt. 19. A.B. रेचिकौ 20. B. whole line missing.

§ शकटास्यायां means 'in the Cāri of that name.' See above ch. III. pp. 71-2, verses 26-27. *Cf.* S. Ratn. also VII. 747.

* The correct reading here may be क्रीडादौ बालखेलने *Cf.* Abhinavabhārati. I, p. 139, तथाविधबालक्रीडादिविषये, and S. Ratn. VII. 748 तादृशे बालखेलिते ।

[1]पार्श्वाभ्यां भ्रमरीं कृत्वा मण्डलस्थानकं भजन्[2] ।
दधच्छिन्नां कटिं छाया[3]मलपद्मपताकयोः‡ ॥ ४५ ॥

स्कन्धे च[4] विदधद्[5]हस्तं कुर्यादङ्गान्तरेण च[6] ।
द्विश्चतुर्वा क्रिया यत्र तत्कटिच्छिन्नमिष्यते ।
विस्मयात्मनि वाक्यार्थे विद्धिरेतद्विधीयते[7] ॥ ४६ ॥ (कटि[8]च्छिन्नम्) (७)

यस्मिन्नुद्धट्टिता[9]वङ्घ्री क्रमात्पार्श्वे च[10] सन्नते ।
दत्ततालतलौ[11] हस्तावेतदुद्धट्टितं मतम् ।
उत्सवानन्दनृत्ते[12]ऽस्य प्रयोगः परिकीर्तितः ॥ ४७ ॥ (उद्धट्टितम्) (८)

*मण्डल[13]स्थानके स्थित्वा चातुरश्र्याद[14]नन्तरम् ।
हस्तमुद्वेष्टितं सव्यं स्कन्धोद्देशे निकुट्टयेत्[15] ॥ ४८ ॥

तमेवोद्धट्टितं[16] पादं कुर्याद्वानं यथास्थितम् ।
पाणिपादमथाविद्धवक्र[17]वर्तनया करम्[18] ॥ ४९ ॥

1. B. तु found in addition. 2. B. मण्डदधन् 3. A.B. कटिलायां C. कटिछायां 4. C. omits च 5. विदधन् C. विदधतं 6. C. वै 7. B. विद्धि and then gap. 8. C. टी 9. A.B.C. — टिता 10. A. श्वैश्व C. श्वैव 11. C. हंतृ(?ता)निततलौ 12. A. नृत्येऽस्य B. नृत्यस्य C. – नृत्यनन्दस्य 13. B. gap; word missing. 14. B. चतुरश्राद 15. C.—यन् 16. A.B. टितं 17. A.B.C. वक्त्र. S. Ratn. Ānandāśrama edn. too वक्त्र, but it is wrong. 18. A. वर्तनकारणम् B. वर्तनका...

‡ 'Chāyā of Alapadma and Patākā' means 'Pallava', the hasta mentioned here by Bharata. Jāya closely follows Abhinavagupta's commentary here. (see GOS. I. p. 104)

* This closely follows the Abhinavabhāratī whose prose is simply turned here into verse, sometimes maintaining even the prose order. See Abhi. Bhā. I. p. 103.

[1]तमेव चतुरश्रं च, तस्यैव समकालतः ।
अंगं निकुट्टयेदन्यत् पूर्ववद्यत्र तत्स्मृतम्[2] ॥ ५० ॥

निकुट्टकं मुहुर्वाक्ये स्वस्य श्लाघा[3]प्रधानके [4] ।
[5]अलपद्मकनीयस्या:[6] पतनोत्पतनात्मकम् ।
[7]निकुट्टकमिह[8] ज्ञेयं स्कन्धे[9] कोहलसम्मतम् ॥ ५१ ॥ (निकुट्टकम्) (९)

कैशबन्धनितम्बाख्यहस्तयोरनुसारतः ।
असकृद्दक्षिणं हस्तमप[10]वर्तितमाचरेत् ॥ ५२ ॥

पादं चोद्धट्टितं कुर्याद्वामः करिकरः परः[11] ।
[12]मुहुरंगद्वयेनैष[13] यत्र तल्ललितं मतम् ।
स्यान्नृत्यनृत्तयोरस्य[14] प्रयोगस्सविलासयोः ॥ ५३ ॥ (ललितम्) (१०)

अपक्रामति देहस्य क्षेत्रात्सूचीमुखे करे ।
सूचीपादोऽप्यपक्रामेत् तद्दिक्को[15] भ्रमरी ततः ।
पुनरंगान्तरेणैव[16] यत्र तद्वलितं मतम् ॥ ५४ ॥ (वलितम्) (११)

*ऊर्ध्वमण्डलिनौ कृत्वा ततो वर्तनयानयोः ।
वक्षःस्थलेऽञ्जलिं कुर्यात् शिरो यत्र निहंचितम् ।
तल्लीनमिति विज्ञेयं प्रियायाः[17] प्रार्थनं प्रति ॥ ५५ ॥ (लीनम्) (१२)

---

1. B. Whole line missing. 2. A. त: 3. A. संघा 4. B. दानके 5. A. अनि B. आम्नि 6. C. करो यस्या: 7. A. निकु.....यं 8. C. ति 9. A.B. स्कन्ध C. स्कन्धेहं(?) 10. A.B.— मुप 11. A. वामं करिकरं परम् B. gap; परं lost. 12. B. gap; first two letters lost. C. मोहु 13. A.B. व 14. A.B.—रन्य 15. B. काद् 16. A.B. वं 17. B. प्रिययो:

* Closely follows Abhinavagupta.

गमनागमने दोलापादपादं[1] समाचरेत् ।

तद्वद्बाहुश्च[2] तद्विक्षो[3] हंसपक्षोपलक्षितः ।

एवमंगान्तरं यत्र स्खलितं तदुदाहृतम्[4] ॥ ५६ ॥ (स्खलितम्) (१३)

[5]स्खलिता प्रथमं चारी दोलालम्बितबाहुकः ।

पूर्वकायो नतो[6] यत्र चक्रवद्भ्रमणं[7] भवेत् ।

[8]अभ्यन्तरापवेधेन [9]तद्विद्याच्चक्रमण्डलम् ॥ ५७ ॥ (चक्रमण्डलम्)[10] (१४)

मण्डलस्थानकं वक्षो निर्भुग्नमवहित्थकः[11] ।

करो[12] वक्षःस्थितो यत्र निवेशो गजवाहने ॥ ५८ ॥ (निवेशम्) (१५)

*निष्क्रमय्य[13] करौ यस्मिन्नु[14]द्वेष्टितपुरस्सरौ ।

व्यावर्तने सहो[15]त्प्लुत्य करयोः पादयोरपि ॥ ५९ ॥

स्वस्तिकौ[16] युगपत्कुर्युः[17] तत्स्वस्तिकमुदाहृतम् ।

§अपरान्वेषणे वेगान्(गे?) निषेधे च[18] प्रयुज्यते ॥ ६० ॥(स्वस्तिकम्) (१६)

1. A.B. पादात्पादं 2. A.B. हुं च 3. C. क्षे 4. B. स्खल..... ...तम् । 5. B. सखविता 6. C. नता 7. C. तच्चक्रभ्रमणं 8. B. अ...त्तराप-वेधेन C. आभ्यन्तरायभेदेन 9. B. तद् द्विधा चक्र 10. A.B. omit चक्र 11. A.B. कम् 12. C. चरौ 13. A.B. निष्कमध्य 14. C. नमु 15. C. मनो 16. A.B.C. को 17. C. स्वस्ति.... i.e., the word कुर्युः is dropped and a gap is wrongly indicated after स्वास्ति ; then again स्तिक repeated. 18. A.B. न

* See Abhinavabhāratī, I. p. 106 (GOS.)

§ Abhi. Bhā. p. 106 ; युक्त्या द्वेषण there mistake for युक्त्यान्वेषण.

उत्थाप्य स्थाप्यते सूची चरणो[1]ऽस्पृष्टभूः पुरः[2] ।
तद्दिक्कः कटको वक्षस्यन्यः[3] शीर्षोऽलपल्लवः[4] ।
यस्मिन्नङ्गान्तरेणैवं[5] सूची तत् ..[6] विस्मये[7] ॥ ६१ ॥ (सूची) (१७)

‡सूचीपादोऽन्यपार्ष्णिस्थः वक्षःस्थः कटकामुखः ।
पक्षवञ्चितकोऽन्योऽर्धचन्द्रो वा कटिमाश्रितः ॥ ६२ ॥

हस्तस्याद्यत्र चिन्तादौ सूचीविद्धं तदिष्यते । (सूचीविद्धम्) (१८)
अर्धाङ्गेन कृते सूचिन्य[8]र्धसूची निगद्यते ॥ ६३ ॥ (अर्धसूची) (१९)

चतुरश्रावुरः[9]क्षेत्रे भवतो यत्र रेचितौ ।
व्यावर्त्त्य[10]क्रियया वक्षस्याभुग्ने[11] स्वस्तिकौ करौ ॥ ६४ ॥

पादौ च स्वस्तिकौ जंघागुल्फस्य वलनान्मिथः ।
तद्वक्षःस्वस्तिकं प्रोक्तं लज्जानुशयगोचरः ॥ ६५ ॥

उत्प्लुत्य घटयेत्पाणिपादेन स्वस्तिकाविति ।
ऊचे **कीर्तिधराचार्यः** क्वचिल्लक्ष्यनिरीक्षणात् ॥ ६६ ॥(वक्षःस्वस्तिकम्)(२०)

आविद्धमञ्चितं[12] पादं करौ च क्रमरेचितौ ।
यत्र कुर्यात्त[13]दुन्मत्तं[14] गर्वे[15] सौभाग्यजे[16] मतम् ॥ ६७ ॥(उन्मत्तम्)(२१)

---

1. A.B. परे C. स्यरणौ 2. A. स्पृष्टः भूः पुनः B. स्पष्टभूः पुरः C. स्पृष्टभूपुरः 3. A.B. न्व 4. A.B. थपल्लवम् 5. C. नेव 6. A.B. काल C. द्भाव which is itself not legible and carries also a correction like स्त्. The sense is probably not incomplete, for no use other than Vismaya is known for this. 7. A.B. योः C. येत् 8. C. सूचीन्य. Sometimes in this text itself, and elsewhere other writers read सूची as सूचिन् also. 9. A.B. ह C. र 10. A.B. र्त्ति 11. B. ग्न 12. A.B. वञ्चितं 13. A.B. कुर्युक्त 14. A.B.C. त्त 15. गुव्व 16. A. जं 1. B. जन् C. यं

‡ This and the three succeeding lines defining Sūcividdha and Ardhasūci are missing in A and B.

मण्डलस्थानके स्थित्वा वक्षःस्थं कटकामुखम् ।

सूच्यास्यनृत्तहस्तेनापसृत्यागच्छता युतम्[1] ॥ ६८ ॥

पार्श्वं च सन्नतं वामं बिभ्रत्पादं निकुट्टयेत् ।

यत्रार्धरेचितं तत्स्याद् असमञ्जसचेष्टिते ॥ ६९ ॥ (अर्धरेचितम्) (२२)

वामपादकनिष्ठायाः[2] क्षेत्रगो दक्षिणः पुनः ।

सार्धतालद्वयं स्रस्तजंघः[3] पादः प्रसारितः ॥ ७० ॥

तस्यैवानुगतस्तद्वद् बाहुस्स[4]न्नलपल्लवः ।

करो वामेतरो यत्र तदर्गलम्[5]दीरितम् ॥ ७१ ॥

एतदङ्गद[6]मुख्यानां ध्रुवङ्गानां परिक्रमे ।

पादो[7] नूपुरपादावत् पृष्ठतः प्रसृतस्ततः ॥ ७२ ॥

प्रसार्य पुरतः कार्यावुभौ पादानुगौ करौ ।

इत्यत्र करणे प्रोक्तं व्याख्याने **भट्टतण्डुना**[8] ॥ ७३ ॥ (अर्गलम्) (२३)

चरणौ स्वस्तिकौ हस्तः करिणो[9] यत्र[10] दक्षिणः ।

अपरो वक्षसःस्थाने तदर्धस्वस्तिकं विदुः ॥ ७४ ॥

1. A. धुतम् 2. C. यां 3. C. घा 4. A.B. स्त 5. A.B. तदुर्गळदु 6. A.B. दगन् 7. A.B. दे 8. A.B. भट्टन स्वरे C. भट्टकंतुना. Bhaṭṭa Taṇḍu, whose name is never correctly written, is a writer on Dance; also, Jāya quotes him often; see above verse 43, and below on other Karaṇas. 9. A.B. करणौ. The reference is to Karihasta. 10. A.B. word omitted.

सव्यं कीर्तिधराचार्य-भट्टतण्डु-पुरोगमाः ।

[1]कटिहस्तं पठन्त्यत्र व्याख्यानं तस्य कथ्यते ॥ ७५ ॥

अर्धचन्द्राभिधः कट्यां पक्षप्रद्योतकोऽथवा ।

पक्षवञ्चितको वापि यथाशोभं विधीयते ॥ ७६ ॥ (अर्धस्वस्तिकम्) (२४)

चापगत्या प्रयोगेन यत्र पादक्रिया भवेत् ।

डोलाप्रयोगतः किञ्चित्कृतोद्वेष्टापवेष्टनौ[2] ॥ ७७ ॥

करौ स्यातां तदावर्तं संत्रासादुपसर्पणे ।

रेचनं हस्तपादस्य **भट्टतण्डु**[3]रिहाब्रवीत् ॥ ७८ ॥

केचिदाहुः स्थिरावर्तामलातामपरे विदुः ।

ब्रूते **कीर्तिधराचार्यो** भ्रमरीमेव[4] लक्ष्यवित्[5] ॥ ७९ ॥ (आवर्तम्) (२५)

चारीं[6] कुर्वन्नपक्रान्तां[7] भुजावुद्वेष्ट्य[8] विक्षिपेत् ।

अपवेष्ट्योत्क्षिपन्नेव[9] सूचीमेकां[10]घ्रिणा भजेत्[11] ॥ ८० ॥

ततस्त्रिकविवर्तेन विदधीत पराङ्मुखः[12] ।

*पृष्ठे सव्यस्य पादस्य वामेन स्वस्तिकं यदा ॥ ८१ ॥

[13]पृष्ठस्वस्तिकमाख्यातं पृष्ठस्थान्वेषणे तदा ।

अन्ये स्वस्तिकमिच्छन्तः पृष्ठतः करयोरपि ॥ ८२ ॥

---

1 A.B.C. all read करि which is of course the same as what has already been given ; the correct reading is कटि and for coroboration, see also next line of text and Abhinavabhārati, I, p. 110. 2. A. कृते द्वेष्टौ प्रवेष्टनौ B. कृते द्वेष्टौ प्रवेष्टने 3. C कंन्नु 4. A.B. भ्रममेमव 5. C. लक्षयेत् 6. B. रा 7. A.B. ता 8. B.C. Corrupt. 9. C. तौ 10. A.B. वा 11. C. श्रयेत् 12. B. खम् 13. A B. प्रहर्षात्कार्य

* A.B. This line lost.

विनियोगं वदन्त्यस्य संग्रामस्य परिक्रमे ।*
आविद्धवक्रकौ[1] हस्तौ कृत्वांघ्रिं स्वस्तिकं ततः ॥ ८३ ॥

अपक्रान्तां[2] विधायार्धसूचिना परिवृत्य च ।
[3]सभ्याभिमुखपृष्ठोऽङ्घ्रिस्वस्तिकं रचितोत्प्लुतिः[4]§ ॥ ८४ ॥

हृदि कुर्यात्करं वामं पक्षवञ्चितकं परम् ।
परावृत्तं शिरश्चेत्थमत्र कीर्तिधरोऽभ्यधात् ॥ ८५ ॥ (पृष्ठस्वस्तिकम्) (२६)

उन्मुखौ स्वस्तिका[5]कारावश्लिष्टौ[6] मणिबन्धतः ।
वक्षःक्षेत्रे करौ कृत्वा तत्रैव युगपत्पुनः ॥ ८६ ॥

व्यावृत्तिपरिवृत्तिभ्यां पताकौ यत्र पातयेत् ।
स्वोर्वोरुत्तानितावेव[7] वर्त्तितं तत्प्रकीर्तितम् ‡ ॥ ८७ ॥

$आविद्धवर्तनाघृष्टा[8]वधस्तल[9]निपातितौ ।
** एतौ[10] यदा तदा रोषवाक्यार्थाभिनये मतम्[11] ॥ ८८ ॥

---

1. A.B. वक्वकौ 2. C. तं 3. A B. सन्ध्या 4. A.B. रेचितोप्लुतिः C. रचितोप्लुतिः 5. A B. कौ 6. A.B आश्लिष्टौ 7. A.B C नेव 8. A B. पृष्टा C. वृष्ट्या 9. C. वधमूला 10. C. omits this word. 11. A.B. मतौ C. मतं मतौ

* For this see Abhinavabhārati I, p. 107, ll. 8, 9.

§ Here A.B.C. repeat four lines from the definition of Ardhasvastika above referring to the alternate view of Kaṭihasta in place of Kari-hasta.

‡ The use for this is Asūyā. Jāya omits the use for this variety but gives a different use for the other variety that follows. See Abhinavabhārati I, p. 99.

$ The expressions "Āviddha-vartanau" and "Ghṛṣṭa" are in the Abhinavabhārati, I, p. 99, ll. 5, 6; the former has however been made part of the illustrative Prākṛt text by the editor.

** For the seven lines that follow, see Abhinavabhārati I, p. 99.

शुकतुण्डादयोऽप्यत्र प्रयोक्तव्या यथोचितम् ।
मुनिनाप्यत एवात्र विशेषो न निरूपितः[1] ॥ ८९ ॥

तत्राप्यनन्तरोक्तत्वात्तलपुष्पपुटादितः ।
पादोऽनुमत इत्येके मुनेराशयवेदिनः ॥ ९० ॥

कथयामासुराचार्याश्चरणं तलसंचरम्[2] ।
अपरे तु विदुः पादं हस्तौचित्यानुसारतः ॥ ९१ ॥ (वर्तितम्) (२७)

भुजङ्गत्रासिताङ्घ्रिः स्याद् दक्षिणो रेचितः करः ।
यत्र वामो लतासंज्ञः तद्भुजङ्गाञ्चितं भवेत् ॥ ९२ ॥ (भुजंगाञ्चितम्) (२८)

सव्यं सूचीमुखं[3] नृत्तहस्तोपगमपूर्वकम् ।
वामं वक्षःस्थितं दध्यात्[4] तद्दिक्कांघ्रिः[5] निकुट्टितः ॥ ९३ ॥

एवमंगान्तरं भूयः[6] सूचीपादो[7]*ऽलपल्लवः ।
निकुट्टितो दक्षिणः स्यात् करो वामो यथा पुरा[8] ।
इत्थं मुहुः[9] क्रिया यत्र तद्विष्कंभं[10] प्रकीर्तितम् ॥ ९४ ॥ (विष्कंभः) (२९)

सविद्युद्भ्रान्तया दण्डपादया चतसृष्वपि ।
दिक्षु पादस्य विक्षेपः कृतोद्वेष्टापवेष्टयोः ॥ ९५ ॥

[11]पादानुकूल्योः पाण्यो रेचनांचितयोरपि ।
क्रियते यत्र विक्षिप्तं तदुद्धतपरिक्रमे[12] ॥ ९६ ॥ (विक्षिप्तम्) (३०)

1. C. नाभिभू(भा?)षितः 2. A.B. Corrupt. 3. C. खो 4. A. दध्यत् B. दद्यात् C. विद्यात् 5. A. क्रोंह्रि B. घ्रि C. तद्दिक्पादो 6. A. भुय B. भूर 7. A.B. पाटो C. दौ 8. A. रः 9. B. मृदुः 10. A. भप्र 11. A.B. यदान्यकु 12. A.B C. मुपक्रमेत् । See Abhi. Bhā. I. p. 123, which is followed closely. Also S. Ratn. VII. 693.

* सूचीपादः = सूचीचारीविशिष्टः पादः । The whole definition here is based on the Abhi. Bhā. I. pp.137-8.

दण्डपादाभिधा चारी दण्डपक्षौ करावपि ।
यत्र रेचनसंयुक्तौ तद्भवेद्दण्डरेचितम् ।
[1]नृत्ते प्रमोदयुक्तेऽस्य[2] प्रयोगस्ताण्डवे[3] यथा ॥ ९७ ॥ (दण्डरेचितम्) (३१)

स्खलना[4]पसृतौ पादौ हंसपक्षो[5] द्रुतभ्रमः ।
वामः, सव्योऽर्धचन्द्रस्तु यत्र कट्यां विधीयते ॥ ९८ ॥

अर्धमत्तल्लि तत्त्वज्ञैः ज्ञेयं तत्तरुणे मदे ।
पक्षवञ्चितकं कट्यामत्र कीर्तिधरोऽब्रवीत् ।
हस्तं नितम्बमत्रैव परे[6] प्राहुर्मनीषिणः ॥ ९९ ॥ (अर्धमत्तल्लि) (३२)

[7]घूर्णमानस्य पादस्य यत्र स्यादुपसर्पणम्[8] ।
गुल्फस्वस्तिकपर्यन्तं तस्यैवानुचरः करः ॥ १०० ॥

उद्वेष्टितो नितबः स्यादेष पादोपसर्पणे ।
अपवेष्टितमादध्यादेवमङ्गा[9]न्तरेण च ।
क्रियैवं बहुशः प्रोक्ता तन्मत्तल्लि बुधैर्मदे ॥ १०१ ॥ (मत्तल्लि) (३३)

यत्र दोलौ[10] करौ स्यातां मस्तकं[11] परिवाहितम् ।
[12]पर्यायेन मुहुः पादौ स्वस्तिकीभूय विच्युतौ[13] ॥ १०२ ॥

[14]मदस्खलितमेतत्स्यात् प्रयोज्यं [15]मध्यमे मदे ।
अत्र भ्रमरिकाविद्धे चार्यौ[16] कीर्तिधरोऽभ्यधात् ॥१०३॥ (मदस्खलितम्)(३४)

1. C. This line missing up to the mention of the Karaṇa name. 2. B. क्तस्य 3. B. स्तवे 4. A.B. ना 5. A. क्षौ B. हंसषौ 6. B.C. र 7. A.B. पू 8. C. णे 9. A.B. देष मार्गा· 10. A.B.षौ 11. A. मध्यकं 12. A. वर्यायोग B. वार्यायोग 13. A. स्वस्तिके..... च्युतौ B. स्वस्तिके.....युतौ 14. A.B. gap in the first pāda after म. 15. A.B. ज्येर्म 16. A.B. चारीः

वैष्णवं स्थानकं हस्तो रेचितो[1]ऽन्योऽलपल्लवः ।
वक्षःस्थो लोलितं शीर्ष[2] विश्रान्तिः[3] पार्श्वयोः क्रमात् ॥ १०४ ॥

यत्र कुर्वीत तत्तज्ज्ञैः लोलितं प्रतिपा[4]दितम् ।
अत्र चारीमलाताख्यां भट्टतण्डुरमन्यत ॥ १०५ ॥ (लोलितम्) (३५)

[5]दोलापादाङ्घ्रिमादाय तदन्येनोत्प्लुतिं भजेत् ।
चारी[6]श्च भ्रमरी:[7] यत्र तत्प्रेङ्खोलितमीरितम् ॥१०६॥ (प्रेङ्खोलितम्)[8] (३६)

व्यावर्त्तितं[9] शिरोदेशमानीयाभिमुखाङ्गुली ।
पताके[10] परिवर्त्यैवं[11] निष्क्रामितभुजौ करौ ॥ १०७ ॥

यथास्वंमसयोन्यस्येदितरेतरसंमुखौ ।[12]
ततस्तौ यत्र कुर्वीत नितम्बौ[13] देहसम्मुखौ ।
[14]बद्धया सहिता चार्या तन्नितम्बं निरूपितम् ॥ १०८ ॥ (नितम्बम्) (३७)

यत्पार्श्वे स्वस्तिकौ हस्तौ [1]पर्यायेण निकुट्टितौ ।
उन्मुखाधोमुखौ[2] स्यातां तत्पादश्च निकुट्टितम् ॥ १११ ॥

यस्मिन्नङ्गान्तरेणैवं तत्स्यात्पार्श्वनिकुट्टितम् ।
प्रकाशाचरणाभ्यासवाक्यार्थाभिनये मतम् ॥ ११२ ॥ (पार्श्वनिकुट्टकम्) (३९)

यत्रान्यस्य पुरः पार्श्वक्रान्तायां[3] चरणं[4] क्षिपेत् ।
हस्तौ पादानुगौ[5] यद्वा[6] प्रयोज्याभिनयो[7]चितौ ।
पार्श्वक्रान्तमिदं रौद्रे भीमादेः[8] स्यात्परिक्रमे ॥ ११३ ॥ (पार्श्वक्रान्तम्) (४०)

यत्र चारीमतिक्रान्तां प्रयोगानुगतौ करौ ।
कुर्वीत तदतिक्रान्तमुद्धतस्य परिक्रमे ।
हस्तौ गरुडपक्षाख्यौ भट्टतण्डु[9]रिहाब्रवीत् ॥ ११४ ॥ (अतिक्रान्तम्) (४१)

[10]यत्र बद्धां[11] विधायापक्रान्तां चारीं समाचरेत् ।
प्रयोगानुगुणौ[12] हस्तौ तदपक्रान्तमीरितम् ॥ ११५ ॥ (अपक्रान्तम्) (४२)

वैष्णवं स्थानकं हस्तो रेचितो[1]ऽन्योऽलपल्लवः ।
वक्षःस्थो लोलितं शीर्ष[2] विश्रान्तिः[3] पार्श्वयोः क्रमात् ॥ १०४ ॥

यत्र कुर्वीत तत्तज्ज्ञैः लोलितं प्रतिपा[4]दितम् ।
अत्र चारीमलाताख्यां भट्टतण्डुरमन्यत ॥ १०५ ॥ (लोलितम्) (३५)

[5]दोलापादाङ्घ्रिमादाय तदन्येनोत्प्लुतिं भजेत् ।
चारी[6]श्च भ्रमरीः[7] यत्र तत्प्रेङ्खोलितमीरितम् ॥१०६॥ (प्रेङ्खोलितम्)[8] (३६)

व्यावर्त्तितं[9] शिरोदेशमानीयाभिमुखाङ्गुली ।
पताके[10] परिवर्त्त्यौर्ध्वे[11] निष्क्रामितभुजौ करौ ॥ १०७ ॥

यथास्वमंसयोन्यस्येदितरेतरसंमुखौ ।[12]
ततस्तौ यत्र कुर्वीत नितम्बौ[13] देहसम्मुखौ ।
[14]बद्धया सहिता चार्या तन्नितम्बं निरूपितम् ॥ १०८ ॥ (नितम्बम्) (३७)

ऊर्ध्वजानुं दधच्चारीं[15] पक्षवञ्चितमुन्मुखम् ।
अलपद्ममरालं वा निजस्योपरि जानुनः ॥ १०९ ॥

स्तनक्षेत्रे यथा यस्मिन् अपरं कटकामुखम् ।
वक्षःस्थलस्थितं कुर्याद् ऊर्ध्वजानु तदीरितम् ॥ ११० ॥ (ऊर्ध्वजानु) (३८)

1. B. ते 2. A.B. सर्षं 3. A.B. विभ्रान्तिः 4. A.B. चो 5. B. दोळः
6, 7. C. रीं Abhi. Bhā. and S. Ratn. have only singular.
8. C. Karaṇa name missing. 9. C. व्यावर्त्तेन 10. C. कौ
11. C. ध्वौं 12. C. gap after this; one line missing. 13. A.B. बा 14. A.B. gap. ब missing. 15. A.B. ....द्धायामासभिश्चर्यां C. बंधयामास सहिता चार्या तन्नितम्बन्यपितम्—hypermetric. 16. A. नु-रधरधश्चारीं

यत्पार्श्वे स्वस्तिकौ हस्तौ [1]पर्यायेण निकुट्टितौ ।
उन्मुखाधोमुखौ[2] स्यातां तत्पादश्च निकुट्टितम् ॥ १११ ॥

यस्मिन्नङ्गान्तरेणैवं तत्स्यात्पार्श्वनिकुट्टितम् ।
प्रकाशाचरणाभ्यासवाक्यार्थाभिनये मतम् ॥ ११२ ॥ (पार्श्वनिकुट्टकम्) (३९)

यत्रान्यस्य पुरः पार्श्वक्रान्तायां[3] चरणं[4] क्षिपेत् ।
हस्तौ पादानुगौ[5] यद्वा[6] प्रयोज्याभिनयो[7]चितौ ।
पार्श्वक्रान्तमिदं रौद्रे भीमादे:[8] स्यात्परिक्रमे ॥ ११३ ॥ (पार्श्वक्रान्तम्) (४०)

यत्र चारीमतिक्रान्तां प्रयोगानुगतौ करौ ।
कुर्वीत तदतिक्रान्तमुद्धतस्य परिक्रमे ।
हस्तौ गरुडपक्षाख्यौ भट्टतण्डु[9]रिहाब्रवीत् ॥ ११४ ॥ (अतिक्रान्तम्) (४१)

[10]यत्र बद्धां[11] विधायापक्रान्तां चारीं समाचरेत् ।
प्रयोगानुगुणौ[12] हस्तौ तदपक्रान्तमीरितम् ॥ ११५ ॥ (अपक्रान्तम्) (४२)

वृश्चिके करणे योऽसौ पादस्तं विधिवद्दधत् ।
एतद्विकमरालं च शिरसः पार्श्वतः करम् ॥ ११६ ॥

तथैवान्यमुरःक्षेत्रे नासिकाग्रानुसारिणम् ।
यत्र कुर्वीत तत्त्वज्ञैः निकुञ्चितमुदाहृतम् ॥ ११७ ॥

1. C. gap indicated; pāda missing. 2. 3. A.B. ख 4. A.B. चरण। 5. A B. गो 6. A.B. यद्वत् C. वद्वा. For यद्वा, the correct reading, see Abhi. Bhā. I. 125 (GOS.) 7. B. यौ 8. A.B. जौ 9. C. कन्तु 10. B. This verse missing. 11. B. बन्धां 12. C. नुमतौ

नासिकाग्रे पताकोऽन्यैः प्रोक्तस्सूचीमुखोऽपरः ।
[1]अत्रालपल्लवः कीर्तिधराचार्येण कीर्तितः ।
आकाशोत्पतनोत्कण्ठावितर्कादाविदं मतम्[2] ॥ ११८ ॥ (निकुंचितम्) (४३)

विद्युद्भ्रान्ता भवेद्यत्र चारी तद्वशगौ करौ ।
विद्युद्भ्रान्तं तदाख्यातमुद्धतस्य परिक्रमे ।
अत्र पादक्रियां केचित् सौकर्यात्पुरतो जगुः ॥ ११९ ॥ (विद्युद्भ्रान्तम्)(४४)

विधाय दक्षिणं सूचीं तं जवादपसारितम्[3] ।
पादं पार्श्वे क्षिपेत्[4] पृष्ठपरावृत्तेन कर्मणा ॥ १२० ॥

कटिमारेचयेद्यद्वा बाह्यतो भ्रमरीं दधत् ।
हस्तौ प्रयोगतः कुर्यात् व्यावृत्तपरिवर्तितौ ॥ १२१ ॥

[5]यत्रान्ते चातुरश्र्यं च कटिभ्रान्तं वदन्ति तत् ।
परिक्रमे गतीनां तत् तालेषु यति[6]पूरणे ॥ १२२ ॥ (कटिभ्रान्तम्) (४५)

[7]चारीं बद्धां[8] विधायास्यां स्वस्तिकस्यापसारणे[9] ।
स्थितावर्तावदादध्याद्[10] उरो[11]मण्डलिनौ करौ ।
यत्र तत्करणं प्रोक्तमुरोमण्डलसंज्ञकम् ॥ १२३ ॥ (उरोमण्डलम्) (४६)

हरिणप्लुतयोत्प्लुत्य पादयोः[12] स्वस्तिकं पुरः[13] ।
यत्र कुर्वीत हस्तौ तु दोलौ तत्[14] सन्नतं मतम् ॥ १२४ ॥

---

1. A.B. यत्र 2. A.B. र्कादवितं मदम् । 3. A.B.—सारतम् 4. A.B. पत् C. पन् 5. A. यत्कान्ते चतुरस्रं B. यद्भ्रान्तचतुरभ्रं 6. C. जति 7. A.B.C. चारी 8. A.B. बन्धां 9. C. णं 10. A.B.—र्त्मवधादध्यात् C. —र्तो यदादध्याद् 11. A.B. पुरो 12. A.B. यादयो 13. B. पुनः 14. C. दोलावत्

एतन्नीचस्वभावानामुपसर्पण[1]गोचरम् ।

[2] भट्टतण्डुरिति(?ह) ब्रूते पादवत्स्वस्तिकौ करौ ।

देहनत्या भुवं प्राप्ता(विति) कीर्तिधरोऽभ्यधात् ॥ १२५ ॥ (सन्नतम्)(४७)

पार्ष्णिभागे यदन्याङ्घ्रेः सूच्या[3] स्वस्तिकमाचरेत् ।

विवर्त्य त्रिकमेकत्र प्रत्यावृत्त्यैव[4]* पार्श्वतः ॥ १२६ ॥

ऊर्ध्वोल्लनमादध्याद् बद्धया रेचितौ करौ ।

विनिवृत्तं तदाम्नातमुद्धतस्य परिक्रमे ॥ १२७ ॥ (विनिवृत्तम्) (४८)

[5]पादमाक्षिप्तयाक्षिप्य ततो हस्तेन संयुतम्[6] ।

व्यावृत्तपरिवृत्तेन स्वदेहादपसारितम् ॥ १२८ ॥

[7]प्रत्यावर्त्य प्रकुर्वीत [8]भ्रमरीं रेचयत्करौ[9] ।

[10]यत्र तत्स्यान्निवृत्ताख्यमुद्धतस्य परिक्रमे ॥ १२९ ॥ (निवृत्तम्) (४९)

[11]चतुरश्रतया स्थित्वा सव्यमावर्तितं करम् ।

आक्षिप्तया विनिष्कास्य शुकतुण्डकृतं पुनः ॥ १३० ॥

स्वस्योरोः पृष्ठतो न्यस्येत्[12] ततस्तु कटकामुखम् ।

वक्षःस्थलस्थितं वामं वर्तनाचातुरीवशात् ।

[13]कुर्याद्यत्रापविद्धं तदसूयाकोपयोः स्मृतम् ॥ १३१ ॥ (अपविद्धम्) (५०)

1. C. Corrupt. 2. C. This verse omitted. 3. A. च्यां 4. A.B. विनिवृत्या च C. पत्या(or र्था)वृत्येव 5. C. Gap; first two words not written. 6. 7. C. Corrupt. 8. C. Gap; word left out. 9. C. Corrupt. 10. C. Gap. first word left out. 11. C. Almost every word in the lines on this Karaṇa is corrupt. 12. C. कृत्वा 13. A.B. आर्या

*'Pratyāvṛttyā' is in accordance with Abhinavagupta. (GOS. I. p. 124).

वृश्चिके करणे[1] हस्तो[2] लताख्यो[3] रेचितः परः[4] ।
वक्षस्समुद्धतं यत्र तदुक्तं गरुडप्लुतम् ॥ १३२ ॥

आहुरन्वर्थमेवास्य विनियोगं विचक्षणाः ।
पताकौ मणिबन्धान्ते मुहुरञ्चितकुञ्चितौ ।
यत्र लक्ष्यानुकूल्येन कथितौ भट्टतण्डुना ॥ १३३ ॥ (गरुडप्लुतम्) (५१)

अन्वर्थनाम यत्पृष्ठं वृश्चिकं चरणं यथा ।
तदङ्गुष्ठेन कुर्वीत यत्र भाले[5] विशेषकम् ।
ललाटतिलकं विद्याद् विद्याधरगताविदम् ॥ १३४ ॥ (ललाटतिलकः) (५२)

ऊर्ध्वजानुविधानेन पादमाधाय[6] कुञ्चितम् ।
दोलापादं भजन् दोलौ[7] प्रयोगवशगौ[8] करौ ।
यत्र कुर्वीत तत्तज्ज्ञैः दोलापादमुदीरितम् ॥ १३५ ॥ (दोलापादम्) (५३)

पार्श्वकर्णसमक्षेत्रे भवेत्पादस्समुत्थितः ।
ऊर्ध्वाङ्गुलितलोऽस्याग्रभाक् पताकाञ्चितस्थले ॥ १३६ ॥

यत्राङ्गान्तरमप्येवं तत्स्यात्तलविलासितम् ।
पादोद्धारामिधानेन सूत्रधारादिगोचरः ॥ १३७ ॥

भट्टतण्डुमते[9] ऽत्राङ्घ्रिसंगतौ युगपत्करौ ।
रेचितावस्य पार्श्वे स्तः करौ कीर्तिधरे मते[10] ॥१३८॥ (तलविलासितम्) (५४)

चार्यातिक्रान्तया दण्ड[11]पादया चा(वा?)ङ्घ्रिमुद्धृतम् ।[12]
द्रुतन्निपातयन्नग्रे, सशब्दं ताडयेन्मिथः ॥ १३९ ॥

1. A.B. णौ 2. A.B.C. स्तौ 3. A.B.C. ख्यौ 4. A. पुरः 5. A B. भावे 6. A.B. दाय 7. A.B. ला C. लैः 8. A. धयोयोगवशौ B. योयोगवशौ 9. C. Long gap from here up to the end of the 64th Karaṇa. 10.A.B. कीर्तिधरो मतौ 11. A.B. दस्त. 12. A.B. मुद्भिमः

करौ यत्र पताकौ तत् तलसंस्फोटितं[1] मतम् ।
हस्तेन हस्ततालेऽस्य[2] विनियोगः प्रकीर्तितः ॥१४०॥(तलसंस्फोटितम्)(५५)

ऊर्ध्वजानुलता[3]हस्तौ जानुन्येकस्तयोर्यदि ।
स्यादङ्गान्तरमप्येव दण्डपक्षं तदीरितम् ॥ १४१ ॥ (दण्डपक्षम्) (५६)

चतुरश्राख्ययोरेको व्यावृत्तकरणाश्रितः ।
ऊर्ध्वे[4] पार्श्वद्वये[5] क्षिप्तो हंसपक्षो द्रुतभ्रमः ॥ १४२ ॥

अधस्तल[6]करो नेयो [7]वक्षोदेशमथापरः ।
रेचितो बाह्यतः क्षेप्यः[8] तद्वशाच्चरणोऽञ्चितः[9] ॥ १४३ ॥

एकोऽपरस्तु सूच्याख्यो यस्मिन्नाक्षिप्तरेचितम्[10] ।
त्यागोपा[11]दानयोरर्थं तद्ज्ञेयं बहुशः कृते ॥ १४४ ॥(आक्षिप्तरेचितम्)(५७)

जनिताया: करो यत्र लताख्यो दक्षिणो भवेत् ।
जनितं तत्समस्तानां क्रियाणां[12] ज[13]निकं यतः ॥ १४५ ॥ (जनितम्) (५८)

अङ्घ्रिराक्षिप्तया युक्तो वामो यद्यपरं व्रजेत् ।
व्यावृत्तिपरिवृत्तिभ्यामरालत्वमुपागतः ।
तथा(थै?)वानुगतो हस्तो दक्षिणं पार्श्वमानतम् ॥ १४६ ॥

तदोपसृतमाख्यातं विनयेनो[14]पसर्पणे ।
अग्रतश्चरणौ कार्यौ क्रमाद्दोलौ करौ ततः ।
इत्यङ्गीकुरुतो भट्टतण्डुकीर्तिधराविह ॥ १४७ ॥ (उपसृतम्) (५९)

---

1. A.B. स्फोटनं 2. A.B. नालेऽस्य 3. A.B. लतौ 4. A. ऊर्ध्व 5. B. द्वन्द्वे 6. C. स्तलं 7. A.B. पक्षो 8. A.B. क्षेप्यो: 9. B. णोचितम् 10. A.B. रेचितौ 11. A.B. प 12. B. क्रियसौ 13. A. च 14. A. विनियोगो

[1]अपसार्य क्षिपेत्पादं[2] (हस्तं) चोद्वृत्तया सह ।
यस्मिन्नशेषमङ्गं च तदुद्वृत्तमुदाहृतम् ।
भट्टतण्डुरिहाक्षिप्तां चारीं पादक्रियां जगौ ॥ १४८ ॥ (उद्वृत्तम्) (६०)

कुर्वीत जनितां चारीं करावभि[3]मुखाङ्गुली ।
यत्तालपल्लवारालौ वक्षस्तटल्लाटयोः ॥ १४९ ॥

व्यावृत्तोद्वेष्टितौ[4] ग्राह्यौ(?)[5] कराभ्याम्[6](?) अवहित्थकम् ।
एतद्द्योपनवाक्यार्थे विद्वद्भिर्विनियुज्यते ।
अवहित्थकरं चात्र भट्टतण्डुरवोचत ॥ १५० ॥ (अवहित्थम्) (६१)

[7]अञ्चितं पादमन्याङ्घ्रेः पार्ष्णिभागे विनिक्षिपेत् ।
वक्षः स[8]मुन्नतं बिभ्रत् कटकामुखमध्यमाम्[9] ॥ १५१ ॥

कुर्यात्तिलकवत्फाले यत्र तत्स्यान्निशु[10]म्भितम् ।
अनेन करणेन स्यादभिनेयस्त्रिलोचनः ॥ १५२ ॥

अत्र कीर्तिधरस्त्वाह सूचीमुखमधोमुखम् ।
तस्याभिनयने हस्तो यस्मादयमुदीरितः ।
एतस्मिन् करणे पादं वृश्चिकं केचिदूचिरे ॥ १५३ ॥(निशु[11]म्भितम्)(६२)

1. A.B. उप 2. A.B. क्षिपत्पादे 3. A B. हि 4. A. तो B. ता
5. A.B. ग्राह्य 6. Why 'Karābhyām' again is not clear; for a fuller description of Avahitthaka, the movement of the hands to the sides and return back to chest-position is required to be stated. See Abhi. Bhā. I. pp. 135-6. S. Ratn. VII. 726-9. 7. 'कुञ्चितं' is proper here. 8. A.B. स्थ 9. 'Madhyamā' means 'Madhyamā aṅguli', the middle finger. 10. 11. A.B. कु

§व्यावृत्तकरणं येन करेण प्रविधीयते ।
तेनैव सह विक्षिप्तः[1] स एव चरणो बहिः ॥ १५४ ॥

आक्षेपे[2] हस्तपादस्य तस्यैव[3] परिवर्त्तनात् ।
अन्याङ्गे च भवेदेवं विक्षिप्ताक्षिप्तकाभिधे[4] ॥ १५५ ॥

एतन्नाट्याङ्गविच्छेदे प्रयोज्यं सन्धिगुप्तये ।
तालानामनु[5]सन्धाने गतीनां[6] वा परिक्रमे ॥ १५६ ॥

चारीणां वा नि[7]युद्धादौ सञ्चारेषु यथोचितम्* ।

---

1. A.B.C. प्त 2. A.B. प 3. B. व missing. 4. C.—काविधिः 5. C. मर्थ 6. B. नटानां 7. B. नि missing.

§ C. Gap up to this.

* For these applications, see Abhi. Bhā. I. p. 109, last three lines and also ibid p. 96, lines 3, 4. The S. Ratn. also reproduces these in VII. 624-5. I am afraid that Jāya has not understood Abhinavagupta clearly here when he seems to give these as alternate prayogas for Vikṣiptākṣipta. The correct meaning of Abhinavagupta is that while some would apply this Karaṇa for 'Abhinaya' in sentences signifying 'gamanāgamana', Abhinavagapta's teacher, i.e., Bhaṭṭa Tota, would opine that such Karanas as involve Abhinayahastas are to be used contextually for Abhinaya, but those Karaṇas (by implication and relevancy, such as the present Vikṣiptākṣipta) which involve pure Nṛttahastas and pure Vartanās are to be used in pure Nṛtta, an idea correctly reproduced by Jāya above in verses 21-22 under the scope and use of Karaṇas in general. The further remarks of Abhinavagupta are a supplement to Tota's view ; i.e., other teachers add that not only in Nṛtta in general, but in cases of break in continuity, in pauses in between Abhinayas, in gait-movements, in change over to a new Tāla, in stylised fight-movements and in

केचिद्गतागते‡ त्वस्य[1] विनियोगं प्रचक्षते ॥ १५७ ॥ (विक्षिप्ताक्षिप्तम्) (६३)

आक्षिप्तायां यदा चार्यां पादाक्षेपो द्रुतो[2] भवेत् ।
तदैव[3] चतुरः पाणिराक्षेप्यः कटकोऽथवा[4] ॥ १५८ ॥

यत्र पार्श्वं नतं किञ्चित् तदाक्षिप्तं प्रचक्षते ।
विहितो विनियोगोऽस्य विदूषकपरिक्रमे ॥ १५९ ॥ (आक्षिप्तम्) (६४)

भुजङ्गत्रासितौ हस्तौ रेचितौ वामपार्श्वगौ ।
यत्र कुर्वीत तत्प्रोक्तं भुजङ्गत्रस्तरेचितम् ॥१६०॥ (भुजङ्गत्रस्तरेचितम्) (६५)

विच्यवायाः प्रयोगेण सहोद्वेष्टितवर्तितौ ।
कृत्वोर्ध्वमण्डलौ[5] कुर्वन् कुर्वीत स्वस्तिकौ ततः ॥ १६१ ॥

बध्नीयान्मण्डलस्थानं मण्डलम्वस्तिकं भवेत्[6] । [(६६)
*विलासपरि[7]संख्याने प्रत्यक्षेऽर्थे[8] भवेदिदम् ॥ १६२ ॥ (मण्डलस्वस्तिकम्)

---

movements on stage in general, the Karaṇas such as the present Vikṣiptākṣipta involving pure Nṛttahastas are to be used. Śārṅgadeva understands all right for he says योज्यं करणमीदृशम् where the word 'idṛśam' makes all the difference.

1. C. अर्थस्य—significant variant but a grammatical misfit. 2. A. द्रुतं B. ऋतं 3. B. तदेव. 4. C. कटकामुखोऽथवा - hypermetric. 5. B. मङ्गलौ 6. C. काविधौ. 7. C. वति. 8. B. त्रे.

‡ 'गतागत' is the proyoga mentioned by some, that is, expressions involving 'abhinaya' of 'gatāgata', which statement gives rise to the further clarification on the use of Karaṇas in general by Abhinavagupta. 'Gatāgata' etc. here in Jāya is also from Abhi. Bha. I. p. 109, lines 6-7 from below, which are corrupt and wrongly punctuated in GOS, I. The lines should read thus:—
—द्वितीयस्य विक्षेपः । गमनागमनप्रधाने वाक्यार्थे चास्य प्रयोगः ।

* The use of the Karaṇa as made out from Jāya and Śārṅgadeva is 'graceful gazing or contemplation upon

§यत्र नूपुरपादोत्थां दण्डपादां समाचरेत् ।
हस्तं दण्डवदुत्क्षिप्तमन्तर्जङ्घं द्रुतं नयेत् [1] ॥ १६३ ॥

दण्डपादं समाख्यातं तत्साटोपपरिक्रमे ।
अत्रादौ जनिता[2] भट्टतण्डुकीर्तिधरोदिता[3] ॥ १६४ ॥

एकः स्यादूर्ध्वतः क्षिप्तः परो जंघामुपागतः ।
करोऽभवदिति प्राह भट्टतण्डुः प्रयोगवित् ॥ १६५ ॥ (दण्डपादम्) (६७)

पराङ्मुखौ यदा नाभिक्षेत्रे स्तः कटकामुखौ ।
सूचीपादः परः पादो विद्धापक्रान्तयान्वितः ।
भवेदेवं द्वितीयोऽपि तदा पादापविद्धकः ॥ १६६ ॥ (पादापविद्धकम्) (६८)

भुजङ्गत्रासितां कृत्वा व्यावृत्तपरिवृत्तकम् ।
एकं पादवशाद्[4] दोलमपरं कटकामुखम् ।
विदधीत यदा ज्ञेयं भुजङ्गत्रासितं तदा ॥ १६७ ॥ (भुजङ्गत्रासितम्) (६९)

यदाग्रे[5] कुञ्चितः पादः प्रसृतो गमनो[6]न्मुखः ।
रेचितौ स्तः[7] करौ विष्णुक्रान्तं तद्विक्रमे हरेः ॥१६८॥(विष्णुक्रान्तम्)(७०)

a thing in front.' The text of Abhi. Bhā. 'निकारवाक्यार्थाभिनये' is obviously corrupt.

1. C. Writing difficult ; last four syllables look like त्रितनयम्
2. C. तां. 3. C. ताः 4. C. ङशा. 'Eka' and 'Apara' here refer to 'Hasta' which is understood. 5. C. ग्र. 6. C. गगनो. 7.C. स्तौ. The line is rather corrupt.

§ Gap in A. and B. upto the closing words of the Karaṇa Sambhrānta.

प्रथमं रेचितौ पश्चाच्छीर्षाद् व्यावर्तनादधः[1] ।
नीत्वोर्ध्वं[2] परिवर्तेनाविद्धवक्त्रावुरस्यथ ॥ १६९ ॥

स्वस्तिकौ विप्रकीर्णौ च पक्षवञ्चितकौ ततः ।
पक्षप्रद्योतकौ नृत्तकर[3]षट्कमिति क्रमात्[4] ॥ १७० ॥

तत्करानुगता चारी स्थानमन्तेऽवहित्थकम् ।
यत्र तत्करणं प्रोक्तं बुधैः स्वस्तिकरेचितम् ।
*नृत्तत्वाभिनये मुख्ये प्रहर्षादौ प्रयुज्यते ॥१७१॥ (स्वस्तिकरेचितौ) (७१)

एलकाक्रीडिता पाते सन्नतं वलितं[5] वपुः ।
यत्र प्रयोगतो हस्तावेलकाक्रीडिताभिधा ।
अधमप्रकृतीनां तद्गमने विनियुज्यते ॥ १७२ ॥ (एलकाक्रीडितम्) (७२)

सममाविद्धया चार्या व्यावर्त्य परिवर्तितम् ।
ऊरुपृष्ठे करं[6] यत्र निदध्यादलपल्लवम् ॥ १७३ ॥

संभ्रान्तं कथयन्त्येतत्ससंभ्रमपरिक्रमे ।
पद्मकोशोऽथवात्र स्यादिति §कीर्तिधरोऽब्रवीत् ॥१७४॥ (संभ्रान्तम्) (७३)

वृश्चिकं चरणं कृत्वा मणिबन्धनिकुञ्चितौ ।
स्वस्तिकेन समायुक्तौ पद्मकोशौ यदा करौ ।
विदध्यादूर्णनाभौ वा वर्त्तनावशतः[7] पुनः ॥ १७५ ॥

---

1. C. Last letter difficult. 2. C. द्धें 3. C. नृत्यक्तिर. See Abhi. Bhā. I. p. 101 last line : एवं नृत्तहस्तषट्कात्मकमेतत् करणम् । 4. C. क्रमम्. 5. 6. 7. C. Corrupt.

* Means that it is to be used when Nṛtta itself is the main idea to be shown through abhinaya. cf. Abhi. Bhā. I. p. 102: यत्र नृत्तमेव प्राधान्येनाभिनेयम् ।

§ Gap in A:B. up to this.

अपसार्य क्रियामेतां कुर्यादङ्गान्तरं तथा ।
सिंहाकर्षितमाख्यातं सिंहव्याघ्रादिदर्शने[1] ॥ १७६ ॥

आवेष्टय[2] स्यन्दितां चारीमञ्चितौ मकरौ करौ ।
अत्र[3] कीर्तिधरो भट्टतण्डुर्नूपुरपादिकाम् ॥ १७७ ॥ (सिंहाकर्षितम्) (७४)

अञ्चितं पादमन्यस्य समीपादपसर्पयन्[4] ।
तद्दिक्कं रेचितं हस्तशिरश्च परिवाहितम्[5] ॥ १७८ ॥

कृत्वा[6] यत्र प्रकुर्वीत पुनरङ्गान्तरेण च ।
सर्पितं तद्भवेत्पाद[7]कृत[8]मत्तगतागते[9] ॥ १७९ ॥ (सर्पितम्) (७५)

रेचितौ च करौ[10] यत्र हंस[11]पक्षौ द्रुतभ्रमौ ।
चरणौ स्वस्तिकी[12]भूय विच्युतौ परिवाहितम् ॥ १८० ॥

शिरश्चेत्तरुणे [13]तत्स्यात् मदे नागापसर्पितम् ।
मत्तल्लियोगतः पादौ स्खलितावपसर्पितौ ।
उररीकुरुतो भट्टतण्डुकीर्तिधराविह ॥ १८१ ॥ (नागापसर्पितम्) (७६)

यस्मिन्समस्थितस्याङ्घ्रेरूरु[14]पृष्ठे व्यवस्थितः ।
अन्योऽङ्घ्रिरथ[15] वक्षःस्थो[16] मुष्टिः स्यादपरः करः ॥ १८२ ॥

1. C. Corrupt. 2. C. आकृष्य. 3. A.B. यत्र. A verb is to be understood here. 4. A.B. समीपादिसमर्पयन्. 5. A.B. क्रमपाहितम्. 6. A. तौ. B. ता. 7. A.B. पादं. 8. A.B. कर्षितं. 9. A. गद्गदे B. गद्गदेति. C गतागते, but not quite clear. *Cf.* Abhi. Bhā. I. p. 131. एतच्च पादकृतमदोपसर्पणविषयमिति । S. Ratn.—मत्तस्योपसर्पणापसर्पणे । 10. A.B. विनिवेतकरौ C. विधीयते करौ. 11. A.B. हस्त. 12. A. कौ. 13. A.B. यत्. 14. C. Corrupt. 15. A.B. तिम्रहणाथ C. — म्रेनाथ. 16. A. धोवा.

अर्धचन्द्रः कटीसंस्थः पार्श्वजानु तदीरितम् ।
बुधैर्युद्धे नियुद्धे च विनियोगोऽस्य कीर्तितः ॥ १८३ ॥

ऊरोरभ्यन्तरे पार्श्वे परपादाग्रसंस्थितिः(म्)[1] ।
भट्टतण्डुरिह ब्रूते पाठान्तरविलोकनात् ॥ १८४ ॥ (पार्श्वजानु) (७७)

हंसपक्षौ द्रुत[2]भ्रान्त्या रेचितौ भवतः करौ ।
स्वस्तिकौ विप्रकीर्णौ च यत्र पादस्तु वृश्चिकः ।
व्योमयाने[3] प्रयोक्तव्यमेतद्वृश्चिकरेचितम् ॥ १८५ ॥ (वृश्चिकरेचितम्) (७८)

*लतासंज्ञ(:) करो वामः पादश्च यदि वृश्चिकः ।
तल्लतावृश्चिकं प्रोक्तं पतने गगनादधः ‡ ।
§ वामो यतः(लता)प्रयोगः(गात्) स्याद् दक्षिणोऽत्र हृदि स्थितिः(तः)
॥ १८६ ॥ (लतावृश्चिकम्) (७९)

1. A.B. तः 2. A.B. कृत. 3. C. जातुने.

* The lines on Latāvṛścika and Vaiśākharecita are missing in A and B.

‡ 'Coming down from the skies' is the prayoga for this; the reading adopted by S. Ratn., Ānandāśrama edn., is wrong; the fn. reading there is nearer the correct one; Siṃhabhūpāla's gloss would warrant here the reading गमनोत्पतने (Adyar edn. Vol. IV. p. 217) which is all the more wrong.

§ The line is to be emended as indicated in the brackets; it refers to the poses of the two hands; Prayoga is the indicator and the left being in Latā, the right is to be placed at the chest.

वैशाखस्थानकं कुर्वन् ग्रीवापादकटिक्रमात् ।
रेचयेद्यत्र तद्धीरैः प्रोक्तं वैशाखरेचितम् ।
वैष्णवं स्थानमत्रादौ प्रोक्तं कीर्तिधरादिभिः ॥१८७॥ (वैशाखरेचितम्)(८०)

चार्या तदाख्यया ज्ञेयं करणं हरिणप्लुतम् ।
करौ सामान्यतः प्रोक्तौ वक्षःपादानुगाविह ।
चार्या एव द्विरावृत्त्या भट्टतण्डुरिदं जगौ ॥ १८८ ॥ (हरिणप्लुतम्) (८१)

कुर्यादत्रुटिताङ्गेन[1] *दिङ्मुखेषु[2] चतुर्ष्वपि ।
प्रत्येकं स्वस्तिकं यत्र तद्दिक्स्वस्तिकमुच्यते ॥ १८९ ॥

गीतस्य परिवर्त्तेषु विनियोगोऽस्य कीर्तितः ।
स्वस्तिकान्तरमप्येतद् उपजीव्य[3] प्रवर्त्तते ॥ १९० ॥ (दिक्स्वस्तिकम्)(८२)

कर्णान्ते[4] करि[5]हस्तस्य त्रिपताको यदाञ्चितः ।
दोला[6]पादा च चारी स्यादेवमङ्गान्तरे तदा ।
गजक्रीडितमाख्यातं गजो[7] येना[8]भिधीयते§ ॥ १९१ ॥ (गजक्रीडितम्)
(८३)

अलपद्मः[9] करो वामो वक्षःस्थः चतुरः परः[10] ।
भवेदुद्धट्टितः पादो यत्र तच्चरणं विदुः ।
विदूषकेण संसूच्ये विस्मयाभिनयादिके ॥ १९२ ॥ (चतुरम्) (८४)

1. A. कुर्यादवटितांगेन B. कुर्यात्रुटिताङ्गेन C. कुर्यादित्रितांगेन 2. A.B. खेन B. Gap of two letters after this. 3. A.B. डयवेष्टय 4. A. कर्णान्तो B. कण्ठान्तो 5. A.B.C. परि 6. C. Two letters in excess here. 7. A. जे B. ज 8. A.B. नैना C. जेना 9. C. द्म 10. C. पुनः

* The correct reading here is अत्रुटिताङ्गेन ; the basis in Bharata for this expression is श्लिष्टगतः । The Abhi. Bhā. (GOS. I. p. 107.) text त्रुटिताङ्गुष्ठेन is therefore corrupt:

§ 'अभिनीयते' woud be better, but no ms. has it.

यत्राक्षिप्तामपक्रान्तां चारीं कुर्वन् क्रमात्ततः ।
स्वस्तिकीभूय विश्लिष्टौ करौ नाभिकटीचरौ ॥ १९३ ॥

कटकाख्यार्धचन्द्राख्यौ[1] समुन्नतनते[2] क्रमात् ।
पार्श्वे वैष्णवमादध्यात् स्थानमेवं पुनर्विधिः[3] ॥ १९४ ॥

भवेदङ्गान्तरेणापि कीर्तितं तत्कटीसमम् ।
सूत्रधारप्रयोक्तव्ये जर्जरस्याभिमन्त्रणे[4] ॥ १९५ ॥ (कटीसमम्) (८५)

यत्राङ्घ्रिं वृश्चिकं कृत्वा पक्षवद्* रेचितौ करौ ।
निकुञ्च्याथान्यमेवोरुदेशे भ्रमरिकां भजेत् ।
मयूरललितं नृत्ते मयूरस्य तदिष्यते ॥ १९६ ॥ (मयूरललितम्) (८६)

दक्षिणेनांघ्रिणालातां कुर्वन्[5] तेनैव पाणिना ।
नितम्बं चतुरश्रं च विधाय क्रमशः करम् ॥ १९७ ॥

वामेन चरणेनोर्ध्वजानुचारीं प्रकल्पयेत् ।
वामाङ्गेनाऽपि कुर्वीत भूयोऽलतादिकं[6] क्रमम् ॥ १९८ ॥

यस्मिन्निदमलताख्यं ललिते नृत्त इष्यते ।
हित्वा नितम्बमत्राह[7] दोलं[8] कीर्तिधरः करम् ॥ १९९ ॥ (अलतम्) (८७)

1. A.B. ख्यो 2. B. तिते 3. A.B. धः 4. C. भिसंभ्रमम्. 5. C. Gap; three words missing. 6. A.B.—तिकं C. दिक 7. A.B. ब इत्याह 8. A.B. होलं C. शौलं

* A.B. पक्षचन्द्. 'पक्षवद्-' may be understood as 'हंसपक्षवद्-' according to the well-known principle of नामैकदेशग्रहणे नाम-मात्रग्रहण ; for Abhinavagupta specifies the hasta here as the Hamsapakṣa (GOS. I. p. 130).

अलाताङ्घ्रिं[1] पुरः कुर्यादूर्णनाभमपि द्रुतम् ।
यदाक्रान्तरमप्येवं सिंहविक्रीडितं तदा ॥ २०० ॥

विषयो[2]ऽस्य विनिर्दिष्टो रौद्र[3]प्रायः[4] परिक्रमः ।
तुल्यकालौ§ करावत्र स्यातां कैर्तिधरे मते ॥ २०१ ॥ (सिंहविक्रीडितम्) (८८)

तलसंचरभावेन पाद[5]श्चेद्दक्षिणो नतः[6] ।
अलपद्मतया[7] सव्यः कुञ्चितो वामतः कृतः ।
कुञ्चितं तत्परानन्दनिर्भराभिनये भवेत् ॥ २०२ ॥ (कुञ्चितम्) (८९)

अतीव नमितं[8] पृष्ठं[9] पादो[10] वृश्चिकपुच्छवत् ।
क्रमात्करिकरो[11] यत्र वृश्चिकं तदुदाहृतम् ।
इदमिन्द्रगजेन्द्रादिगतौ[12] स्याद् गगनांगणे[13] ॥ २०३ ॥ (वृश्चिकम्) (९०)

आलीढं स्थानकं हस्तौ स्यातां वक्षसि रेचितौ ।
सहोद्वेष्टापवेष्टाभ्यामूर्ध्वा[14]स्याधोमुखौ[15] क्रमात् ॥ २०४ ॥

विप्रकीर्णत्वमापन्नौ[16] यत्र तद्ध्वंसितं मतम् ।
[17]मारुतिप्रमुखप्रौढप्लवङ्गमपरिक्रमे ॥ २०५ ॥ (ध्वंसितम्) (९१)

ऊर्ध्वमण्डलिनौ सूचिचरणो[18] बद्धयांचितः ।
विचित्रत्वेन यत्रान्यपादे भवति वर्तितः ॥ २०६ ॥

1. B. ङ्घ्रीं 2. A.B. विष्टया 3. A.B.C. द्रः 4. A. प्रेयः B: पयः 5. A. B. दं C. Gap of one syllable after द 6. A.B. मतः 7. A. B. लो 8. B. वोन्नमितं 9 A.B. ष्ठ 10. A.B. दौ 11. A.B. रौ 12. A.B.C. हतौ 13. A. स्याट गणांकणे B. स्यात् गगणांकणे 14. A.B. उर्ध्वो C. मूर्ध्वो 15. C. खे 16. A.B. न्नो C. न्नु (?) 17. A.B.C. incorrect. 18. A B.C. णे

§ Probably तुल्याकारौ, 'hands with the same pose.'

भ्रमर्याथ त्रिकभ्रान्तिः परिवृत्तं तदीरितम् ।
अत्र कीर्तिधरो बाह्यभ्रमरीमपि मन्यते ॥ २०७ ॥ (परिवृत्तम्) (९२)

हस्तमाक्षिप्तपादं च त्रिकं यत्र विवर्त्तयेत् ।
रेचयेदपरं हस्तं कीर्तितं तद्विवर्तितम् ॥ २०८ ॥ (विवर्त्तितम्) (९३)

[1]रेचितो दक्षिणो हस्तः पादश्चोद्धट्टितो यदि ।
वामो दोलायते दोलः स्याद्रेचितनिकुट्टितम् ॥ २०९ ॥ (रेचकनिकुट्टितम्) (९४)

ऊरूद्वृत्तां दधच्चारीमरालकटकामुखौ ।
यत्र व्यावर्तितौ हस्तौ निक्षिपेच्चोरु[2]पृष्ठयोः ॥ २१० ॥

ऊरूद्वृत्तं भवेत्प्रेमकोपेर्ष्याप्रार्थनासु तत् ।
अत्र[3] हस्तः[4] पताकः स्यादिति कीर्तिधरं मतम् ॥ २११ ॥ (ऊरूद्वृत्तम्)(९५)

पदा वृश्चिकमाधाय स्वबाहुशिरसोः करौ ।
निकुट्टितौ विधीयेते पर्यायेणालपल्लवौ ॥ २१२ ॥

यदा तदा समा[5]म्नातं बुधैर्वृश्चिककुट्टितम् ।
*वावयार्थे विस्मयाकाशगमनेच्छाप्रधानके ॥ २१३ ॥ (वृश्चिककुट्टितम्) (९६)

दोलापादसमौ हस्तौ मिथस्संघट्टितौ तले ।
ततः[6] स्याद्वैष्णवं स्थानं कट्यां चेद्दक्षिणः करः ॥ २१४ ॥

1. C. The whole verse on Recakanikuṭṭita missing; the gap is indicated by the numbering of the Karaṇas. 2. A. योरु B. ध्योरु C. त्सोरु 3. A. तत्र B. तत्रा 4. B. हतः 5. C. तथा 6. तल. The text ततः स्यात् however does not go well with the further part of the line.

* Here A. and B. have an unindicated gap in which this last line of Vṛścikakuṭṭita and the definition of the next Talasaṅghaṭṭita are lost.

रेचितोऽन्यस्त्रिके[1] पार्श्वे तलसंघट्टितं तदा ।
अत्र कीर्तिधरो हस्तमूचे वक्षसि दक्षिणम् ॥ २१५ ॥ (तलसंघट्टितम्) (९७)

पादसूचीकरः क्षेत्रे वक्षसः कटकामुखम् ।
कपोलान्ते करोऽन्यः स्यादलपद्मतलाञ्चितः ॥ २१६ ॥

यत्र पार्श्वं नतं तज्ज्ञैः गण्डसूचि तदिष्यते ।
विनियोगोऽस्य मन्तव्यः कर्णगण्डास्य[2]मण्डने ॥ २१७ ॥

सूचीपादं परे प्राहुः कपोलप्रान्तगामिनम् ।
नृत्तहस्तोदितं सूचीमुखमन्ये प्रचक्षते ॥ २१८ ॥

तमसंयुतहस्तोक्तमपरे त्वमनुमन्वते[3] ।
त्रिपताकाभिधं[4] हस्तं भट्टतण्डुरभाषत ॥ २१९ ॥ (गण्डसूचि) (९८)

आक्षिप्तां[5] यत्र कुर्वाणः सममुद्वेष्टयन् करौ[6] ।
जङ्घयोः स्वस्तिकं कृत्वा कुर्वीत भ्रमरीं ततः ॥ २२० ॥

उल्बणौ वा करावेव द्वितीयाङ्गे पुनर्विधिः ।
भ्रमर्या[7] तद् बुधैर्ज्ञेयमुद्धतस्य परिक्रमे ॥ २२१ ॥ (भ्रमरम्) (९९)

विधाय भ्रमरीं चारीं कुर्वन्नूपुरपादिकाम्[8] ।
येन पादेन[9] तद्विद्धं हंसपक्षं[10] द्रुतभ्रमम्[11] ॥ २२२ ॥

---

1. न्योस्तिके. 2. A.B. ण्डस्य 3. B. न्यते 4. B. सं 5. A.B. क्षा
6. C. करः 7. C. रैः 8. A. वादिकां 9. B. वादेन 10. A.B. क्ष
11. A.C. द्रुतं भ्रमन् B. द्रुतभ्रमन्

हस्तमन्यल्लतासंज्ञं यत्र तन्नूपुरं विदुः ।
लताख्यौ रेचितौ चात्र स्यातां कैर्तिधरे मते ॥ २२३ ॥ (नूपुरम्) (१००)

ऊर्ध्वास्यः पार्श्वतः क्षेत्रे व्यावर्त्य परिवर्तयन् ।
अधोमुखं चतुर्दिक्कं भ्रमयन्दक्षिणं करम् ॥ २२४ ॥

जङ्घास्वस्तिकमादाय तद्दिक्कं चरणं दधत् ।
अपक्रान्तसमायुक्तं वामं दोलाभिधं[1] करम्[2] ॥ २२५ ॥

यत्र कुर्वीत तद्धीरैः [3]घूर्णितं परिकीर्तितम् ।
उत्प्लुत्य स्वस्तिकं कुर्यादत्र कैर्तिधरे मते ॥ २२६ ॥ [4](घूर्णितम्) (१०१)

[5]अलातां कुर्वतश्चारीं करौ कुर्वीत रेचितौ ।
व्यावृत्तकरणेनाथ कुञ्चितौ मणिबन्धकौ ॥ २२७ ॥

अलपद्मतलौ बाह्वो[6]श्शिरसो[7]रञ्चितौ स्थितौ ।
वृषभक्रीडितेऽत्राहुः[8] पताकावपरे करौ ॥ २२८ ॥ (वृषभक्रीडितम्)
(१०२)

वक्षःस्थः कटको वामः कर्णे[9] सोद्वेष्टनः परः[10] ।
त्रिपताकः करः पादः[11] तद्दिक्कसममञ्चितः[12] ।
यत्र निष्क्रामणीयः[13] स्यात् करिहस्तं तदीरितम् ॥ २२९ ॥ (करिहस्तम्)
(१०३)

यत्र वामो लतासंज्ञो रेचितः[14] [15]त्वपरः करः ।
तद्दिक्कोद्घृष्ट[16]भूः पादः[17] पादान्तरसमीपतः ॥ २३० ॥

---

1. A.B. धः 2. A.B. रः 3. A.B. पू 4. B. पू 5. C. Gap. Vṛṣabhakrīḍita left out ; consequent Karaṇa numbering also defective. 6. A.B. ह्यो 7. A.B. सौ 8. B. त्याहुः 9. A.C. र्ण 10. A.B. रम् 11. तत्त 12. A. समञ्चितः B. समन्वितः 13. A.B. या 14. A. ते 15. B. स्व 16. B. द्दृष्ट C. त्सृष्ट 17. A.B. दाः C. द

मन्दं मन्दं त(च?)रेदेव[1] भवेदन्यान्तरेण च ।
प्रसर्पितमिदं प्राहुः देवदत्तं(?)* निरूपणे ॥ २३१ ॥

अत्र पादद्वयस्यापि पार्श्वयोः[2] स्यात्प्रसर्प[3]णम् ।
यौगपद्यात्क्रमाच्चेति[4] भट्टतण्डुरभाषत ।
[5]समोसरितमत्तल्लीमत्र[6] कीर्तिधरः पुनः ॥ २३२ ॥ (प्रसर्पितम्) (१०४)

उरसो[7] यौगपद्येन कृत्वा व्यावर्तितौ करौ ।
[8]आनीयाक्षिप्तया सार्धं तत्रैव परिवर्तनात् ॥ २३३ ॥

स्थापयित्वा यदा[9] सम्यक्[10] शुकतुण्डाव[11]धस्तलौ ।
बद्धया [12]वावतिष्ठेत वल्गितोरु तदीरितम् ।
अपत्रपितमेतेन मुग्धायास्संप्रदर्श्यते[13] ॥ २३४ ॥ (वल्गितोरु) (१०५)

अङ्गुष्ठेन महीं चुम्बन्[14] किञ्चिदञ्चितजानुकः ।
[15]पृष्ठतः प्रसृतः[16] पादः पार्श्वगौ च लताकरौ[17] ॥ २३५ ॥

यत्र गृध्रावलीनं तत्[18] पृथुपक्षिनिरूपणे ।
तार्क्ष्यपक्षाविह प्रोक्तावु[19]चितौ भट्टतण्डुना ॥ २३६ ॥ (गृध्रावलीनम्)
(१०६)

1. A. मन्दमन्दतरेणैव 2. A.B. पादयो 3. A.B. र्पि 4. A. रोगवद्युक्रमा वेति B. रोगवद्युकमावेति 5. A. समा B. सम 6. A.B. न्त्र 7. C. सा 8. C. आलीढा 9. C. यदा repeated. 10. A. शुक्र , 11. A.B. यध 12. A. वाप B. पाघ 13. A.B. दृश्यते C. दर्शिते 14. B. मही चाद्यन् 15. A. मृ B. द्द 16. A. स्मत: 17. A.B. तारकौ 18. त 19. A. द्रु

* No other reading is possible in A.B. or C.; but 'देवदत्त' here is hardly satisfactory, for what exactly is wanted is 'movement in the skies or of beings moving in skies.' Could it be देवदूतनिरूपणे ?

[1]स्यान्निकुट्टकमेवार्धैनां[2]गेनार्धनिकुट्टकम् ।
अञ्चितावित्ति शब्देन क्रियावैशिष्ट्य[3]मीरितम् ॥ २३७ ॥

मुनिनैवालपद्मस्य स्मरता पूर्वलक्षणम् ।
स्वदेहाभिमुखं पृष्ठभागेनाकर्षणं[4] मतम् ॥ २३८ ॥

[5] शङ्ककप्रमुखै:[6] प्रोक्तमञ्चितं तन्न संगतम् ।
अप्ररूढनिजश्लाघारूप[7]वाक्ये तदिष्यते[8] ॥ २३९ ॥ (अर्धनिकुट्टकम्)
(१०७)

[9]अञ्चितं पादमत्यर्थमुत्क्षिप्यो[10]र्ध्वतलं तत:[11] ।
तस्योपरिकरौ[12] कार्यौ त्रिपताकावधस्तलौ ॥ २४० ॥

शिरश्च क्रमशो यत्र पादार्धमवरोपयेत् ।
गङ्गावतरणं विष्णो: पादाद्गङ्गावतारणे ॥ २४१ ॥ (गङ्गावतरणम्) (१०८)

विनियोगो[13] न येषूक्त:[14] करणेषु समासतः ।
[15]उद्धताङ्गतया स[16] स्यात् तत्रोद्धत[17]परिक्रमः ॥ २४२ ॥

वैशाखरेचितवशीकृतनृत्तलीलं[18] ।
सच्चक्रमण्डलकरं गरुडप्लुतोत्क्रम्[19] ।
विक्रान्त[20]कुञ्चितगतं[21] मुरवैरिरम्यं ।
श्रीजायनः करणलक्षणमभ्यधत्त ॥ २४३ ॥

---

1. A.B. सान्ति 2. B. ननां 3. A. ष्य 4. A.B. कविणं 5. A.B. सम्मुख C. संगक 6. A. खे B. ख 7. B. रू 8. A. नदिष्टयते C. तदीरितम् 9. A. क B. मु 10. B. ष्टो 11. B. तम् 12. A.B. रो. Then gap; next word missing. 13. A.B.C. गे 14. A. येषोक्त: B. येषान्त 15. C. उर्द्ध 16. A.B. तत् 17. A.B. ध्वंत C. त missing. 18. B. नील C. लीलां 19. A.B. प्लुतोकं. 20. A. विश्रान्त 21. A.B.—तन्मु After Kuñcita, one letter wanting; we may read—कुंचितगतं मुरवैरिरम्यं. C. कुंचितवरं. The verse has śleṣa between Karaṇa and Viṣṇu (Muravairin).

निष्पाद्यान्करणैरेभिः[1] अङ्गहारान्प्रचक्ष्महे[2] ।
चतुरश्रेण तालेन केचित् त्र्यश्रेण[3] केचन ॥ २४४ ॥

एते प्रयोजनीयाः स्युः व्याकीर्णा[4] मुनिनोदिताः[5] ।
विभज्य विविधानेतान् सोद्देशान्[6] ब्रूमहे[7] वयम् ॥ २४५ ॥

[8]व्यापारैः सहजैः[9] कापि स्यादेवं[10] करणं[11] सकृत् ।*
**नृत्यतीति परिज्ञानं तद्[12]द्वयेन[13] यतो भवेत् ।
करणद्वयसंयोगः ततः स्यान्नृत्तमातृका ॥ २४६ ॥

तद्[14] द्वे तिस्रश्चतस्रो[15] वेत्यङ्गहारः प्रकीर्त्तितः ।
इदं प्रायिकमाख्यातं कुत्रचिद्व्यभिचारतः[16] ॥ २४७ ॥

§[17]वाशब्देनोक्तवानत्र †न्यूनताधिकते मुनिः ।

---

1. B. रोहि 2. C. क्ष्यते 3. A. त्र्यम्रेण 4. B. व्याकर्णा 5. B. तम्
6. B. द्दशान् C. शं 7. A. भ्रमहे 8. C. व्यापयेत् 9. C. जं
10. B. C. वं. 11. B. णे 12. A B. त 13. B. द्वयेन
14. A.B. त 15. B. स्रा 16. A.B. रितः 17. A.B. वशवे

* The meaning appears to be 'Once a way, consequent upon some natural activities, one may assume the pose of a single Karaṇa.' 'स्यादेव' or 'स्यादेवं' in mss. may be read 'स्यादेकं'. But, as stated in the next line, it is with two Karaṇas that the sense of dancing starts.

** For these lines see Abhi. Bhā. I. p. 93.

§ The 'वा' referred to here is that in Bharata IV. 31 (GOS.): द्वाभ्यां त्रिभिश्चतुर्भिर्वाप्यङ्गहारस्तु मातृभिः । The Abhi. Bhā. text printed here: एवग्रहणाद् अन्यूनाधिकसंग्रहः may be read as वा-ग्रहणात् न्यूनताधिकसंग्रहः । See also S. Ratn. VII. 799. The text of Simhabhūpāla's gloss (Adyar edn. Vol. IV. p. 256) reads here 'वाशब्देन नियमः सूचितः इति व्याख्यातमभिनवगुप्तादिभिः ।' The correct reading here would be अनियमः ।

† After न्यू C. has a gap extending to several lines.

[1]केचिद् द्वित्रि[2]चतुःपञ्चकरणैः[3] सञ्चयान् [4]विदुः[4] ॥ २४८ ॥

[5]क्रमान्मातृ*कलापाख्य[6]खण्डसङ्घातकाभिधान् ।
करणानां यथाकामं षट्कं[7] सप्तकमष्टकम् ।
नवकं यावदे[8]तेषामङ्गहारो मतस्तदा ॥ २४९ ॥

करणानां विनिष्पन्नं(त्तौ?) प्रयोज्यानां न लक्ष्यते ।
यथा सन्धिस्तथा[9] हस्त[10]पादाद्यङ्गैः क्रियाक्रमः§ ॥ २५० ॥

वर्तनादि बुधैर्नृत्तमङ्ग[11]विद्भिः[12]विधीयताम् ।
अङ्गानां योग्यदेशेषु हरणेन निरुच्यते ॥ २५१ ॥

अङ्गहारोऽथवा हारः प्रयोगो[13] हरयोगतः ।
अंगनिर्वर्तनीयत्वादङ्गहारः प्रकीर्तितः‡ ॥ २५२ ॥

तथा च मुनये शंभोरादेशात्तण्डुरब्रवीत् ।
दृष्टादृष्टफलोपेतान् पूर्वरंगाञ्जनाय तान्[14] ॥ २५३ ॥

---

1. A. adds यथा. 2. A. वित्रि B. विचित्र 3. A. णेः B. णे 4. A.B. दः
5. A.B क्रममात्र 6. A.B. चाख्य 7. A. षष्टय B. षष्टयकं 8. A. दा
9. A.B. दा 10. A.B. स्तः 11. A. बुवैनृत्तरङ्ग B. यन्नृत्तरङ्ग
12. B. वद्भिः 13. A.B. गे 14. A.B. पूर्वमेवाञ्जनानतान्

‡ The word 'Sañcaya' itself here is from Abhi. Bhā. See GOS. I. p. 90. last line: तत्र करणानां पूर्वं लक्षणं तत्सञ्चयात्मकत्वात् ।

* मातृ = मातृका

§ These three lines are corrupt in A.B. Though the correct readings may be difficult of determination the meaning is clear and the lines are based on those of Abhi. Bhä. I. p. 92.

‡ See Abi. Bhā. I. p. 91.

पार्श्वच्छेदपरावृत्तगतिमण्डलसंकुलम् ।
[1]कुर्मो लक्ष्माङ्ग[2]हाराणामिदं कुलमिव द्विषाम् [3]† ॥ २५४ ॥

स्थिरहस्तः परिच्छिन्नः पार्श्वच्छेदोऽपराजितः ।
पर्यस्तभ्रमरालीढमत्त[4]क्रीडापसर्पिताः[5] ॥ २५५ ॥

[6]मदाद्विलसितो[7] विद्युद्भ्रान्त[8]वैशाखरेचितौ ।
सूचीविद्ध[9]क्षिप्तपार्श्वस्वस्तिकाच्छुरिता[10] इति ॥ २५६ ॥

चतुरश्रस्य मानेन षोडशामी प्रकीर्तिताः ।
गतिमण्डलविष्कम्भौ परावृत्ता[11]पविद्धकौ ॥ २५७ ॥

मत्तस्खलितसंभ्रान्ता[12]क्षिप्तरेचितरेचिताः ।
विष्कंभापसृतोऽलातो[13]द्वृत्ता[14]वर्धनिकुट्टकम् ॥ २५८ ॥

उद्घट्टितो वृश्चि*कापसृत[15]स्वस्तिकरेचिते ।
रेचितः परिवृत्त्यादिः त्र्यश्रमानेन षोडश[16] ॥ २५९ ॥

लक्षणेष्वङ्गहाराणां भरतेन समासतः ।
एकदेशग्रहेणोक्तः समग्रं करणं क्वचित् ॥ २६० ॥

आलोच्य तानहं व्यक्तं कथयाम्यनुपूर्वशः ।
क्रमाल्लीनं समनखं ततो[17] व्यंसितमाचरेत् ॥ २६१ ॥

---

1. A.B. कूर्मो 2. A. लक्ष्मावि B. लक्ष्मोङ्क 3. B. षम् 4. A.B. र्त्ता
5. A.B. सर्पता 6. A. मना B. मता 7. A.B. त्वसितो 8. A. न्तं
9. A.B. ध्वा 10. A.B. च्युरिता 11. B. वित्ता 12. A.B. न्ता:
13. B. न्तो 14. B. त्त 15 A.B. तं तत् 16. A.B. शी C. श:
17. A. करो B. करे

† There is śleṣa here between Aṅgahāra and Dviṣatkula, enemy-forces.

* Gap in C. extends up to this.

अत्र त्वपसृतावूर्ध्व[1]स्थानप्राप्तौ करावुभौ[2] ।

आलीढ[3]व्यत्ययेनास्य प्रत्यालीढं समाश्रयेत्[§] ॥ २६२ ॥

ऊरू द्वृत्तं[4] ततः कुर्यान्निकुट्टकपुरस्सरम्[5] ।

स्वस्तिकाक्षिप्तके पश्चान्नितम्बकटि[6]हस्तकम् ।

कटिच्छिन्नं च[7] यत्रैष स्थिरहस्तो हरप्रियः ॥ २६३ ॥

आदौ सर्वांगहाराणां कैश्चित्करणसञ्चयः ।

स्थिरहस्तोक्तलीनादिप्रत्यालीढान्त इष्यते[8]* ॥ २६४ ॥

करणान्यङ्गहारेषु प्रत्येकं चतसृष्वपि ।

दिक्षु कुर्यात्परावृत्त्या भ्रमणं करणं भजन्[9] ॥ २६५ ॥

[10]अन्त्यं तु करणद्वन्द्व सभामभिमुखः[11] सकृत् ।

रेचिते[12] परिवृत्तादाव[13]ङ्गहारेऽवदन्[14] 'मुनिः ॥ २६६ ॥

1. A.B. सृतन्नूर्ध्वं 3. A. कथावृतौ 3. A B. ढं. 4. C. त्ते 5. C. रः 6. A.C. परि 7. A. नद्वि C. नश्च 8. A. ढं तदिष्यते C. ढा तदीष्यते 9. A. प्रत्येकं भ्रमरं करम् । 10. A. भजन्नाद्यन्तकरणद्वंद्वं 11. A. सभातिमुखः C. सभापतिमुखं 12. A.C. तं 13. A.C. द्यं 14. A. रंगहारपदं C. अंगहारवदन्

§ After this B. has a long portion which does not pertain to Aṅgahāras or to the present work, but can be identified as belonging to the Saṅgitasudhākara of Haripāla.

* For this see Abhi. Bha. I. p. 142 under Paryastaka, introductory remarks: केचित् 'प्रसार्ये'त्यादिना 'प्रत्यालीढं ततः कुर्या'दित्यन्तं सर्वेष्वङ्गहारेषु प्रथमामितिकर्तव्यतां योजयन्ति । *Cf.* also S. Ratn. VII. 811.

पराङ्मुखविधिर्भूय एवमेव भवेदिह[1] ।
इत्यत्रत्येह[2]शब्देनामुमर्थं[3] पर्यभाषत § २६७ ॥ (स्थिरहस्तः) (१)

क्रमात्समनखच्छिन्नसंभ्रान्तानि विधाय चेत् ।
वामेनाङ्गेन कुर्वीत भ्रमराख्यार्धसूचिनी ॥ २६८ ॥

अतिक्रान्ताभिधं पश्चाद् भुजङ्गत्रासितं ततः ।
[4]करिहस्तं कटिच्छिन्नं परिच्छिन्नस्तदा भवेत् ॥२६९॥ (परिच्छिन्नः) (२)

करणं यत्र कुर्वीत पूर्वं वृश्चिककुट्टितम् ।
ऊर्ध्वजानुकमाक्षिप्तं स्वस्तिकं भ्रमणं त्रिके ॥ २७० ॥

उरोमण्डलकाभिख्यं नितम्बं करिहस्तकम् ।
कटिच्छिन्नं तमिच्छन्ति[5] पार्श्वच्छेदं विपश्चितः ॥ २७१ ॥ (पार्श्वच्छेदः) (३)

दण्डपादं यदा कुर्याद् व्यंसिताख्यं प्रसर्पितम् ।
निकुट्टार्धनिकुट्टाख्याक्षिप्तोरोमण्डलान्यथ ।
करिहस्तकटिच्छिन्ने तदा स्या[6]दपराजितः ॥ २७२ ॥ (अपराजितः)[7] (४)

तलपुष्पपुटात्पश्चादपविद्धाख्यवर्तिते ।
निकुट्टकं भवेदूरूद्वृत्तमाक्षिप्तकाभिधम् ॥ २७३ ॥

---

1. A. C. ति 2. C. त्वहापि 3. A. मुक्तं 4. A. C. र्कटि 5. A. छिन्न
6. A. ख्या 7. A. Name missing.

§ For these 4 lines see Abhi. Bhā. I. p. 142 and also more clearly ibid. p. 153: पराङ्मुखेत्यङ्गहारेषु मध्ये परिभाषमाणः मुनिरेतदाह– सर्वेष्वेव चाङ्गहारेषु पाश्चात्यं करणद्वयं वर्जयित्वा वर्तनीयानि करणानि; तानि चतुर्दिङ्मुखेषु प्रयुज्य संमुखमन्त्ये(न्त्य or न्त्येन) करणद्वयेन पूरयेदिति ।

उरोमण्डलनामाथ नितंबं करिहस्तकम् ।[1]

कटिच्छिन्नं च यत्र स्यात् पर्यस्तोऽयं भवप्रियः[2] ॥ २७४ ॥ (पर्यस्तः) (५)

*[[3]कृत्वा नूपुरपादं तु तथाक्षिप्तकमेव च ।

कटिच्छिन्नं च कर्तव्यं सूचीविद्धं नितम्बकम् ॥ २७५ ॥]

करिहस्ताभिधं तस्मादुरोमण्डलसंज्ञकम् ।

कटिच्छिन्नं[4]..... ॥ २७६ ॥ (भ्रमरः) (६)

विधाय व्यंसितं यत्र[5] प्रकुर्वीत निकुट्टकम्[6] ।

नूपुरं वामतोऽलाता[7]क्षिप्तके तु ततोऽन्यतः** ॥ २७७ ॥

उरोमण्डलकाभिख्यं करिहस्तसमाह्वयम् ।

कटिच्छिन्नं च यत्रायमालीढः परिकीर्तितः ॥ २७८ ॥ (आलीढः) (७)

भ्रमरान्नूपुरं तस्माद् भुजङ्गत्रासिताभिधम् ।

अङ्गेन दक्षिणेनैव ततो वैशाखरेचितम् ॥ २७९ ॥

आक्षिप्तकमथाच्छिन्नं वामेन भ्रमराभिधम् ।

[8]यत्रोरोमण्डलं कुर्यान्नितम्बं[9] करिहस्तकम्[10] ।

कटिच्छिन्न च संप्रोक्तो मत्ताक्रीडो हरप्रियः ॥ २८० ॥ (मत्ताक्रीडः) (८)

---

1. C. Haplography. The ms. jumps to the closing lines of the Angahāra Bhramara which has the same set of Karaṇas at the end. 2. C. Line missing. 3. A.B.C. Gap. 4. C. The further words of this line are not intelligible: चतुर्धाव (or त) सू (or मू) क्ष्माख्या हरति ततः। 5. B. यत्र missing. 6. C. Part of the word not written. 7. C. Corrupt. 8. C. Lines two and three of the definition of Mattākrīḍa repeated. 9. C. व 10. C. के

* Made up form Bharata's text.

** अन्यतः = दक्षिणेन; अलातमाक्षिप्तकं च । See Abhi. Bhā. I.p: 158.

क्रमात्कुर्यादपक्रान्तं[1] व्यंसितेन[2] करक्रियाम् ।
केवलं करिहस्तार्ध[3]सूचिविक्षिप्तकान्यथ ॥ २८१ ॥

कटिच्छिन्नाभिधानोरूद्वृत्तमाक्षिप्तनामकम्[4] ।
करिहस्तं कटिच्छिन्नमपसर्पितनामकः[5] ॥ २८२ ॥ (अपसर्पितः) (९)

मदस्खलितमत्तल्लितलसंस्फोटितानि चेत् ।
[6]गुम्फेन त्रिचतुःकृत्वा पञ्चकृत्वोऽथवा पुनः ॥ २८३ ॥

विदधीत निकुट्टोरूद्वृत्ताख्ये करिहस्तकम् ।
कटिच्छिन्नं समाख्यातो मदाद्विलसितस्तदा ॥ २८४ ॥ (मदाद्विलसितः) (१०)

अर्धसूचि भवेद्वामे विद्युद्भ्रान्तं तु दक्षिणे ।
व्यत्यासेन पुनर्द्वन्द्व[7]मेतच्छिन्नमतः परम् ॥ २८५ ॥

[8]वामेऽतिक्रान्तमादध्यात् लतावृश्चिकसंज्ञकम्[9] ।
कटिच्छिन्नं च[10] यत्रायं विद्युद्भ्रान्तः प्रकीर्तितः[11] ॥ २८६ ॥ (विद्युद्भ्रान्तः) (११)

अंगद्वयेन वैशाखरेचितं यत्र नूपुरम् ।
भुजङ्गत्रासितोन्मत्ते मण्डलस्वस्तिकाभिधम् ॥ २८७ ॥

निकुट्टकं ततः कुर्यादूरूद्वृत्तमतः परम् ।
[12]आक्षिप्तकाह्वयं[13] पश्चादुरोमण्डलसंज्ञकम् ।
करिहस्तकटिच्छिन्ने सोऽयं वैशाखरेचितः ॥ २८८ ॥ (वैशाखरेचितः) (१२)

---

1. A. न्तो C. न्तौ 2. C. ते तु 3. A. ख्य 4. A. मानकम् 5. A. कि C. कम् 6. A. गुल्फेन; Gumpha or cluster of Karaṇas is to be done; See Abhi. Bhā. I.p. 151. 7. C. र्द्वक in excess. 8. C. आक्षिप्तका in excess. 9. C. राजकम् 10. A. तु 11. C. म् 12. C. वामनिकोक्षिप्ता in excess. 13. C. यः and then एव च in excess.

कृत्वार्धसूचिविक्षिप्तमावर्तं च ततः परम् ।
कुर्यान्नितम्बवर्जानि पर्यस्तो[1]क्तानि षट् क्रमात् ।
निकुट्टादीनि यत्रायं सूचिविद्धः प्रकीर्तितः ॥ २८९ ॥ (सूचिविद्धः) (१३)

नूपुरं यत्र विक्षिप्तमलाताक्षिप्तके, भवेत् ।
ऊरोमण्डलकाभिख्यं नितम्बं करिहस्तकम् ।
कटिच्छिन्नं च कुर्वीत सोऽयमाक्षिप्तको मतः ॥ २९० ॥

यत्र यत्र पुनः शब्दं करणेऽत्राभ्यधात्[2] मुनिः ।
[3]प्रयोज्यत्वं जगुस्तत्र तस्याभिप्रायवेदिनः ॥ २९१ ॥*

इति न्यायेन विक्षिप्तालातकाक्षिप्तकाभिधम् ।
करणत्रयमत्रापि द्विः[4]प्रयोज्यत्वमर्हति ॥ २९२ ॥ (आक्षिप्तः) (१४)

दिक्स्वस्तिकाख्यमेकेन[5] पार्श्वेनार्धनिकुट्टकम् ।
अन्येनैतद्द्वयं[6] भूयो विदध्यादपविद्धकम् ॥ २९३ ॥

ऊरूद्वृत्ताख्यमा[7]क्षिप्तं[8] नितंबं करिहस्तकम् ।
कटिच्छिन्नं च[9] यत्रैष[10] पार्श्वस्वस्तिक इष्यते ॥ २९४ ॥ (पार्श्वस्वस्तिकः)
[11](१५)

---

1. A. चर्युस्तो C. पयस्तो । Abhi. Bhā. I. p. 143; the restoration there in brackets स्थिरहस्त इव should more properly be पर्यस्त इव 2. A. भिधा C. भिधात् 3. A. विप्र 4. B. Wrong substitute matter from Samgitasudhākara up to this. 5. C. के in this word dropped. 6. A.B C. नैकद्वयं 7. A.B. त्तामया 8. B. क्षा 9. C. reads after this in excess यथा पार्श्वाभिनर्तिकी (?) 10. C. omitted. 11. C. Unindicated gap form here to the number 16 of next Karaṇa Ācchurita; the entire definition of Ācchurita is thus lost.

* For this and the next two lines, see Abhi. Bhā. I. p. 145, lines 3, 4; 'द्वियोगम्' here should be 'द्वियोगम्.'

नूपुरभ्रमराभिख्ये व्यंसिताह्वमलातकम् ।
नितम्बमथ सूच्याख्यं करिहस्ताह्वयं ततः ।
कटिच्छिन्नं च यत्र स्याद् द्वयमाच्छुरितः स्मृतः ॥ २९५ ॥ (आच्छुरितः) (१६)

मण्डलस्वस्तिकं पूर्वं निवेशो[1]न्मत्तके ततः ।
उद्घट्टितकमत्तल्या[2]क्षिप्तोरो[3]मण्डलान्यथ[4] ।
कटिच्छिन्नं च कुर्वीत यत्रायं गतिमण्डलः ॥ २९६ ॥ (गतिमण्डलः) (१७)

कृत्वा निकुट्टितं यत्र[5] निकुञ्चितमथाञ्चितम्[6] ।
[7]द्वयमङ्गद्वयेनैव[8] कृत्वोरूद्वृत्त[9]माचरेत् ॥ २९७ ॥

पश्चादर्धनिकुट्टाख्यं[10] भुजङ्गत्रासितं ततः ।
किं चात्र[11] करणे हस्तौ चतुर्भिः करणैर्युतौ[12] *॥ २९८ ॥

[13]तदैव भ्रमणेनाथ[14] छिन्नामुभयतः कटिम्[15] ।
करिहस्तं कटिच्छिन्नं स विष्कम्भः प्रकीर्तितः ॥ २९९ ॥(विष्कम्भः)(१८)

---

1. C. नित्य and a gap of needless length; then मत्तके 2. C. corrupt. 3. A. रु 4. B.C. था 5. B. यत्र omitted. 6. A.B. —थोचितम् 7. C. य यं ययंग 8. A. नेन B. has an extra तत् । 9. B. वृत्त C. त्वोद्वृत्त 10. B. ख्यां 11. A.B. तत्र 12. A. ता C: पुनः 13. A.B.C. तदेव; for तदैव see Abhi. Bhā. here तत्समकालम् । 14. A. णेन्याथः B. णेन्याथ C. टेनाथ 15. B. टिः C. टी

* The hands in this Karaṇa are to be Udveṣṭita and thereby the Karaṇa itself attains four forms. This meaning of this apparently obscure line can be made out by reading it with the Abhi. Bhā. here (I. p. 146): भुजङ्गत्रासितं [illegible]र्चुर्विधम् । अत्र एवकारेण हस्तप्रयोगमनुक्तं निरूपयति करं चोद्वेष्टितमिति ।

जनितं[1] सव्यतः[2] कुर्यात् शकैटास्यमलातकम् ।
[3]भ्रमरं करिहस्तं तु गण्डं करनिकुट्टितम् ।
कटिच्छिन्ने च यत्रायं परावृत्तः प्रकीर्तितः ॥ ३०० ॥ (परावृत्तः) (१९)

अपविद्धाभिधात्[4] सूचिविद्धं कृत्वा ततः करम् ।
उद्वेष्टय[5]बद्धया चार्या[6] त्रिकभ्रमणमाचरेत् ॥ ३०१ ॥

ऊरूद्वृत्तमनेनैव कृत्वोरो[7]मण्डलं[8] ततः ।
कटिच्छिन्नं च कुर्वीत [9]यत्रायमपविद्धकः ॥ ३०२ ॥ (अपविद्धः) (२०)

कृत्वा मत्तल्लि [10]कुर्वीत गण्डसूच्यथ लीनकम् ।
अपविद्धं[11] द्रुतं पश्चात् तलसंस्फोटितं ततः ।
करिहस्तं कटिच्छिन्नं मत्तस्खलितसंज्ञके[12]॥ ३०३ ॥ (मत्तस्खलितः) (२१)

विक्षिप्तमञ्चितं गण्डसूचि[13] गङ्गावतारणम्[14] ।
क्रमात्कृत्वार्ध[15]सूच्याख्यं[16] दण्डपादञ्च वामतः ॥ ३०४ ॥

चतुरभ्रमराभिख्ये[17] नूपुराक्षिप्तनामनी[18] ।
अर्धस्वस्तिकनामाथ नितम्बं करिहस्तकम् ॥ ३०५ ॥

---

1. A.B. तः 2. B. सर्वतः 3. A.B. Unindicated gap; the rest of the definition of this Aṅgahāra, Parāvṛtta, lost, as also the first two lines of the definition of the following, the Apaviddha. 4. निधात् 5. ष्ट 6. सोर्द्ध 7. A. रे 8. B. लां 9. A.B. Gap again; last quarter of definition of Apaviddha lost. 10. A.B. start again here; this gap is through the haplography of कुर्वीत in this and the previous line. 11. A.B. द्ध 12. C. कं 13. A. चिं B. चितं C. ची 14. A.B. तरणम् 15. A.B.C. थ which is wrong. The Karaṇa to be used is Ardhasūci; see Ahi. Bhā. I. p. 11. 16. B. ख्यां 17. A.B. ख्यैः 18. A.B. नि

उरोमण्डलकं यत्र कटिच्छिन्नं समाचरेत् ।
संभ्रान्तं कथयन्त्येत[1]मङ्गहारं विचक्षणाः[2] ॥ ३०६ ॥ (संभ्रान्तः) (२२)

वैचित्र्येण प्रकुर्वीत यत्र स्वस्तिकरेचितम् ।
उरोमण्डलकं पार्श्वनिकुट्टितकटीसमे ॥ ३०७ ॥

घूर्णितं भ्रमरं सिंहाकर्षं वृश्चिकरेचितम् ।
सन्नतं पृष्ठदिग्वक्षः[3]पूर्वकं[4] स्वस्तिकं त्रिधा ॥ ३०८ ॥

नागापसर्पितञ्चेति करणान्य[5]ङ्घ्रिहस्तयोः ।
रेचितस्वस्तिकावाभ्या[6]मञ्चितानि त्रयोदश ॥ ३०९ ॥

उत्क्षेपयन्त्यथाक्षिप्तमूरूद्वृत्ताङ्घ्रिनाकृतम् ।
ललाटतिलकं दण्डपक्षं तलविलासितम् ॥ ३१० ॥

विद्युद्भ्रान्तं गजक्रीडं निशुंभितनितम्बके ।
विष्णुक्रान्ताभिधानोरो[7]मण्डलाख्ये नितम्बकम्[8] ॥ ३११ ॥

करिहस्तं कटिच्छिन्नं यथाशोभं यथारुचि[9] ।
विदधीत यथाप्रज्ञं सोऽयमाक्षिप्त[10]रेचितः ॥ ३१२ ॥

रेचितौ स्वस्तिकौ पादावित्यत्र वदतो मुनेः ।
[11]उद्दिष्टं करणं यद्यद्[12] रेचितं स्वस्तिकांचितम् ॥ ३१३ ॥

1. A.B. ह C. न्य 2. A.B. त् 3. B. श्लक्षः 4. A.B. पूर्व 5. A.B. द्य
6 A.B. पाभ्या 7. C. त्रु 8. B. के 9. C. चिः 10. A. मुक्षिप्त
11. A.B. प्र C. वाद्दिष्टं. 12. C. जज्ञे

पुनरुत्क्षेपणं चेति वदतोऽस्य मतानि तु ।
करणानि समुत्क्षेपसमायुक्तानि कान्यपि ॥ ३१४ ॥ (आक्षिप्तरेचितः)*

(२३)

[1]दण्डवृश्चिकवैशाखाक्षिप्तार्धस्वस्तिकादिकम् ।
षड्विधं रेचितं वक्षः[2]स्वस्तिकं गरुडप्लुतम् ॥ ३१५ ॥

सर्पितं [3]स्खलितोन्मत्ते [4]प्रसर्पितविवर्तिते[5] ।
विनिवृत्तविवृत्तार्ध[6]मत्तल्लिव्यंसिता[7]न्यथ ॥ ३१६ ॥

लोलितं वृषभक्रीडं भुजङ्गाञ्चित[8]नूपुरे[9] ।
तलसङ्घट्टिताभिख्यं[10] मयूरललिताभिधम् ॥ ३१७ ॥

रेचितादिनिकुट्टाख्यं भुजङ्ग[11]त्रस्तरेचितम् ।
इत्येतानि सकृत्कृत्वा करणानि चतुर्ष्वपि ॥ ३१८ ॥

दिङ्मुखेषु यथाशोभं यथाबुद्धि यथारुचि[12] ।
मध्येमध्ये प्रयुञ्जानः शोभार्थं चक्रमण्डलम् ॥ ३१९ ॥

उरोमण्डलकं कुर्याद्§ यत्र[13] प्रथमदिङ्मुखे[14] ।
कटिच्छिन्नाभिधाने च सोऽयं रेचित उच्यते ॥ ३२० ॥

1. B. दण्डवत् 2. B. चक्ष 3. A. खलितो B. खनितो 4. A.B. प
5. A.B. निवर्तिते C. विवर्त्तितम् 6. B. विवत्तीर्थ 7. B. व्यंहिता C. विशिता 8. B. ङ्ग्यत 9. C. रं. 10. A.B.C. ख्या 11. A.B. म 12. C. चि: 13. A.B. has मन्दी in addition, but probably parts of the next word प्रथमदिङ्मुखे strayed. 14. A. पृथङ्-मुख: B. प्रथङ्मुख: C. प्रथमदिङ्मुखम्

* This is a very long and confusing Aṅgahāra; Abhinavagupta is followed by Śārṅgadeva and Jāya but not strictly by either.

§ See Abhi. Bhā. I. p. 159, last 5 lines and p. 160, first 4 lines.

कुतोऽयं[1] मुनिनानुक्तप्रपञ्च इति चेच्छृणु ।
'रेचितं करणं कुर्याद्'[2] इति यन्मुनिरब्रवीत् ॥ ३२१ ॥

क्वचिद्रेचितसंज्ञं तत् करणं न हि दृश्यते ।
अतस्तत्करणं वाच्यं[3] यद्यद्[4]रेचित[5]हस्तवत्* ॥ ३२२ ॥

यदत्राक्षिप्तवैशाख[6]पूर्वके रेचिते[7] पुनः ।
आह कीर्तिधराचार्यस्तद्भवेन्नातिपेशलम् ॥ ३२३ ॥

करणैः पञ्चविंशत्या रचितो[8] रेचिताभिधः[9] ।
विचित्रभेद[10]संकीर्णो‡ यतोऽन्यत्र विशेष्यते§ ॥ ३२४ ॥ (रेचितः) (२४)

निकुट्टार्धनिकुट्टाख्ये पश्चादङ्गद्वयेन तु[11] ।
भुजङ्गत्रासिताभिख्य[12]भुजङ्गत्रस्तरेचिते[13] ॥ ३२५ ॥

तत आक्षिप्तकं[14] कुर्यादुरोमण्डलसंज्ञकम् ।
कटिच्छिन्न[15]मिह त्वङ्गपर्यायेण लताकरौ ।
यस्मिन्नेष समाख्यातो विष्कंभापसृताभिधः ॥ ३२६ ॥ (विष्कम्भापसृतः) (२५)

---

1. A. यन् 2. A.B. कुर्याम् C. कार्यम्. Kuryām is wrong; Bharata's text has both readings कुर्यात् and कार्यम् (IV. 237, GOS. I.)
3. A.B. बाह्यं C. वायुं 4. C. जंयद् 5. A.B. रचित 6. A.B खा
7. A. तः C. रेचिके. 8. A.B. रपितः C. रेचितः 9. C. समुदाहृतः
10. B. दं 11. A. तं 12. A.B.C. ख्या 13. C. तं 14. B. ग 15. C. न्ना

* See Ahi. Bhā. I. p. 158, last 2 lines and p. 159, first line.

‡ See Abhi. Bhā. I. p. 159 line 3 for the exact expression. 'यतोऽन्यत्र विशेष्यते' refers to Abhinavagupta's observation and quotation here from a Śiva-hymn, to substantiate his interpretation of the simple Recita in Bharata as the Karaṇas involving Recita and the whole Aṅgahāra as comprising numerous variegated Karaṇas: अत एवायं विचित्रभेदसंकीर्णोऽङ्गहारः । तथा चान्यत्र श्रूयते—**पञ्चविंशति-विचित्र.....प्रक्रमेण विविधं व्यरीरचत् । रेचिताङ्गहरणं महेश्वरो योगमार्गमिव सप्तभिः स्वरैः ॥**

§. See Abhi. Bha. I. p. 147.

विधाय स्वस्तिकं[1] यत्र व्यंसितं[2] द्विः[3] समाचरेत्[4] ।
अनन्तरमलाताख्यमूर्ध्वजानु निकुञ्चितम्[5] ॥ ३२७ ॥

अथार्धसूचि विक्षिप्तमुद्वृत्ताक्षिप्तके ततः ।
करिहस्तं कटिच्छिन्नमलातोऽसौ निगद्यते ॥ ३२८ ॥ (अलातः) (२६)

नूपुराख्यमथाङ्काभ्यां भुजङ्गाञ्चितकं ततः[6] ।
गृध्रावलीनकं पश्चाद् विक्षिप्तोद्वृत्तयोर्द्वयम्[7] ॥ ३२९ ॥

[8]एकेनाङ्गेन कृत्वैतत् परेणापि समाचरेत् ।
[9]सूचि नाम नितम्बाख्यं लतावृश्चिकसंज्ञितम् ।
कटिच्छिन्नाभिधानं च यत्रो[10]द्वृत्तस्स इष्यते ॥ ३३० ॥ (उद्वृत्तः) (२७)

[11]नूपुराख्यविवृत्ताख्ये[12] निकुट्टार्धनिकुट्टके ।
रेचकादि[13]निकुट्टाख्यं पार्श्वपूर्वनिकुट्टकम् ॥ ३३१ ॥

अर्धरेचितकाभिख्यं पश्चाद्वृश्चिककुट्टितम् ।
अतः परमुरःपूर्वं मण्डलं करिहस्तकम् ।
कटिच्छिन्नं च[14] यत्र[15] स्यादयमर्धनिकुट्टकम् ॥३३२॥(अर्धनिकुट्टकम्)(२८)

कृत्वा निकुट्टकं यस्मिन् उरोमण्डलमाचरेत् ।
[16]नितम्ब[17]करिहस्ताख्य[18]कटिच्छिन्नानि च क्रमात् ।
तमुद्धट्टित[19]नामानमङ्गहारं प्रचक्षते ॥ ३३३ ॥ (उद्धट्टितः) (२९)

1. C. रेचितं which is wrong. 2 A.B. त C. विशितं । 3. A.B. वा 4. A. repeats six lines here. 5. C. ते taking this as a compound word with the previous. 6. A. ञ्चिकन्तुतः B. ञ्चितकञ्चुकः 7. A. र्दयम् B. द्वयम् 8. A.B. एतेन 9. A. सूची नाम B. सूचीनां 10. B. यत्रयो 11. A B. तारापुराख्य 12. A. वृत्तार्ध B. वृत्तार्धं C. विवृत्तानाम् 13. A.B. दी 14. B. च missing. 15. B. त्रा 16. A.B. Gap but only one letter actually missing. 17. A.B. तंय 18. A.B. ख्यं· 19. B. टित

लतावृश्चिकमाधाय[1] विदधीत निकुञ्चितम् ।
मत्तल्लथ[2] नितम्बाख्यं[3] करिहस्तमतः परम् ॥ ३३४ ॥

कटिच्छिन्नं च यत्रायं वृश्चिकापसृतः स्मृतः ।
नितम्बमप[4]हायात्र वदन्ति भ्रमरं परे[5] ॥ ३३५ ॥ (वृश्चिकापसृतः) (३०)

यत्र[6] कुर्वीत[7] वैशाखरेचिताभिख्य[8]वृश्चिके[9] ।
-वादर्घ (-दूर्ध्वं?) निकुट्टाख्यकर्म पर्यायशः स्मृतम्[10]।
कटिच्छिन्नं लताहस्तयुतं स्वस्तिकरेचिते[11] ॥ ३३६ ॥(स्वस्तिकरेचितम्)(३१)

कृत्वा यत्र नितम्बाख्यं ततः स्वस्तिकरेचितम् ।
विक्षिप्ताक्षिप्तकाभिख्यं लतावृश्चिकसंज्ञकम् ॥ ३३७ ॥

उन्मत्तकरिहस्ताख्ये भुजङ्गत्रासिताभिधम् ।
आक्षिप्तकं नितम्बं चेत्येतानि परिवृत्त्य च ॥ ३३८ ॥

भ्रमरेण च कुर्वीत पराङ्मुखतया स्थितः ।
तथा पार्श्वमुखः कुर्यात् पार्श्वान्तरमुखस्तथा ॥ ३३९ ॥

करिहस्तकटिच्छिन्ने ततः प्रथमदिङ्मुखः ।
अङ्गहारा मयाख्याताः परिवृत्तकरेचिते ॥ ३४० ॥ (परिवृत्तकरेचितम्)(३२)

1. A.B. धाया 2. A.B. ल्ली 3. A. निकम्बाख्यं B. निगमस्वाख्यं 4. A.B. म्बवि 5 A.B. रम् 6 A B तत्र भ्रमरं; Hypermetric, wrong and probably has something to do with the previous line. C. तत्र extra; hypermetric and needless. According to Bharata and Abhinavagupta, Vaiśākharecita and Vṛścika have to be done twice; this 'twice' in our text has to be understood from the words पर्यायशः स्मृतम् at the end of next line. 7. A.B.C. प्रकुर्वीत 8. B. हि—In A.B. after भि and हि there is an unindicated gap and the line runs into the end of the definition युतं स्वस्तिकरेचिते। 9 C. वंचके 10. C. तः 11. C. तम्.

क्रमव्युत्क्[1]मतो योगात्[2] करणैरितरेतरम् ।
एतेषामङ्गहाराणामस्तु नूनमनन्तता[3]* ॥ ३४१ ॥

तथापि जनितानेतान् करणैर्मित्रसन्धिभिः ।
पश्यन्[4] दृष्टफलाधिक्यमूचे परिमितान्मुनिः ॥ ३४२ ॥

विष्कम्भापसृतोन्मत्तस्खलिताह्वो[5]ऽपसर्पितः[6] ।
मदाद्विलसिताह्वश्च[7] सप्तभिः करणैर्मताः ॥ ३४३ ॥

[8]सूचीविद्धाख्यविष्कम्भपरिच्छिन्नापराजिताः ।
उद्वृत्तसहिताश्चैते नवभिः परिकीर्तिताः ॥ ३४४ ॥

करणैस्तु चतुस्सङ्ख्यैर्भवेत्स्वस्तिकरेचितः ।
विद्युद्भ्रान्त[9]परावृत्त[10]वृश्चिकापसृताभिधाः ।
षट्संख्यैः, पञ्चविंशत्या भवेदाक्षिप्तरेचितः ॥ ३४५ ॥

वैशाखरेचितालातपरिवृत्तकरेचिताः ।
[11]अर्धपूर्वनिकुट्टश्च[12] स्युरे[13]कादशभिः पुनः[14] ॥ ३४६ ॥

उद्घट्टितापविद्धाख्यौ[15] पञ्चभिः परिकीर्तितौ ।
स्थिरहस्ताख्यपर्यस्तमत्ताक्रीडाभिधास्त्रयः[16] ॥ ३४७ ॥

---

1. B. युक्त C. क्रमात्यत्क 2. A.B. योगा 3. A.B.C. न्ततः 4. A. श्यं B. श्य 5. A.B. हो C. खो which is for ख्यो 6. B. र्पतः 7. A. ञ्चेश्चति B. ताह्वेश्च C. तश्चेति 8. C. Line missing. 9. A. न्ता 10. A. त्तः 11. A.B. अर्थमूर्वि 12. A.B. ट्टं च 13. A.B. सुगै 14. C. स्फुटं 15. A B ख्यै 16. A.B. धस्त्रिय:

* For this correct reading see Abhi. Bhā. I. p. 91, lines p. 1-4. 'मित्रसन्धिभिः' in next line obviously means 'such Karaṇas as fit in mutually in a natural manner'; for this meaning again, see Abhi. Bhā. *ibid.* line 2 where त्रुटिताङ्गत्या should read अत्रटि°.

भवन्ति दशभिस्त्वष्टाविंशत्या रेचितः स्मृतः ।
संभ्रान्तः पञ्चदशभिः शेषास्त्वष्टाभिरीरिताः ॥ ३४८ ॥

करणद्वितयावृत्त्या[1] षड्भिः स्वस्तिकरेचितः ।
द्वयोरावृत्तितः सप्तविंशत्याक्षिप्तरेचितः ॥ ३४९ ॥

मत्ताक्रीडे[2]ऽधिकं चैकं[3] भ्रमराभ्यासतो मतम् ।
[4]व्यंसितार्धद्वयाभ्यासान्नवभिश्चा[5]पसर्पितः[6] ॥ ३५० ॥

द्वयोरभ्यासतः पार्श्वस्वस्तिको दशभिः[7] स्मृतः ।
त्रयोदशभिरुद्वृत्ते[8] द्वयावृत्त्याधिकं द्वयम् ॥ ३५१ ॥

द्वितयाभ्यासतोऽष्टाभिः विद्युद्भ्रान्ताभिधो भवेत् ।
व्यंसितावृत्तकं[9] त्वेकमधिकं स्यादलातके ॥ ३५२ ॥

द्विगुणैर्द्विगुणैस्तज्ज्ञैरारभ्य करणाष्टकात् ।
चतुरश्रप्रमाणाः स्युरङ्गहाराः प्रकीर्तिताः ॥ ३५३ ॥

[10]षट्कादारभ्य कथिताः त्र्यश्रमानाः तथाविधैः[11] ।
न्यूनत्वं दृश्यते यत्र[12] प्रोक्त[13]संख्यासु[14] कुत्रचित् ॥ ३५४ ॥

कुर्वीत पूरणं[15]-स्या(तस्य) क्रियाभ्यासेन[16] कुत्रचित् ।
आधिक्यं दृश्यते यत्र प्रोक्तसंख्यातिलङ्घनात् ।
तत्र[17] तालकलायत्या[18] सन्धानात् समतां नयेत* ॥ ३५५ ॥

1. B. Big gap extending over several lines. 2. A. डो 3. C. त्वेकं 4. C. विंशिता 5. C. नवायंचा 6. C. र्प्यते 7. A. ह 8. A.–द्वृत्ते 9. A. कः C. Corrupt. 10. C. स्वकाद् 11. C. भिधैः 12. Haplography in C. Gap up to प्रोक्तं two lines below. 13. प्रोक्तं 14. संस्थासु 15. ण 16. सोन 17. A. तत 18. A. कलायत्यो C. लयायत्या

* *Cf.* Abhi. Bhä. I. p. 164, lines 11, 14.

उद्ग्राहनात्[1] पृथग्भावाच्चलनाच्चापि रेचकः ।
पार्श्वात्पार्श्वानु[2]गमनं[3] स्खलितैःस्खलितैर्गतैः ॥ ३६८ ॥

विविधैश्चैव पादस्य पादरेचक उच्यते ।
त्रिकस्योद्वर्तनं चैव कटीचलनमेव च ॥ ३६९ ॥

तथापसर्पणं चैव कटिरेचक उच्यते ।
[4]उद्वर्तनं परिक्षेपो विक्षेपः परिवर्तनम् ॥ ३७० ॥

विसर्पणञ्च हस्तस्य हस्तरेचक उच्यते ।
उद्ग्राहनं सन्नमनं[5] पार्श्वात्पार्श्वं[6] च सञ्चतिः ।
भ्रमणं चेति विज्ञेयो ग्रीवाया[7] रेचको बुधैः" ॥ ३७१ ॥

§" ततो ये तण्डुना प्रोक्तास्त्वंगहारा महात्मना ।
[8]तान् वः करणसंयुक्तान् व्याख्यास्यामि सरेचकान् " ॥ ३७२ ॥

इति व्याहरतो नूनमेवमन्ये मुनेः[9] मतम्(ताः ?) ।
करणैरङ्गहारैश्च सहिता एव रेचकाः ॥ ३७३ ॥

पुत्रेण च मुनेरेतत् प्रोक्तं तुंबुरुणा* यथा ।
"अङ्गहारादिमध्यान्तकरणै रेचकान् विदुः"[10] ॥ ३७४ ॥

---

1. A.B. उद्ग्राहतान् 2. A.B. पार्श्वपार्श्वन्तु 3. C. ने 4. A.B. त 5. B. सरेमनं 6. A. पार्श्वापार्श्वं B. पार्श्वपार्श्वं C. पार्श्वे पार्श्वं 7. A. गिवायो 8. B. तानः 9. C. मुहुः 10. A. वकाञ्चिदः

§ This is Bharata's N.Ś. IV. 18-19 (GOS. I. p. 90). The beginning of line 2 has a variant here as quoted by Jāya.

* This quotation is reproduced form Abhi. Bhā. (GOS.) I. p. 165. The reading in the GOS. edn.—अङ्गहाराभिधानात्तु makes no sense. Jāya's quotation preserves the correct reading which means 'the Karaṇas that occur at the beginning, the middle and finale of an Aṅgahāra.'

‡ "पादरेचक एकः स्यात्" इत्यादौ[1] संख्ययोक्तया ।
अपि केवल[2]वैशाखप्रभृतिस्थानक[3]स्थितैः ॥ ३७५ ॥

प्रयुक्ताः[4] पुण्यसंपत्तिहेतवोऽ रेचका इमे ।
नियमेन भवन्तीति नूनं मुनिरसूचयत् ॥ ३७६ ॥

"रेचकैरङ्ग[5]हारैश्च नृत्यन्तं वीक्ष्य शङ्करम्[†] ।"
इत्यपि ब्रुवता स्पष्टं तदेव मुनिना कृतम् ॥ ३७७ ॥

इति राजाधिराज[6]-गणपतिदेव-गजसाधनिक-जायसेनापति-
विरचितायां नृत्तरत्नावल्यां
करणाङ्गहारविवेचनं नाम
चतुर्थोऽध्यायः[7] ॥

---

1. A.B. विद्यादौ 2. A.B. अंबिके बल 3. A.B.C. कं 4. A.B. क्तं
5. C. Corrupt. 6. C. श्रीमहाराजाधिराज 7. B. adds समाप्तः

‡ Quotation from Bharata, N.Ś. IV. 251 (GOS. I. p. 165).

§ From this. we may correct पृथग्दृष्टार्थता° in Abhi. Bhā. I. p. 165, line 7 from below, into पृथगदृष्टार्थता°

† Quotation from Bharata IV. 257.

[अथ पञ्चमोऽध्यायः]

वन्दे श्रीकण्ठमन्दारं यत्र गौरीस्तनोद्गमः ।
धत्ते विश्वफलव्यक्त्यै[1] प्रथम[2]स्तबकश्रियम् ॥ १ ॥

भाषावेषविभूषणैरनुगुणैस्तै[3]स्तैर्मनोहारिभि-
र्नानादेश[4]रुचीन् विदग्ध[5]पुरुषानावर्जयन्ती गुणैः ।
भूपालैरुपलालिता बहुकलैः प्रौढेव वाराङ्गना
[6]देशी संप्रति **दन्तिसैन्यपतिना**[7] सान्द्रादरं वर्ण्यते ॥ २ ॥

भवन्ति धरणीपालाः प्रायेणाभिनय(व*)प्रियाः ।
अतस्तत्प्रीतयेऽद्यापि यद्यदुत्पाद्यते नवम् ॥ ३ ॥

नृत्तं ततः[8] स्मृतं देशी तत्तद्देशानुसारतः[9] ।
भूतं शास्त्र[10]मुखात् ज्ञेयं भविष्यन्नावगद्यते ॥ ४ ॥

भवन्निरूपणीयं[11] स्यान्नृत्तं[12] देशीति संज्ञितम्[13] ।
इदानीं भारते वर्षे काले वैवस्वतान्तरे[14] ॥ ५ ॥

कलौ याते तु वर्षेषु भूतबाणाग्निसागरैः (४३५५) ।
मितेष्वानन्दसंज्ञेऽब्दे[15] जगदानन्ददायिनि[16] ॥ ६ ॥

---

1. A.B. क्तौ C. क्तै 2. C. मं 3. A.B. गुणस्तै 4. A.B. व 5. A.B. निदग्ध 6. A. म्मदर्शिसंप्रति B. ममदर्शितप्रति 7. A.B. नस्त 8. C. तत्व 9. C. देशजनेच्छया 10. A. स्त्रि 11. A. णिय B. णींय 12. A. स्यान्नृत्त B. स्यानृत्तं 13. A.B. ज्ञकम् 14. C. तेन्तरे 15. A.B. ज्ञब्दे 16. C. नी

* The context and meaning require 'अभिनव'. What is meant is 'As Kings always like new things, whatever is new and is from different parts of the country, i.e., Desi forms of dance, are now dealt with.'

[1]शश्वत्कुवलयोल्लासि[2]यशःप्रालेय[3]रोचिषि ।
प्रतापतपनप्रौढि[4]तापिताराति[5]मानसे ॥ ७ ॥

शत्रुप्राणानि[6]ला[7]हार[8]क्षीब[9]कौक्षे[10]यकोरगे ।
विश्राणनपयःपूरविधूत[11]कलिकल्मषे ॥ ८ ॥

त्याग[12]धिक्कृतराधेयकामधेनु[13]सुरद्रुमे ।
रूपलावण्यसौभाग्य[14]सव्रीडमकरध्वजे ॥ ९ ॥

तैर्यत्रितयविज्ञानरह[15]स्तत्त्वविशारदे ।
मार्गदेशी[16]विभागस्य विवेचनविचक्षणे ॥ १० ॥

महाराजाधिराजेऽस्मिन् गणपत्यवनीश्वरे ।
समुद्रमेखलामेनां[17] बाहुना रक्षति क्षमाम् ॥ ११ ॥

या देशी वर्तते[18] लोके सास्माभिः कथ्यते स्फुटम् ।
निरूप्यतेऽधुना देश्यां स्थानकानि यथाक्रमम् ॥ १२ ॥

समपादं परावृत्तं स्वस्तिकं वृषभासनम् ।
ब्राह्मवैष्णवशैवानि गारुडं संहताभिधम्[19] ॥ १३ ॥

[20]पृष्ठोत्तानतल वर्धमानं कूर्मासनाह्वयम् ।
एकपार्श्वगतं नन्द्यावतोह्व[21]चतुरश्रक ॥ १४ ॥

1. C. सस्व 2. C. ल्लेशे 3. B. पालय C. प्रालय 4. C. ढे 5. A.B. तापितोराति C. शोषिताराति 6. B. ण 7. C. रा 8. A. रा 9. C. य 10. A.B. क्षी 11. C. निद्वैत 12. A.B. गा 13. A.B. नुरु 14. B. यं 15. A.B. मह 16. A. शि 17. C. नामे? 18. A.B. तो 19. A.B. भिधम् missing. 20. A.B. Gap; 27 lines lost. 21. Indistinct.

पार्ष्णिपार्श्वगताभिख्यमेकजानुगताह्वयम् ।
पार्श्वविद्धैकपादाख्ये नागबन्धाभिधं ततः ॥ १५ ॥

समेन विषमेनाथ खण्डेनोपपदेन च ।
युक्तं सूचित्रयेणेति विंशतिस्त्रिभिरुत्तरा ॥ १६ ॥

स्वभावावस्थितो देहो वितस्तिमितमन्तरम् ।
अङ्घ्र्योस्सरलयोर्यत्र समपादं तदुच्यते ॥ १७ ॥ (समपादम्) (१)

बाह्याभ्यन्तरपार्श्वाभ्यां युक्तयोस्तिर्यग—[1] ।
पादयोर्यत्र पार्ष्णिभ्यां कनिष्ठाङ्गुष्ठकौ युतौ ।
गजसाधनिकेनैतत् परावृत्तं प्रकीर्तितम् ॥ १८ ॥ (परावृत्तम्) (२)

पादौ पादाङ्गदस्थाने स्वस्तिकौ जातु[2]* कुञ्चितौ ।
मिथः कनिष्ठयोः श्लिष्टौ यत्र तत्स्वस्तिकं भवेत् ॥ १९ ॥ (स्वस्तिकम्)(३)

[3]जानुनी यदि संश्लिष्टविश्लिष्टे[4] ता (स्तो ?) महीतले ।
विश्लिष्टो (सुश्लिष्ट ?) सौष्ठवं.....[5]स्याद्वृषभासनम् ॥ २० ॥
(वृषभासनम्)[6] (४)
[7]स्थितस्यैकस्य पादस्य सम - [8]जानुकोऽपरः ।
पृष्ठतः कुञ्चितो[9]त्क्षिप्तो यत्र तद् ब्राह्ममुच्यते ॥ २१ ॥ (ब्राह्मम्) (५)

समस्थितस्य पादस्य पुरतः[10] कुञ्चितो मनाक् ।
तिर्यक् प्रसारितोऽन्यश्चेद् बुधास्तद्वैष्णवं विदुः ॥ २२ ॥ (वैष्णवम्) (६)

1. तिर्यगास्पये। Is it तिर्यगस्तयोः? 2 यानु 3. वा 4. श्लेष्टं 5. Somethingl ike तालघन; however, for the definition proper no essential word is wanting. 6. वृषपार्श्वसमम् 7. स्थितास्थितस्य. This planted foot should have been specified as the left, Vāma. 8. समनौ; the restoration समान would be somewhat against metre. 9. कुक्षितो 10. पग्तः

* *Cf.* Someśvara, Mānasollāsa, ईषदुच्चतलम्।

[1]समस्थितस्य पादस्य जानूत्सङ्गसमोऽपरः ।
[2]कुञ्चितो गमने तिष्ठेद् यत्र तच्छैवमुच्यते ॥ २३ ॥ (शैवम्) (७)

तलेनावस्थितो भूमौ[3] कुञ्चितश्चरणः पुरः ।
जानुना पृष्ठतोऽन्यस्तु यत्र तद्गारुडं[4] विदुः ॥ २४ ॥ (गारुडम्)[5] (८)

समपादे यदा त्वंघ्र्योः गुल्फाङ्गुष्ठौ मिथोऽन्वितौ ।
संहताख्यं तदा प्रोक्तं पुष्पाञ्जलिविमोचने ॥ २५ ॥ (संहतम्) (९)

समः स्यादग्रतः पादो यदान्यः पृष्ठतः क्षितौ ।
[6]स्पृष्टश्चेदङ्गुलीपृष्ठः[7] पृष्ठोत्तानतलं तदा ॥ २६ ॥* (पृष्ठोत्तानतलम्)(१०)

पार्ष्णिना संगतः पार्ष्णिः पादौ तिर्यङ्मुखौ यदा ।
विधीयते तदा वर्धमानाख्यं परिकीर्तितम् ॥ २७ ॥ (वर्धमानम्) (११)

जान्वभ्यन्तरगुल्फाभ्यां पृष्ठतोऽङ्घ्रिः स्पृशेन्महीम्[8] ।
अन्यः कुञ्चित[9]जानुश्चेत्पुरः[10] कूर्मासनं तदा ॥ २८ ॥ (कूर्मासनम्) (१२)

अभ्यर्णे समपादस्य पुरः (परः ?) निर्यङ् मनाक् पुनः (पुरः ?)‡ ।
स पार्श्वाभिमुखश्च स्यादेकपार्श्वगतं तदा ॥ २९ ॥ (एकपार्श्वगतम्) (१३)

1. Before this, pāda 1 of next verse is found in addition.
2. Before this, pāda 3 of next verse is found in addition.
3. भौमौ. 4, 5. गारुलम्. 6 पृष्ठोच्चेद् 7. ष्ठाः 8. B. स्पृशोन्महिः
9. C. पाद 10. B पुनः

* The gap in A.B. extends up to this.

‡ A word for 'the other foot' is necessary, as also a word for 'in front' ; there is one 'पुरः' as also one 'पुनः' ; the latter which is needless may be a corruption of पुरः and the former of परः.

वर्धमानस्य पार्ष्णी[1] चेद् विश्लिष्टौ[2] षड्भिरङ्गुलैः ।
वितस्त्या[3] वा समाख्यातं नन्द्यावर्ताभिधं तदा ॥ ३० ॥ (नन्द्यावर्तम्)(१४)

[4]अस्यैव यदि पार्ष्णी[5] स्यादष्टादशभिरङ्गुलैः ।
अन्तरालमितं[6] तज्ज्ञैः चतुरश्रं तथा स्मृतम् ॥ ३१ ॥ (चतुरश्रम्) (१५)

अन्तः पार्श्वं[7] समस्याङ्घ्रेः[8] मध्येऽन्यः पार्ष्णिना स्पृशेत् ।
स्वपार्श्वाभिमुखः[9] तिष्ठेत् पार्ष्णिपार्श्व[10]गताभिधम्[11] ॥ ३२ ॥
(पार्ष्णिपार्श्वगतम्) (१६)

[12]यत्र पार्श्वमुखस्यैव पार्ष्णिनाङ्घ्रिर्वियोजितः[13]।
चतुरङ्गुलमानेन किञ्चित्कुञ्चितजानुकः ।
एकजानुनतं तत्स्यादिति देशीविदो विदुः ॥ ३३ ॥ (एकजानुनतम्) (१७)

किञ्चित्पार्श्वमुखस्याङ्घ्रेः पार्ष्णिमन्यस्य योजयेत् ।
अङ्गुष्ठेन यदा[14] प्रोक्तं पार्ष्णिविद्धा[15]भिधं तदा ॥ ३४ ॥ (पार्ष्णिविद्धम्)
(१८)

समस्थितस्य पादस्य जानुनो बाह्यपार्श्वतः ।
अन्यस्तु बाह्यपार्श्वेन संलग्नो जानुकुञ्चितः ।
स्थानके यत्र तत्तज्ज्ञैरेकपादमुदीरितम् ॥ ३५ ॥ (एकपादम्) (१९)

असिते[16] द्विगुणस्याङ्घ्रेः वामस्योरोर्निवेशयेत्[17] ।
पृष्ठे परस्य चेज्जङ्घां[18] नाग[19]बन्धः स्मृतः तदा ॥ ३६ ॥ (नागबन्धः)
(२०)

---

1. A.B. पार्ष्णिः 2. B. ष्टै 3. A. B. वितस्या 4. A.B. आ 5. A.B. पक्ष्मा
6. A.B. दं 7. C. र्श्वं 8. B. ङ्घ्र 9. A.B. खं 10 A.B. पार्ष्णि
11. A.B. चेत् 12. C. Two lines of this definition lost.
13. A. विधोजितः B. विधोचित: 14. B. दया C. तदा 15. B. बद्धा
16. A.B. तो C. आशीर्षे 17. A.B. निवेशते 18. B. जानु
19. A. जानु

पार्ष्णिजङ्घोरुभिः पादौ[1] नीरन्ध्रं श्लिष्ट[2]कुट्टिमौ[3] ।
तिर्यक्प्रसारितौ[4] यत्र समसूचि तदुच्यते ॥ ३७ ॥ (समसूचि) (२१)

समसूचिवदेकाङ्घ्रिरग्रतः स्यात्प्रसारितः ।
अपरः पृष्ठतो जानुगुल्फाभ्यां [5]स्पृष्टकुट्टिमः ।
स्वेनाभ्यन्तरपार्श्वेन यस्मिन् विषमसूचि तत्[6] ॥ ३८ ॥ (विषमसूचि) (२२)

[7]समसूचिनि चेदेकः[8] चरणो द्विगुणीकृतः[9] ।
उन्मुखीभूतजानुः स्यात् खण्डसूचि स्मृतं तदा ॥ ३९ ॥ (खण्डसूचि) (२३)

॥ इति देशीस्थानकलक्षणम् ॥

संप्रत्युत्प्लुति[10]पूर्वाणि करणानि प्रचक्ष्महे[11] ।
अञ्चितं कर्तरीपूर्वमञ्चितं भैरवाञ्चितम् ॥ ४० ॥

एकपादाञ्चितं[12] क्षेत्राञ्चितं[13] स्कन्धान्त[14]पूर्वकम् ।
अञ्चितं लोहडी[15]पूर्वमञ्चितं दण्डपूर्वकम्[16] ॥ ४१ ॥

[17]प्रणामाञ्चितकं लङ्कादाहाञ्चितसमाह्वयम् ।
[18]भ्रान्तपादाञ्चिताङ्गुष्ठबन्ध[19]पूर्वाञ्चिताभिधे ॥ ४२ ॥

बलिबन्धा[20]ञ्चिताभिख्यमलगाञ्चितपूर्वकम् ।
समकर्तरिपूर्वं चाञ्चितमेवं चतुर्दश ॥ ४३ ॥

1. A.B. दे 2. B. शिष्ट 3. A.B. मे. 4. A.B. तो 5. B. पृष्ठ
6. B.C. तम् 7. B. समसूची 8. A.C. वेदेकः B. वदेक 9. A.B. ता
10. B. त 11. C. प्रवक्ष्यते. 12. A.B. त. 13. A.B. क्षेत्रं चितं
14. A.B. स्कन्धान्तु C. स्कन्धात 15. A. णी B. श्री C. री
16. C. After this the previous line is repeated in place of next two lines. 17. C. Line missing. 18. C. Line missing. 19. A. वद्ध B. गन्ध 20. A.B.C. द्धा

अलगः स्यात्ततः कूर्मालगमूर्ध्वा[1]लगाभिधम् ।
अन्तरालग[2]मित्येतच्चतुर्धा परिकीर्तितम् ॥ ४४ ॥

लोहडी[3] प्रथमा तस्याः कर्तरी समकर्तरी ।
बाहु[4]बन्धा त्रिचित्रा स्याद्[5] एकपादा चतुर्मुखी ॥ ४५ ॥

लोहड्यः[6] षड्विनिष्कान्ता मिलितास्सप्त कीर्तिताः ।
[7]स्यादर्पसरणं तस्मादुत्पन्नं[8] जल[9]पूर्वकम् ।
शयनं नागबन्धश्च त्रीणि[10] प्रोक्तानि पण्डितैः ॥ ४६ ॥

कपालस्पर्शनं तस्माज्जातं[11] व्यंकोलसंज्ञकम्[12] ।
सूच्यन्तं मत्स्यकरण[13]माहु[14]रेतच्चतुष्टयम् ॥ ४७ ॥

क्रमाल्लक्षणमेतेषां सुव्यक्तमभिधीयते ।
समपाद[15]स्थितो यत्र कृत्वोत्तानोत्प्लुतिर्दिवि ।
विवृतः पूर्ववत्तिष्ठेत्[16] तदञ्चितमुदीरितम् ॥ ४८ ॥ (अञ्चितम्) (१)

कर्तर्यञ्चितमुक्तं तत् यत्पादः[17] स्वस्तिकाभिधः[18]॥ ४९ ॥(कर्तर्यञ्चितम्)(२)

[19]पाद(दं) भूमिस्थितस्यांघ्रेः ऊरुपृष्ठे[20] द्वितीयकम् ।
[21]निवेश्याञ्चितमादध्याद्यत्र तद् भैरवाञ्चितम् ॥ ५० ॥(भैरवाञ्चितम्)(३)

1. A.B.C. र्धा 2. A. क B. Letter wanting. 3. A. धिः B. धी C. री 4. B. पाशु 5. A.B. ख्या 6. A. लोभस्य B. लोहस्य C. लोहल्य 7. A.B.C. स्यादर्प 8. A.B. शयन्तं For the correctness of उत्पन्नं see below definition; Jalaśayana-Karaṇa comes out of Darpasaraṇa. 9. B. जय C. जन 10. B. प्राणि 11. A.B.C. जात 12. B. लोकसंज्ञिकम् 13. B. णा 14. B. भू 15. B. प 16. B. पूर्वजं निष्ठत् 17. A.B. द 18. A.B. धम् C. Gap. स्तिकाभिधः dropped. 19. B. Line missing. 20. C. न्त-पृष्ठ 21. B. Line strayed below.

एकपादाञ्चितं कुर्यादेकपादाञ्चितं तथा ॥ ५१ ॥ (एकपादाञ्चितम्) (४)

अञ्चिताद्यन्तयोर्यत्र भजेदुत्कटिकासनम्[1] ।
रङ्गक्षेत्रे[2] यतः[3] प्रोक्त[4]मेतत्क्षेत्राञ्चितं बुधैः ॥ ५२ ॥ (क्षेत्राञ्चितम्) (५)

पूर्वं कृत्वाञ्चितं यस्मिन्नेकांसालिङ्गितक्षितिः ।
पादोल्लासनया तिर्यगुत्तिष्ठेत्[5] त्वरितं पुनः[6] ।
स्कन्धान्ताञ्चित[7]मुद्दिष्टमिदं नृत्तविशारदैः ॥ ५३ ॥ (स्कन्धान्ताञ्चितम्)(६)

विधाय लोहडीं[8] यस्मिन् अञ्चितं रचयेद् द्रुतम् ।
लोहड्यञ्चितसंज्ञं तत्[9] नर्तकैः परिकीर्तितम् ॥ ५४ ॥ (लोहड्यञ्चितम्) (७)

समपादाञ्चितस्यान्ते दण्डवत्प्रणतिर्भुवि ।
क्रियते यत्र तद्दण्ड[10]प्रणामाञ्चितमुच्यते ॥ ५५ ॥ (दण्डप्रणामाञ्चितम्) (८)

अञ्चितं रचयन्[11] अङ्गं[12] प्रत्यावृत्य[13] पराङ्मुखः ।
यत्रासीत[14] महीपृष्ठे भजन्[15] उत्कटिकासनम् ।
लङ्घादाहाञ्चितं तत्स्यात् अन्यैरुक्तमुरोऽञ्चितम् ॥ ५६ ॥(लङ्घादाहाञ्चितम्) (९)

पादमेकं परिभ्राम्य तत्पृष्ठेन समाश्रितः ।
नङ्घामध्यं द्वितीयस्य रचयित्वाञ्चितं महीम्[16] ॥ ५७ ॥

1. C. समम् 2. C. त्र 3. B. यकं C. जतः 4. A पूर्व B. हृत्य प्रोक्त hypermetric; C. प्रोक्तो 5. A. गुष्ठित B. गुष्ठत C. गतिष्ठे 6. A.B. प्लुतः 7. C. स्कन्धाञ्चित which is wanting in a syllable. 8. A. सीं B. सी C. री 9. A. ज्ञ तं B. शन्तं 10. B. डं 11. B. र.... C. रेचयेन् 12. B. अङ्गाव 13. A.B. वप्रत्याखे C. विवृख्येक्षे 14. A. सित 15. A.B. जगद् May be (अ)जहद् meaning 'without giving up the Utkaṭikāsana'. 16. A.B. ताभिधे. Gap ; 4 lines, part of the definition of this Karaṇa and the definition of the next, except for the last word, are missing.

आलिङ्ग्य स्कन्धयुग्मेन ततः कृतवि[1]वर्तनः ।

पदोल्लालनया तिष्ठेद्.... [2]भ्रान्तपदाञ्चितम् ॥ ५८ ॥ (भ्रान्तपादाञ्चितम्) (१०)

[3]अङ्गुल्यङ्गुष्ठमध्याभ्यां संयुक्ता (?)[4] पादयोर्मिथः ।

[5]कृत्वांचितं विधीयेताङ्गुष्ठबन्धा[6]ञ्चितामिधम्[7] ॥ ५९ ॥ (अङ्गुष्ठबन्धाञ्चितम्)[8] (११)

अञ्जलिं पृष्ठतो बद्ध्वा मध्यवंशे[9] यदोन्मुखम् ।

अञ्चितं रेचयेत्प्रोक्तं बलिबन्धाञ्चितं तदा ।

गजदन्तेन पुरतः कृतमेतत्परे जगुः ॥ ६० ॥ (बलिबन्धाञ्चितम्) (१२)

[10]अलगान्ते कृतं वेगादञ्चितं [11]चालगाञ्चितम् ॥ ६१ ॥ (अलगाञ्चितम्) (१३)

आदावङ्घ्री[12] समौ[13] बद्ध्वा[14] स्वस्तिकावञ्चितं[15] यदा ।

संपद्यते यदा प्रोक्तं समकर्तरिकाञ्चितम् ॥ ६२ ॥ (समकर्तर्यञ्चितम्) (१४)

॥ इत्यञ्चितलक्षणम् ॥

उत्प्लुत्यावाङ्मुखो व्योम्नि[16] विवृत्याग्रे पतन् भुवि ।

उत्कटासनमादध्याद्[17] यत्रेदम[18]लगं मतम्[19] ॥ ६३ ॥ (अलगम्) (१५)

कूर्मालगं तदेव स्यादन्ते कूर्मासनं यदि ॥ ६४ ॥ (कूर्मालगम्) (१६)

यद्यन्तेऽस्योर्ध्व[20]पादाभ्यां स्थितिरूर्ध्वालगं भवेत ॥ ६५ ॥ (ऊर्ध्वालगम्) (१७)

---

1. C. नि. 2. C. Wanting in two letters. 3. A.B. Line missing. 4. संयुष्टा 5. A.B. Line missing except for the last four letters. C. सृत्वा ? 6. विधीयातां मङ्गुष्ठं धा 7. A.B. घे 8. C. Name missing. 9. A.B. मध्येवंश 10. A.B.C. अलका 11. C. त्व 12. A.B.C. घ्रि 13. A.B.C. मा 14. A.B. यत्यो C. बन्ध 15. A.B. ते 16. C. कृत्वा ? 17. A.B. बध्यात् 18. A. यदग्रेम B. यग्रेम 19. C. Part of the line repeated. 20. A.B. स्वोर्ध्व. C. स्याद्वै

उद्वाहितमुरो[1] बाढं जङ्घोपान्ते च[2] मस्तकम् ।
कुर्याच्चेदलगास्यान्ते तदा स्यादन्तरालगम् ॥ ६६ ॥ (अन्तरालगम्) (१८)

॥ इत्यलगलक्षणम् ॥

उत्प्लुत्य समपादस्थः[3] तिर्यगावर्तितत्रिकः ।
पराङ्मुखः पतेद्यत्र लोहडी सा प्रकीर्तिता ॥ ६७ ॥ (लोहडी) (१९)

[4]सैव स्यात्स्वस्तिकाङ्घ्रिभ्यां कृता कर्तरिलोहडी ॥ ६८ ॥ (कर्तरिलोहडी) (२०)

लोहड्याद्य[5]न्तयोः पादौ समौ स्वस्तिकतां गतौ ।
[6]क्रमाच्चेन्नर्तकैः प्रोक्ता[7] समकर्तरिलोहडी ॥६९॥ (समकर्तरिलोहडी) (२१)

शुद्धा य[8] लोहडी सैव[9] गज[10]दन्तेन संयुता ।
यदा प्रकीर्तिता बाहु[11]बन्धा[12]द्या लोहडी तदा ॥ ७० ॥ (बाहुबन्ध[13]लोहडी) (२२)

कायस्य चक्रवद्भ्रान्त्या तिर्यक् चेत्पार्श्वतः कृता ।
लोहडी यदि सा प्रोक्ता नर्तकैश्चित्रलोहडी ॥ ७१ ॥ (चित्रलोहडी) (२३)

एकाङ्घ्रिस्थानके कायः[14] स्याच्चेदेकाङ्घ्रिलोहडी ॥ ७२ ॥ (एकपादलोहडी) (२४)

लोहडी चेच्चतुर्दिक्कं स्याच्चतुर्मुखलोहडी ॥७३॥ (चतुर्मुखलोहडी) (२५)

[इति लोहडीलक्षणम्]

वैष्णवस्थानकः[15] पादः त्र्यश्रः पार्श्वमुखश्च[16] यः ।
[17]तत्पार्श्वदिशि कायस्य तिर्यक् स्याच्चक्रवद्भ्रमः ॥ ७४ ॥

यस्मिन्नन्ते परः पादः त्र्यश्रः स्वस्थानमाचरेत् ।
तद्दर्पसरणं नाम[18] नृत्यज्ञैः परिकीर्तितः ॥ ७५ ॥ (दर्पसरणम्[19]) (२६)

1. C. खे 2. C. भ्र 3. A. स्थि B. दान्त 4. C. शै. 5. A.B. लोहस्याद C. लोहड्या द 6. B. का 7. A. क्तौ 8. A.B. यो 9. A.B. स्वैह 10. B.-न 11. A.B. हुः 12. A.B. द्धा 13 A.B. द्धा 14. A.B. र्या 15. A.B. के 16. B. खंच 17. A.B. A big gap from here extending to nearly eight sheets of the ms. C. 18. लोह 19. दर्पनन्यायनाम.

तस्यान्ते जलशायीव शयानः स्यान्महीतले ।
यदा तदा समाम्नातं शयनं जलपूर्वकम् ॥ ७६ ॥ (जलशयनम्) (२७)

विधाय करणं दर्पसरणं नागबन्धवत् ।
यत्रासीत तदा प्रोक्तं नागबन्धाभिधं बुधैः ॥ ७७ ॥ (नागबन्धः[1]) (२८)

कपालस्पर्श[2]माहुस्तत् कुरुते यत्र नर्तकः ।
लोहडीमलगं बद्ध्वा[3] स्पृशेन्मूर्ध्ना महीं मनाक् ।*
कपालचूर्णमित्युक्तं यदन्यैस्तन्न शोभनम् ॥ ७८॥ (कपालस्पर्शनम्) (२९)

कपालस्पर्शनं यत्र कुर्वन्नलगसंभवम् ।
अन्तरालगवान्[4] तिष्ठेत् व्यङ्कोलं तदुदीरितम् ।
नतपृष्ठाभिधानं तु केचिदेनत्प्रचक्षते† ॥ ७९ ॥ (व्यङ्कोलम्[5]) (३०)

आहुर्विषमखण्डादिसूचिनी चात्र केचन ।
यस्य यस्य विरामे तु सूचीप्येत-किञ्चन[6] ।
तत्तत्सूच्यन्तमित्युक्तं करणं नृत्तकोविदैः ॥ ८० ॥ (सूच्यन्तम्) (३१)

कस्यापि करणस्यान्त उत्तानः शयितः[7] क्षितौ ।
नितम्बोन्नमनान्मध्यं यस्मिन्नावर्त्य वामतः ॥ ८१ ॥

1. न्धनाम 2. न excessive. 3. ब missing, द्धा 4. वां 5. वङ्कोलम्
6. Pāda wanting in a letter. 7. सतयि or पतति.

* It is called Kapālacūrṇana by Śārṅgadeva (S Ratn. VII. 759 and 773) and Pārśvadeva (Saṅgitasamayasāra TSS. p. 70 śl. 184). The name Kapālasparśana is what Someśvara gives.

† See S. Ratn. VII. 774, where the main name given is Nataprṣṭha, and Veṅkola is mentioned as the name given by others. Pārśvadeva adopts the name Veṅkola only (TSS. edn. Saṅgitasamayasāra p. 70, śl. 189).

[1] ..... ।

[2](तन्मत्स्यकरणं प्रोक्तं) मत्स्यवत्परिवर्तनात् ॥ ८२ ॥ (मत्स्यकरणम्) (३२)

॥ इति करणलक्षणम्* ॥

पदैरन्त[3]र्बहिश्छत्र[4]तिरिपौतालगोचितैः ।
विद्युच्चक्रशिरोहस्तकुञ्चिताङ्गैर्विशोभिताः ।
त्रयोदश भ्रमर्यः स्युः तासां लक्षणमुच्यते ॥ ८३ ॥

समुत्क्षिप्तेन पादेन भुजङ्गत्रासिताङ्घ्रिवत् ।
वामेन दक्षिणावर्तवामावर्तपरेण च ॥ ८४ ॥

शरीरं भ्राम्यते वेगात् [5]त्रयभ्रान्त्या परस्य यत् (?) ।
अन्तर्भ्रमरिकाख्येयम् ; अस्या एव विपर्ययात् ॥ ८५ ॥

बाह्यभ्रमरिका प्रोक्ता विशेषः किन्त्वयं पुनः ।
स्फिजां द्रुतपाण्र्या[6]यं (?) द्विगुणेनाङ्घ्रिणा भ्रमः ॥ ८६ ॥

या प्रदक्षिणतो भ्रान्तिरप्रदक्षिणतश्च या । [भ्रमरी च)
तामन्तर्भ्रमरीं बाह्यभ्रमरीं च परे विदुः ॥ ८७ ॥ (इति अन्तर्भ्रमरी बाह्य-

विष्णुक्रान्त[7]वदुत्क्षिप्य वामांघ्रिः कुञ्चितः पुनः ।
पतनोत्पतनैरन्यैः पादस्य भ्रमणं जवात् ।[8]
यत्राप्रदक्षिणं कुर्यात् सा छत्र[9]भ्रमरी मता[10] ॥ ८८ ॥ (छत्र[11]भ्रमरी)†

---

1. There is a clear gap here of one or two lines describing the movements of turning like a fish and then rising up and resuming the standing posture. 2. Half the line lost; restoration based on context and the remaining part of the line. 3. पदैतत 4. श्वाव 5. वच May be भव 6. Letter doubtful. The pāda is also deficient in a letter. 7. न्ति 8. यवान् 9. चित्र 10. तं 11. चित्र

* By Karaṇas here are meant Deśi or Utpluti Karaṇas.

† Channa in S. Ratn. VII. 782.

कुञ्चितं पादमुत्क्षिप्य पार्श्वेनाक्षिप्य पृष्ठतः ।
अन्याङ्घ्रौ स्वस्तिकं कृत्वा शरीरं भ्रामयेद्यदा ॥ ८९ ॥

तिर्यक् चेद्दण्डपक्षाभ्यां यथा स्यात्स्वस्तिकच्युतिः ।
तिरिपभ्रमरीत्येषा तदा तज्ज्ञैर्निगद्यते ॥ ९० ॥

[1]उत्प्लुत्य घटयित्वापि[2] जानुनोः स्वस्तिकं भ्रमेत् ।
पूर्ववद्यत्र सा प्रोक्ता तिरिपभ्रमरी[3] पुनः ॥ ९१ ॥ (तिरिपभ्रमरी)†

‡ .. .. ।
नमनोन्नमनैः पूर्वकायस्य क्षितिमस्पृशन् ।
दक्षिणं प्रसृतं पादं मुहुः कुर्वन् द्रुतं[4] भ्रमन् ।
तिरश्चीनौ[5] भवेद्यत्र सालग[6]भ्रमरी मता ॥ ९२ ॥ (अलगभ्रमरी)

विशाखस्थानके तिष्ठन् तिर्यक् सोल्लालनैः समैः ।
युगपद्दण्डपक्षाभ्यां वामहस्तेन कुं लिखन् ॥ ९३ ॥

मुहुः प्रदक्षिणं कुर्वन् छुरितं त्वरितं यदा[7] ।
मण्डलेन परिभ्राम्येदुचितभ्रमरी तदा ॥ ९४ ॥ (उचितभ्रमरी)

---

1. त 2. षि 3. णा excessive. 4. वृतं 5. श्चैतो 6. सलिंलग 7. युवा.

† The name is missing.

‡ According to the enumeration, we should have after Tiripa, the Bhramarī called Otā. As it is, the lakṣaṇa-grantha has only 12 definitions, not 13 as required. Otā-Bhramarī is thus defined in Vema's S. Cint. a text often pretty close to ours .

कृतोत्प्लुतिर्वामपादतलेन तु मुहुर्मुहुः ।
ताडयन् दक्षिणस्योरुं यत्र भ्राम्येत्प्रदक्षिणम् ।
ओता भ्रमरिका सेयं नृत्तविद्भिरुदाहृता ॥

[1]विद्युद्भ्रान्तां मुहुः कुर्वन् दक्षिणेनाङ्घ्रिणा यदा ।
प्रदक्षिणं परिभ्राम्येत्[2] .... ॥ ९५ ॥ (विद्युद्भ्रमरी)

[3] .... ।
वामहस्ततलेनोर्व्यां तिष्ठन् व्योम[4]मुखक्रमः* ।
अपसव्यं भ्रमेद्यत्र सा हस्तभ्रगरी भवेत् ॥ ९६ ॥ (हस्तभ्रमरी)

चित्तभ्रमरिकां कुर्याद् भुजङ्क्त्रासिताङ्घ्रिणा ।
यदा विद्धिः समाख्याता कुञ्चितभ्रमरी तदा ॥ ९७ ॥ (कुञ्चितभ्रमरी)

समपादे स्थितः स्थाने मध्यस्य वलनाद् भृशम् ।
परितो[5] भ्रामयेत्तूर्णं पूर्वकायं करौ दधत् ॥ ९८ ॥

प्रयोगवशगौ[6] दण्डपक्षाख्यावव्यवस्थितौ ।
यस्यामभिहिता[7] तज्ज्ञैरङ्गभ्रमरिकेति सा ॥ ९९ ॥ (अङ्गभ्रमरी)

---

1. Line repeated. 2. Gap up to end of शिरोभ्रमरी. 3. The Bhramaris of which the Lakṣaṇas are lost are Cakrabhramari and Śirobhramari. Two separate pādas are preserved: यत्र सैवं सकृत्सकृत् and शिरोभ्रमरिका मता । For lakṣaṇas of these see S. Ratn. VII. 785 and 786.

चक्रभ्रमरिका खण्डसूच्यर्धे चक्रवद् भ्रमात् ।

and

शिरसैव भुवि स्थित्वोर्ध्वीकृतौ चरणौ दधत् ।
परिभ्रमति यत्र त्रिः सा शिरोभ्रमरी मता ॥

In Śirobhramari, the dancer stands on his head. 4. व्योमा 5. Definition repeated again after paritaḥ. 6. वयोयोगवगौ 7: अवहिता

* Vyoma-mukha seems to mean Diṅ-mukha. Is this the Dig-bhramari of Śārṅgadeva ? (S. Ratn. VII. 787).

चक्राङ्गौता[1] शिरोहस्ततिरिपच्छत्र[2]कुञ्चितैः ।
भवन्त्युपपदैः सप्त[3] भ्रमर्यः केवला इमे ॥ १०० ॥

अन्तर्बाह्यालगैर्विद्युदुचिताभ्यां तु संयुताः ।
केवला गनिका(?)[4]श्च स्युरन्यासां संकरान्मिथः ॥ १०१ ॥

पञ्चानां वा चतसृणां मिश्राणामुभयोरपि ।
भ्रमर्यस्संभ्रमन्त्यन्याः क्रमव्युत्क्रमभेदतः ॥ १०२ ॥

शतानि सप्त षष्टिश्च विचित्रं चतुरैः कृताः ।
अन्तर्बाह्यालगैर्युक्तस्तद्वद्बाह्यान्तरालगाः ॥ १०३ ॥

तथान्तरालगा बाह्या अलगान्तर्बहिर्गताः ।
बाह्यान्तरालगाश्चैवमलगा बाह्यकान्तराः ॥ १०४ ॥

क्रमव्युत्क्रमतश्चैव तिस्रः त्वन् (षन्?) नवतेः पराः ।
भ्रमर्यस्तद्वदन्याश्च कल्पनीया पथामुना[5] ॥ १०५ ॥

एतासामपि विज्ञेयः प्रस्तारः कूटतान[6]वत् ।
सा चास्माभिः स्फुटं गीतरत्नावल्यां प्रपञ्चितः ॥ १०६ ॥

इति श्रीमन्महाराजाधिराज - गणपतिदेव - गजसाधनिक-
जायसेनापति - विरचितायां नृत्तरत्नावल्यां
देशीस्थानक - करण - भ्रमरी - लक्षणं नाम
पञ्चमोऽध्यायः ॥

1. त्ता 2. May be read also as छन्न but Chatra is correct. 3. There are really eight, not seven. 4. May be गुणिताः 5. जथामुना or जथागुना 6. ताल

[अथ षष्ठोऽध्यायः]

मतङ्गेनोदितान्[1] देशी[2]नृत्तशोभाविधायिनः ।
पादान् षोडशसंख्याकान्[3] कथयामोऽधुना वयम् ॥ १ ॥

*सरिकः[4] स्वस्तिकोल्लालौ[5] स्फुरिका[6]र्धपुरा तथा ।
†पुराटी वेष्टनोद्वेष्टौ खुत्तार्ध[7]स्खलिताभिधा ॥ २ ॥

प्रावृतः पृष्ठतः क्षेपो [8]लताक्षेपो निकुट्टकः ।
समस्त्वलितकोत्क्षेप इत्येषां लक्ष्म कथ्यते ॥ ३ ॥

पुरस्सरो[9] द्वयोरेको[10] पादश्चेत्सरिका स्मृता । (सरिका)
स्वस्तिकः स्वस्तिकाकार चारिणोः पादयोर्मतः । (स्वस्तिकः)
उल्लासनं[11] क्रमेणाङ्घ्र्योर्यत्रोल्लालः[12] स कथ्यते ॥ ४ ॥ (उल्लालः)

पद्भ्यामङ्गुलिपृष्ठेन पार्श्वयोः पृष्ठतोऽग्रतः ।
गतिर्यत्र स्थितिर्वा स्यात् तां विद्युः स्फुरिकां बुधाः ॥ ५ ॥ (स्फुरिका)

यत्रोद्वृत्तेन पादेन निकुट्टेन निकुट्यते ।
[13]उद्वृत्तश्चरितो[14]ऽन्योऽर्धपुराटी साभिधीयते ॥ ६ ॥ (अर्धपुराटी)

1. तां 2. शीं 3. ता 4. तः 5. ल्लोलौ 6. ता 7. ङ्ग 8. ल missing
9. र 10. कां 11. न 12. ल्लोलः 13. त 14. May be चरणो.

*These are included by Śārṅgadeva among Deśi cāris (Bhaumā and Ākāśiki); see S. Ratn. VII. 915-923 and 981-1026. For a precious preservation of these see Pārśvadeva, Saṅgitasamayasāra, TSS. p. 68. Ullāla is found also as Ullola, and Ardha-skhalitikā as Aḍḍaskha-.

† अर्धपुरा पुराटी—अर्धपुराटी

निकुट्टनं मिथः पद्भ्यामुद्वृत्ताभ्यां पुराटिका । (पुराटिका)
वेष्टनं तद्वदन्यस्य पदेनैकेन वेष्टनम् ।
पश्चाद्धृतेन तेनैव पादेनोद्वेष्टनं पुनः ॥ ७ ॥ (उद्वेष्टनम्)

ताडनं चरणाग्रेण भुवः खुत्ताभिधीयते । (खुत्ता)
अर्धस्खलितिका तिर्यगेकाङ्घ्रेः स्खलनं स्मृता ॥ ८ ॥ (अर्धस्खलितिका)

लीलयाङ्गलता[1] यत्र वलिता[2] चरणं भवेत् ।
उद्वृत्तः प्रावृतं तत्स्यात्पुष्पेषोः केलिकाननम् ॥ ९ ॥§ (प्रावृतम्)

पृष्ठतश्चरणोत्क्षेपं पृष्ठोत्क्षेपं[3] प्रचक्षते[4] । (पृष्ठोत्क्षेपः)
पश्चान्निक्षिप्य यत्राङ्घ्रिं[5] लीलयाग्रे प्रसार्य च ॥ १० ॥

मही निकुट्यते तेन लताक्षेपस्स इष्यते । (लताक्षेपः)
अग्रेण कुञ्चितस्याङ्घ्रेः[6] अग्रे[7] स्थानं[8] निकुट्टकः ॥ ११ ॥ (निकुट्टकः)[9]

अग्रतः पृष्ठतः पादौ भवेतां पार्श्वतोऽथवा ।
युगपत्स्खलितौ यत्र सा समस्खलिता मता ॥ १२ ॥ (समस्खलितः)

आजानुनः स्थितस्याङ्घ्रेः[10] कुञ्चितस्या[11]परस्य चेत् ।
उत्क्षेपः स्यात्[12] पुरः पश्चाद्यत्रोत्क्षेपः स उच्यते ॥ १३ ॥ (उत्क्षेपः)

॥ इति पादः ॥

देशीनृत्त[13]पयोराशेः प्रेक्षकाणां मनोहराः ।
विचित्राः कतिचित्पाटमणयो[14]ऽस्माभिरुद्धृताः ।
यौगिकैर्नामभिस्सर्वे विज्ञेयास्ते मनीषिभिः ॥ १४ ॥

---

1. गतो 2. वालिता 3. पः 4. क्ष्यते 5. ङ्घ्रि 6. तः स्याघ्रेः 7. ग्र 8. न 9. Name missing. 10. तः स्यांघ्रेः 11. तः स्या 12. षस्या 13. वृत्तः 14. मनयो. Vema calls these Pāda-maṇis and once the ms. of his S. Cint. reads Pāṭa-maṇi also.

§ *Cf.* the close parallel in Pārśvadeva, SSS. (TSS) p. 69 : प्रावृतं नाम विज्ञेयं क्रीडास्थानं मनोभुवः ।

ऊरुद्वितयपार्श्वोरुव्यत्यासस्वस्तिकास्त्रिभिः ।
तलपार्श्वक्रमैश्च स्यात्पूर्वैस्ताडितमष्टधा ॥ १५ ॥

समस्वस्तिकपर्यायपृष्ठविच्युतपार्श्वतः ।
परं षड्विधमुद्वृत्तं ततः स्वस्तिकविच्युतम् ॥ १६ ॥

स्यात्तलोद्घट्टितं पादतलोद्घट्टितसंज्ञकम् ।
कलनूपुरकं चित्रलुठिते कुडु[1]पालगे ॥ १७ ॥

चतुष्कोणं त्रिकोणाख्यमथ मञ्जीरशिञ्जितम् ।
कुचुम्बिनी षडश्रं च[2] लङ्घितं प्रतिलङ्घितम् ।
इत्यष्टाविंशतिः प्रोक्ताः पाटाः पाटविचक्षणैः ॥ १८ ॥

तलाभ्यां ताडयेदूरू[3] समुत्प्लुत्य परस्परम् ।
[4]जवेन क्रमशो[5] यत्र य(त?)दूरुद्वयताडितम्[6] ॥ १९ ॥ (ऊरुद्वयताडितम्) (१)

पाद[7]मभ्यन्तरावृत्त्या स्व[8]पार्श्वगमितं ततः ।
तिष्ठन्तमङ्गुलीपृष्ठे तलेनोरु[9] यदा परः ।
ताडयेत्कथितं तज्ज्ञैस्तदा[10] पार्श्वोरुताडितम् ॥२०॥ (पार्श्वोरुताडितम्) (२)

एकस्याङ्गुलिपृष्ठेन द्वितीयस्य तलेन च ।
यत्र पादस्य पर्यायादसकृत्ताडयेन्महीम्[11] ।
तिष्ठन् वा दिक्षु गच्छन् वा तत्स्याद् व्यत्यासताडितम् ॥ २१ ॥
(व्यत्यासताडितम्) (३)

समस्थितस्य पादस्य पृष्ठे स्वस्तिकमाचरन् ।
एकाङ्घ्रिरङ्गुलीपृष्ठैस्तिष्ठेदन्यस्य पार्श्वगः ॥ २२ ॥

---

1. लु 2. खलश्रांक 3. Not clear. 4. य 5. सो 6. ता 7. ट 8. श्व 9. Not clear. 10. दा missing. 11. ह्री

तद्वत्स्याद्यत्र पूर्वस्तु तलेनावनिताडनम् ।
विदधीत समाख्यातमेतत्स्वस्तिकताडितम् ॥ २३ ॥ (स्वस्तिकताडितम्) (४)

अङ्गुलीपृष्ठपार्ष्णिभ्यां तलेनापि महीतलम् ।
निहत्य विरते पादे पार्श्वमन्यो व्रजेन्निजम् ।
निघ्नन्नुर्वीं मुहुर्यत्र तद्विताडितमुच्यते ॥ २७ ॥ (विताडितम्) (५)

अङ्गुलीपृष्ठभागेन पुरः पूर्वमुखाङ्घ्रिणा ।
स्थित्वा परेण तत्पार्ष्णिभागे तिर्यङ्मुखेन च ॥ २८ ॥

तलाभ्यां क्रमशो[1] यत्र सशब्दं ताडनं भुवः ।
पर्यायेण विधीयेत तदुक्तं तलताडितम् ॥ २९ ॥ (तलताडितम्) (६)

उत्प्लुत्य पार्श्वयोरङ्घ्र्योः पर्यायेण द्रुतं महीम् ।
ताडयेत्तलपृष्ठाभ्यां यत्र तत्पार्श्वताडितम् ॥ ३० ॥ (पार्श्वताडितम्) (७)

पादयो:[2] अङ्गुलीपृष्ठभागै[3]स्तिष्ठन्मुहुः क्रमात् ।
तलाभ्यां तत्क्रमेणैव सशब्दं ताडनं भुवः ।
यत्र कुर्वीत तत् तज्ज्ञैः[4] कीर्तितं क्रमताडितम् ॥३१॥ (क्रमताडितम्) (८)

उत्प्लुत्य युगपत्पादौ तिष्ठताङ्गुलिपृष्ठतः ।
अन्योन्यसंमुखीभूततलौ यत्र मुहुर्मुहुः ॥ ३२ ॥

ताडयन्तौ धरापृष्ठं तलाभ्यामन्तरान्तरा ।
समोद्वृत्तमिदं प्रोक्तं देशीनृत्तविशारदैः ॥ ३३ ॥ (समोद्वृत्तम्) (९)

---

1. From this word onwards, the definition is written twice over. 2. दयो repeated. 3. गौ 4. तत्त्वज्ञैः

उत्प्लुत्य स्वस्तिकाकारौ पराङ्मुखतलौ मिथः ।
पादावङ्गुलिपृष्ठेन तिष्ठतः[1] पुथिवीं मुहुः ।
तलाभ्यां ताडयेच्चेत(येतां च?)[2] स्वस्तिकोद्वृत्तनामनि ॥३४॥ (स्वस्तिकोद्वृत्तम्) (१०)

स्थितयोरङ्गुलीपृष्ठैरङ्घ्रयोरेकं पुरो[3] व्रजेत् ।
अपरः पृष्ठतश्चैव पर्यायेण मुहुः क्रियाम् ।
उत्प्लुत्योत्प्लुत्य कुर्वीत पर्यायोद्वृत्तसंज्ञकम् ॥ ३५ ॥ (पर्यायोद्वृत्तम्) (११)

कृत्वा र (मुहुः ?)[4] समोद्वृत्तौ तलेनास्पृष्टभूतलौ ।
करौ समाश्रितौ पृष्ठपार्श्वाभिमुखपार्श्विकौ ।
तिष्ठतो यत्र चरणौ पृष्ठोद्वृत्तं तदिष्यते ॥ ३६ ॥ (पृष्ठोद्वृत्तम्) (१२)

पृष्ठस्वस्तिकविक्षेपादेतदेव[5] कृतं यदि[6] ।
देशीनृत्तरहस्यज्ञैः विच्युतोद्वृत्तमुच्यते ॥ ३७ ॥ (विच्युतोद्वृत्तम्) (१३)

समावुत्प्लुत्य चरणावेकपार्श्वतलौ मुहुः[7] ।
तिष्ठतोऽङ्गुलिपृष्ठेन पर्यायात्पार्श्वयोर्द्वयोः ॥ ३८ ॥

मध्ये मध्ये महीपृष्ठं ताडयन्तौ तलेन यत् ।
पार्श्वोद्वृत्तं तदा प्राहुः पदपाटविचक्षणाः ॥ ३९ ॥ (पार्श्वोद्वृत्तम्) (१४)

तिष्ठन्तावङ्गुलीपृष्ठैस्तथैव रचितोत्प्लुती ।
स्वस्तिकेन च्युतिं पादौ युगपत्कुरुतो मुहुः ।
यत्र तज्ज्ञैस्तदाख्यातं नाम्ना स्वस्तिकविच्युतम् ॥ ४० ॥ (स्वस्तिकविच्युतम्) (१५)

1. पृष्ठत: 2. The verb here has to be in dual number. 3. रं 4. र alone stands in ms., one letter wanting for metre. मुहुः is suggested on the basis of Vema's S. Cint. 5. देवदेत 6. जदि 7. word repeated.

यत्र पादौ तलाग्राभ्यां तिष्ठन्तौ क्रमशो मुहुः ।
पार्ष्णिभ्यां मेदिनीपृष्ठे तालपातानुसारतः ॥ ४१ ॥

ताडयन्तौ चतुर्दिक्कं[1] कुरुतश्चेद्गतागतम् ।
तत्तालोद्घट्टितं प्रोक्तं देशीनृत्तविशारदैः ॥ ४२ ॥ (तालोद्घट्टितम्) (१६)

एकः[2] स्थानानुयायी स्यात्पाट्टा[3]नुत्पादयेत्परः ।
चारीर्वा चरणः पाद[4]तलो[5]द्घट्टि[6]नामनि[7] ॥ ४३ ॥ (पादतलोद्घट्टितम्) (१७)

[8]तिष्ठन्नङ्गुलिपृष्ठेन सव्यापारं समाचरेत् ।
यत्र तन्नृत्ततत्त्वज्ञैः कथितं कलनूपुरम् ।
अन्यत्रापि भवेदेत द्यौचित्यात्ताल[9]वाद्ययोः ॥ ४४ ॥ (कलनूपुरम्) (१८)

[10].....पादश्चेत्[11] चित्रपाटो[12]ऽलगे[13] भवेत् ॥ ४५ ॥ (चित्रपाटः) (१९)

1. From this letter up to तत्तालो repeated. 2. एक 3. पाय 4. पाट 5. तालो 6. टित 7. तामपिनि 8. The last line alone of the definition of Mañjiraśiñjita is found before this. 9. मवदेव तदौचित्यल 10. डमयति : Obvious gap here in which a greater part of the definition of Citrapāṭa is lost. The following is the full definition of Citrapāṭa in Vema's S. Cint.

पादं कुञ्चितमुद्यम्य स्वस्तिकाकारतो भुवि ।
विन्यस्य चाङ्गुलीपृष्ठेनान्तर्भ्रमरीमपि ।
कृत्वा चेदलगं कुर्यात् तच्चित्रमिति कथ्यते ॥

Then is found a verse defining along with this the 'Vicitra', obviously a variety of Citra, but not found in the enumeration :

पादस्योदञ्चनादूर्ध्वं कृत्वान्तर्भ्रमरीमपि ।
अलगं क्रियते यत्र तद्विचित्रं प्रकीर्तितम् ॥

11. श्चे 12. टे 13. गो

तिष्ठतो गच्छतो वाङ्घ्रेः पार्श्वमन्यः स्वपार्श्वगः ।
सशब्दमङ्गुलीपृष्ठतलाभ्यां लुठनं द्रुतम् ।
यत्र कुर्वीत तत्प्रोक्तं बुधैर्लुठित[1]संज्ञया ॥ ४६ ॥ (लुठितम्[2]) (२०)

पार्श्वयोरुन्मुखं पार्ष्णिं[3] वामदक्षिणयोर्दधत् ।
चरणाङ्गुलिपृष्ठेन हन्याद्भूमिं क्रमात्पुनः ।
अन्यः समस्थितो यत्र कुलुपं[4] तदुदीरितम् ॥ ४७ ॥ (कुलुपम्[4]) (२१)

जानुक्षेत्रे स्थितस्याङ्घ्रेश्चतुष्कोणं[5] यदाचरेत् ।
अन्यः खे कुञ्चितोत्क्षिप्तः स्वजानुवलनाद्यदा ।
बुधैरलगमित्येष तदा पाटः प्रकीर्तितः ॥ ४८ ॥ (अलगपाटः) (२२)

समस्थितस्य पादस्य पृष्ठतः पुरतः क्रमात् ।
स्वस्तिकं तच्च्युतिं कुर्वन्नुर्वीं हन्याद्विदिक्षु चेत् ।
अन्योऽङ्घ्रिरङ्गुलीपृष्ठैः चतुष्कोणं मतं तदा ॥ ४९ ॥ (चतुष्कोणम्) (२३)

एतदेव त्रिकोणं स्यादग्रे चेत्सकृदाहतिः ॥ ५० ॥ (त्रिकोणम्) (२४)

घाता यत्राङ्गुलीपृष्ठैस्तालपातपुरस्सरम् ।
पार्ष्णिनापि तथा कुर्यादेकाङ्घ्रिरपरः[6] पुनः ॥ ५१ ॥

द्विद्विघातान्तराले चेत्तलेनाहतिमाचरन्[7] ।
निजपार्श्वं व्रजेन्मञ्जु तदा मञ्जीरशिञ्जितम् ।
[8]त्रि (त्रिः ?) ताडितद्वितीयाङ्घ्रिर्यद्वा मञ्जीरशिञ्जिते ॥५२॥ (मञ्जीरशिञ्जितम्)
(२५)

1. लुंठनं 2. लुंठित लुंठितम्. 3. ष्णिः 4. May be कुडुप also, for the ms. usually has ल for ड 5. ण 6. रं 7. तलेनाल-पृहंतिमाचरन् 8. This line has strayed up and is found after Pādatalodghaṭṭita.

तलाभ्यामस्पृशन् भूमिं पार्श्वोद्वृत्तं द्रुतं यदा ।
विधीयेत तदा तज्ज्ञैस्समाख्याता कुचुम्बिनी ॥ ५३ ॥ (कुचुम्बिनी) (२६)

समोद्वृत्तं विधायाङ्घ्रिं पुरतस्तिष्ठतः समौ ।
अङ्गुलीपृष्ठभागेन पृष्ठोन्मुखतलौ पुनः ॥ ५४ ॥

मध्ये कृत्वा समोद्वृत्तं[1] पृष्ठेऽपि पुरतो यदा ।
मुहुरेवं क्रिया यत्र षडश्रं[2] तदुदाहृतम् ॥ ५५ ॥ (षडश्रम्[3])‡ (२७)

अग्रतोऽङ्गुलिपृष्ठेन (त्र्य)[4]श्रीभूय भुवि स्थितम् ।
चरणं चरणोऽन्यश्चेल्लङ्घयेत्प्रतिलङ्घयेत् ।
पर्यायेण तदाम्नातं[5] लङ्घितप्रतिलङ्घितम् ॥ ५६ ॥ (लङ्घितप्रतिलङ्घितम्) (२८)

अन्ये च संकरा[6]श्चैवं मिथस्सौन्दर्यकारिणः ।
पाटा विचित्राः कल्पा(ल्प्याः ?) - [7]न (?) छेकैः प्रौढबुद्धितः ॥ ५७ ॥

॥ इत्यष्टाविंशतिपाटाः ॥

देशीनृत्तस्य संक्षेपं बृहद्देश्यां[8] निरूपयन् ।
मतङ्गोऽ[9]कथयत्[10] पाटलक्षणावसितौ* यथा ॥ ५८ ॥

---

1. The third letter of this word is confusing. 2, 3. खलश्रम्
4. त्र्य missing 5. न्माणं 6. शंकर 7. one letter wanting for the metre. 8. श्या 9. ग 10. यन्

‡ Vema Bhūpāla's S. Cint. calls this by the synonym Ṣaṭkoṇa.

* Means 'at the end of his definitions of these Pāṭas'. The next line is what Matanga said in the Deśinṛtta

[1]स्वबुद्धया कल्पयित्वैवमन्यानपि समाचरेत्[2] ।
ततश्चिरन्तनाचार्याः[3] पादानुत्पाद्य तान्[4] पुनः ॥ ५९ ॥

देशीचार्य इति प्राहुस्तेषां चरणधर्मतः ।
भौम्यो नाभस्य इत्येताः[5] कथ्यन्ते[6] द्विविधाः[7] पुनः ॥ ६० ॥

आदौ समनखा पार्ष्णिरेचिता तलदर्शनी ।
अर्धमण्डलिका तिर्यक्कुञ्चितारव्यापकुञ्चिताः ॥ ६१ ॥

कातरोत्कुञ्चिता तिर्यङ्मुखा नूपुरविद्धिका ।
मदालसा परावृत्ता तथा लङ्घितजङ्घिका ॥ ६२ ॥

मराला[8] स्फुरिका चोरुवेणी संघट्टिताभिधा ।
हरिणत्रासिताभिख्या करिहस्ता कुलीरिका ॥ ६३ ॥

स्तम्भक्रीडनिका नाम्ना रथचक्रोरुताडिताः ।
सञ्चारिताथ विश्लिष्टा तलोद्वृत्ताभिधेत्यमूः ।
भूचार्योऽपि निरूप्यन्ते विंशतिः षड्भिरुत्तराः ॥ ६४ ॥

विद्युद्भ्रान्तापुरःक्षेपे अव[9]क्षेपाङ्घ्रिताडिते[10] ।
डमरी भ्रमरी दण्डपादा विद्धोर्ध्वजानुका ॥ ६५ ॥

---

section of his Bṛhaddeśi. *Cf.* Vema's S. Cint. Ch. 6, at the beginning of the section on Pāṭa-máṇis :

विचित्राः पाद(ट)मणयो लक्ष्य(क्ष्ये) कैश्चित्प्रदर्शिताः ।
'स्वबुद्धया कल्पयंश्चैवमन्यानप्याचरे'दिति ॥
पदता (वदता) मुनिना तेन मतङ्गेनापि सूचिताः ।

1. सु 2. चरन् 3. र्या 4. तात् 5. ता 6. ते 7. धः 8. लाः 9. ब missing. 10. तैः

अलातान्दोलिता सूचीविक्षेपा हरिणप्लुता ।
जङ्घालङ्घनिका जङ्घावर्ता चेति प्रचक्ष्महे ।
एताः षोडश संख्याताश्चारीराकाशिकाः* क्रमात् ॥ ६६ ॥

समपादे[1] स्थितौ[2] स्थाने तिरश्चैतौ[3] प्रसर्पतः ।
यदा पादौ समाख्याता तदा समनखाभिधा ॥ ६७ ॥ (समनखा) (१)

स्थानके यत्र पार्ष्णी स्तः पार्ष्णिपार्श्वगताभिधे ।
रेचितौ सा परिज्ञेया नर्तकैः पार्ष्णिरेचिता ॥ ६८ ॥ (पार्ष्णिरेचिता) (२)

संहतस्थानमास्थाय तिर्यञ्चौ[4] पृथगायतौ ।
चतुरश्रौ बाह्यपार्श्वाभ्यां[5] स्व[6]पादौ तिष्ठतो यदि ।
यदा तदा समाख्यातं नर्तकैस्तलदर्शिनी ॥ ६९ ॥ (तलदर्शिनी) (३)

भूमिपृष्ठ(घृष्ट ?)तलौ[7] मन्दं बाह्यतो भ्राम्यतः क्रमात् ।
यत्राङ्घ्री गच्छतः पश्चात्सार्धमण्डलिका मता ॥ ७० ॥ (अर्धमण्डलिका)(४)

कुञ्चितं चरणं यस्यां तिरश्चैतत्[8] मुहुः क्रमात् ।
स्वपार्श्वे निक्षिपेत्तिर्यक्कुञ्चिता सा विधीयते ॥ ७१ ॥ (तिर्यक्कुञ्चिता) (५)

चरणौ कुञ्चितौ किञ्चित्पृष्ठतो गच्छतः क्रमात् ।
यस्यामेषा समाख्याता नृत्तज्ञैरपकुञ्चिता ॥ ७२ ॥ (अपकुञ्चिता) (६)

---

1. दो 2. तो 3. श्चौते 4. last letter not clear. 5. Hypermetric; one letter in excess. Vema does not have the specification चतुरश्रौ in his definition of Taladarśini. 6. स्व seems needless; if it is dropped the metre will be quantitatively alright. 7. लो. 8. श्चैत्

* 'आकाशगाः' is probably the correct reading.

नन्द्यावर्तस्थितौ यस्यां चरणावपसर्पतः ।
पश्चाद्देशे समाख्याता नर्तकैः सकटीति सा ॥ ७३ ॥ (सकटी)* (७)

उत्क्षिप्य कुरु(ञ्चि?)तौ[1] यत्र चरणौ[2] पुरतः क्रमात् ।
विक्षिप्येते पुरः प्रोक्ता सेयमुत्कुञ्चिताभिधा ॥ ७४ ॥ (उत्कुञ्चिता) (८)

स्थानके वर्धमाने तु[3] पादौ सव्यापसव्यतः ।
सरतस्त्वरितौ यत्र सेयं तिर्यङ्मुखा स्मृता ॥ ७५ ॥ (तिर्यङ्मुखा) (९)

स्वस्तिके स्थानके पादौ पार्ष्णिनाग्रतलेन च[4] ।
रेचितौ भवतो यत्र सा स्यान्नूपुरविद्धिका ॥ ७६ ॥ (नूपुरविद्धिका) (१०)

मद्य[5]मत्तालसेत्येव गतिः स्यादव्यवस्थिता ।
यस्यां[6] चरणयोः सेयं यथार्थाख्या मदालसा ॥ ७७ ॥ (मदालसा) (११)

पृष्ठोत्तानतलं पादो बाह्यतश्चेत्प्रसारितः[7] ।
तदा देशीरहस्यज्ञैः परावृत्ततला स्मृता ॥ ७८ ॥ (परावृत्ततला)‡ (१२)

खण्डसूचिनि चेत्पादं ततमा[8]कृष्य वेगतः ।
[9]तज्जङ्घा लङ्घ्यतेऽन्येन तदा लङ्घितजङ्घिका ॥ ७९ ॥ (लङ्घितजङ्घिका) (१३)

---

1. तो 2. णः 3. Doubtful. 4. न 5. ध्य 6. स्याः 7. ताः 8. दततरा There is to be a word meaning 'lifted', for it is the leg folded at knee and uplifted that is to be drawn quickly; hence the reconstuction ततम्. *Cf.* Vema : स्थानके खण्डसूच्याख्ये प्रसृतं चरणं यदा। आकृष्य वेगात् etc. 9. Haplography. तज्जंघ्यते.

* The name found in enumeration for this Cārī is Kātarā. The S. Cint. mentions no such alternate name for Kātarā. In the S. Ratn. however this Deśi Bhaumacāri is called (with definition in identical terms) as Kātarā. See S. Ratn. VII. 979.

‡ Parāvṛtta in enumeration. S. Ratn. gives it as Parāvṛt tatala.

नन्द्यावर्ते स्थितौ[1] युग्मापार्श्वौ पादाग्रयोरपि ।
रेचितौ चरणौ यत्र सर्वतस्सा मरालिका ॥ ८० ॥ (मरालिका) (१४)

भूपृष्ठबाह्यपार्श्वाभ्यां पार्श्वयोस्सरणं द्रुतम् ।
पुरतो य-सा(यस्त्वसौ?) तज्ज्ञैः स्फुरिता परिकीर्तिता ॥८१॥ (स्फुरिता) (१५)

कृत्वोच्चैः स्वस्तिकं पादं पार्श्वाभ्यां पुरतो यदा ।
चरणौ घर्षतो[2] भूमिम्[3] ऊरुवेणी भवेत्तदा ॥ ८२ ॥ (ऊरुवेणी) (१६)

मुहुर्विषमसूचिस्थौ पादावुत्प्लुत्य भूतले ।
[4]पतन् संघट्टयेद्यत्र सेयं संघट्टिता मता ॥ ८३ ॥ (संघट्टिता) (१७)

कुञ्चिते चलिते पाद[5]तले स्वस्तिकतां गते ।
उत्प्लुत्य संहते यत्र[6] पातिते तामिमां जगुः ।
हरिणत्रासितामिख्यां चारीं चारीविचक्षणाः ॥ ८४ ॥ (हरिणत्रासिता) (१८)

संगतस्थानमास्थाय पार्श्वाभ्यामवनीतलम् ।
घृष्यते यत्र पादेन करिहस्तेति तां विदुः ॥ ८५ ॥ (करिहस्ता) (१९)

नन्द्यावर्ताभिधं स्थानमाश्रितौ चरणौ यदा ।
तिरश्चीनं प्रसर्प्येते तदा प्रोक्ता कुलीरिका ॥ ८६ ॥ (कुलीरिका) (२०)

पार्श्वे प्रसारितस्याङ्घ्रेः तलेन स्यान्मुहुर्यदा ।
स्थिताङ्घ्रि[7]पार्श्वसंश्लेषः स्तम्भक्रीडनिका तदा ॥ ८७ ॥ (स्तम्भक्रीडनिका) (२१)

1. स्थिता 2 तं 3. मिः 4. प written as ए 5. दे 6. त्र repeated.
7. घ्रिः

चतुरश्रस्थितौ पादौ परिश्लिष्टौ प्रसर्पतः ।
पृष्ठतो वा यदा प्रोक्ता रथचक्रा तदा बुधैः ॥ ८८ ॥ (रथचक्रा) (२२)

एकपार्श्वस्थ उत्प्लुत्य हन्यादन्योरुमङ्घ्रिणा[1] ।
भूस्थितेन सशब्दं तत्तदा स्यादूरुताडिता ॥ ८९ ॥ ([2]ऊरुताडिता) (२३)

मुहुराकुञ्चितं पादमुत्क्षिप्यान्येन योजयन् (येत् ?) ।
तलेन चरता तिर्यग्यदा सञ्चारिता तदा ॥ ९० ॥ (सञ्चारिता) (२४)

स्थानके पार्ष्णिविद्धेऽङ्घ्री[3] विश्लिष्टौ[4] उपसर्पतः ।
उतापसर्पतो यत्र विश्लिष्टा सा निगद्यते ॥ ९१ ॥ (विश्लिष्टा) (२५)

पादयोरङ्गुलीपृष्ठभागेन गमनं पुरः ।
क्रियते त्वरितं यत्र तलोद्वृत्तमिदं विदुः ॥ ९२ ॥ (तलोद्वृत्तम्) (२६)

॥ भूचार्यः षड्विंशतिः ॥

फालस्योपरि वै क्षिप्रं[5] पादमुत्क्षिप्य कुञ्चितम् ।
स्वपार्श्वभ्रामितं न्यस्येद् विद्युद्भ्रान्ता भवेत्तदा ॥ ९३ ॥ (विद्युद्भ्रान्ता) (१)

पादं[6] कुञ्चितमुत्क्षिप्य[7] प्रसार्य पुरतोऽद्भुतम् ।
स्वस्थाने निक्षिपेद्यत्र पुरःक्षेपेति तां विदुः ॥ ९४ ॥ (पुरःक्षेपा) (२)

बाह्यपार्श्वेन संश्लिष्य पृष्ठमूरोः परस्य चेत् ।
[8]पादोऽन्यः स्वनितम्बस्य समीपं गच्छति द्रुतम् ।
अवक्षेपा तदा लक्ष्यवेदिभिः परिकीर्तिता ॥ ९५ ॥ (अवक्षेपा) (३)

1. ण: 2. अनु 3. ङ्घ्रि 4. ष्टाद् 5. क्षिप्प 6. क 7. प्य missing.
8. पाद is clear ; next letter confusing.

वैशाखस्थानके क्षिप्रमुत्प्लुत्य दिवि पादयोः ।
तलाभ्यां तालिका दद्याद्यत्रोक्ता साङ्घ्रिताडिता ॥९६॥ (अङ्घ्रिताडिता) (४)

नानुदग्नं स[1]मुत्क्षिप्य कुञ्चितं चरणं द्रुतम् ।
यदान्तर्बहिरावृत्त्या भ्रामयेड्डमरी तदा ॥ ९७ ॥ (डमरी) (५)

प्रसार्य पुरतः पादं शरीरं भ्रामयेद्बहिः ।
द्रुतमन्यतलभ्रान्त्या यत्र सा भ्रमरी मता ॥ ९८ ॥ (भ्रमरी) (६)

विश्लेष्य स्वस्तिकं तिर्यगूर्ध्वमङ्घ्रेः प्रसारणम् ।
यत्र सा दण्डपादेति देशीविद्भिरुदाहृता ॥ ९९ ॥

पार्श्वप्रसारित[2]स्योरु स्थितः पादः कृताप्लुतिः ।
तलेन ताडयेत्[3] सोऽपि स्थितमेनं यदि स्पृशेत् ।
ऊरुपृष्ठ[4] स्वपार्श्वेन दण्डपादेति **मन्मतम्** ॥ १०० ॥ (दण्डपादा) (७)

यत्रोपरितलः पादः स्वस्तिकस्याग्रतो भवेत् ।
ईषदान्दोलितः सेयं बद्धेति परिकीर्तिता ॥ १०१ ॥ (बद्धा) (८)

ऊर्ध्वजानुं विनिष्पाद्य यस्यां पादं स कम्पयेत् ।
ऊर्ध्वजानुरियं देश्यां[5] चारी प्रोक्ता मनीषिभिः ॥ १०२ ॥ (ऊर्ध्वजानुः) (९)

किञ्चित्प्रसारितं पृष्ठे पादमन्येन लङ्घयेत् ।
त्वरितं यत्र सा तज्ज्ञैरलातेति प्रकीर्तिता ॥ १०३ ॥ (अलाता) (१०)

यस्यामान्दोलितः पादः पृष्ठतः कुञ्चितो मुहुः ।
भवेदान्दोलितेत्येषा चतुरैः परिकीर्तिता ॥ १०४ ॥ (आन्दोलिता) (११)

---

1. ज 2. तः 3. तालयेत् 4. ष्ठो 5. पश्यां or यश्यां

ऊरुपृष्ठं[1] द्वितीयस्य मुहुः पार्श्वेन संस्पृशन् ।
कुञ्चितः प्रश्रितोऽङ्घ्रिः यत्र सूचीति सा स्मृता ॥ १०५ ॥ (सूची) (१२)

प्रसार्य पुरतो यस्यां चरणं गगना[2]ङ्गणे ।
मुहुराकुञ्च[3]येदेतां विक्षेपेति प्रवक्ष्यते ॥ १०६ ॥ (विक्षेपा) (१३)

भूयो भूयः समुत्प्लुत्य प्रसार्य चरणौ पतेत्[4] ।
भूतले यत्र सा तज्ज्ञैः व्याहृता हरिणप्लुता ॥ १०७ ॥ (हरिणप्लुता) (१४)

तिर्यगाकुञ्चितस्याङ्घ्रेरुद्वृत्तस्यो[5]त्प्लुतौ यदा ।
अन्येन लङ्घयेज्जङ्घां जङ्घालङ्घनिका तदा ॥१०८॥ (जङ्घालङ्घनिका) (१५)

अन्तरभ्रमणस्याङ्घ्रेस्तलं पृष्ठेन जानुना ।
बाह्यतो भ्रमत[6]स्तस्य जानुपार्श्वे विनिक्षिपेत् ।
असकृद्यत्र सा ज्ञेया जङ्घावर्ताभिधा बुधैः ॥ १०९ ॥ (जङ्घावर्ता) (१६)

॥ इत्याकाशचार्यः षोडश ॥

*पर्यायेणाग्रपाश्चात्यभागाभ्यां तलयोर्द्रुतम् ।
प्रसर्पेतां चतुर्दिक्कं चरणौ यत्र सा बुधैः ।
तलसर्पणिका प्रोक्ता परैः सैव कुलीरिका ॥ ११० ॥ (तलसर्पणिका) (१)

आजङ्घामध्यमुत्क्षिप्य[7] स्थितस्य[8] अङ्घ्रेः[9] पुरो[10] यदा ।
ऊर्ध्वाधःप्रेरणैर्द्वित्रैः गान[11]पाटानुसारिभिः ॥ १११ ॥

---

1. ष्ठन् 2. गमणा 3. राकुञ्च repeated. 4. यत्ते or पत्ते 5. त्तास्यो 6. त missing. 7. माक्षिप्य 8. प्रस्थितस्य 9. घ्रे 10. परौ [?] 11. राम्रान

* From śl. 116 below, we have to take the following four cāris as combined cāris. I have not been able to trace these in any other text, but for Antara Padmāsana alone, see S.S.Sara. p. 67, vv. 148-9, under Deśi Sthānas.

नूपुरं मुखरीकुर्यात्पर्यायेण[1] विहायसि[2] ।
तदा हंसरुतं[3] ब्रूते[4] पादं जायच्चमूपतिः ॥ ११२ ॥ (हंसरुतम्) (२)

आलम्ब्यालम्ब्य भूभागमङ्गुल्यग्रैः प्रसर्पतः ।
[5]आकर्षता तले यत्र पुरतः पृष्ठतस्तथा ।
प्रेरयन्तौ च चरणौ सा तित्तिरिगतिर्मता ॥ ११३ ॥ (तित्तिरिगतिः[6]) (३)

उत्प्लुत्य गगने[7] पद्भ्यां[8] बद्ध्वा[9] पद्मासनं पुनः ।
विश्लेष्य[10] त्वरितं तिष्ठेद् बुधः पद्मासनान्तरे ॥ ११४ ॥

व्योम्नि पद्मासनं बद्ध्वा कृत्वा तस्य[11] विच्युतिम् ।
तथैवोपविशत्युर्व्यां यत्र[12] सम्यक् सुशिक्षितः ॥११५॥ (अन्तरपद्मासनम्)(४)

चारीणां व्योमभूस्थानां पाटानामिह [13]संकरात् ।
हस्ताद्यङ्गविशेषाच्च भवेदेषामनन्तता[14] ।
हस्ताद्यङ्ग[15]क्रिया चात्र स्यात्प्रयोगानुसारिणी ॥ ११६ ॥

देशीलास्यस्य[16] भेदानां प्रसिद्धानां समासतः ।
प्रव्यक्तानि विधास्यामः[17] लक्षणान्यधुना वयम् ॥ ११७ ॥

सौष्ठवं स्थापना[18] रेखा डालश्चालिश्चलावलिः[19] । (६)
ललिस्तृकनिरुल्लासः सुकलासमुरोऽङ्गणम् ॥ ११८ ॥ (११)

1. पार्यापण 2. दि 3. हंसः सतं 4. त 5. The actual words are not quite clear, though from the name, the nature of the movement is obvious. 6. मतिः 7. णे 8. पद्माः 9. वृद्ध्वा 10. ष 11. Metrically wanting in a syllable here; च, अपि or एव might have been here. 12. अत्र 13. शं 14. तः 15. क 16. लागोस्य 17. म missing. 18. णा 19. वलावलिः Cālivaḍa in S. Ratn. Owing to the defective condition of mss., these

भावः थरहरं[1] कित्तुर्देशीकारं निजापणम् । (१६)
डिल्लायी लवणिर्गीतवादिता[2]भिनयाह्वयाः ॥ ११९ ॥ (२१)

लयः कोमलिकोयारः[3] ततोऽनीकीतिसंज्ञकः । (२५)
अङ्गहारमनोधर्मावङ्गानङ्गं विवर्तनम् ॥ १२० ॥ (२९)

रिङ्का[4] मुखरसष्ठेवा विहसी थसकस्तलम् । (३५)
वितलं रसवृत्तिश्च ततो मसृणताभिधम् । (३८)
[5](अनुमानं प्रमाणा)ख्यं लङ्घितांशगती तथा ॥ १२१ ॥ (४२)

सुसन्धिः पादपाटाख्यं गतिस्थं चण्डनाभिधम् । (४५)
षट्चत्वारिंशदित्येषामथ लक्षणमुच्यते ॥ १२२ ॥

[6]यदुक्तं* सौष्ठवं स्थानं[7] तदेवात्रावगम्यते ।
किन्तु तस्यावगन्तव्या खर्विता[8] त्रिविधा निजैः ॥ १२३ ॥

‡चतुर्भिरथवाष्टाभिरथ द्वादशभिर्मता ।
अङ्गुलैरिह नर्तक्या जानुवङ्क्षण[9]नामनात् ॥ १२४ ॥

Deśi-lāsyāṅga names are preserved differently and in a corrupt manner in different texts, S. Ratn. (VII. 1215 ff.), S. S. Sāra (TSS. pp. 71-2) and S. Cint. The number also differs, 10 in S. Ratn., 20 in S.S. Sāra, 27 in S. Cint. and 46 in our text.

1. स्थाहरर 2. वाधान or वाद्यता 3. कोयीरः 4. Second letter not clear; Riṅkā is the form in the definition below. 5. Bracketted portion dropped. 6. अ 7. सार्यः 8. सर्वता 9. वंघेन

* See above p. 79 under the first sthāna Vaiṣṇava ; also pp. 82–83.

‡ These 4 lines occur earlier also under the general observations on Sauṣṭhava, pp. 82-83 above.

इच्छया भूमिपालानां तत्तद्देशानुसारतः ।
अतः परं तु खर्वत्वं[1] परं नृत्ये न शोभते ॥ १२५ ॥ (सौष्ठवम्) (१)

रेखायालङ्कृता रम्या स्थितिर्मुखरसेन च ।
नृत्यस्या[2]भिनयानां वदन्ते सा स्थापना तदा ॥ १२६ ॥ (स्थापना) (२)

अङ्गानां यत्र सर्वेषां मिथः शोभावि[3]धायिनाम् ।
सौष्ठवे सं(?)[4]निविष्टानां स्वक्षेत्रेषु यदा (?)[5] स्थितिः ।
हरेदखिलचित्तानि सा रेखेत्यभिधीयते ॥ १२७ ॥ (रेखा) (३)

मन्दानिलचलत्[6]पद्मदला[7]न्तजल[8]बिन्दुवत् ।
निभृतोऽङ्गस्य सञ्चारान्नृत्येऽसौ डाल उच्यते ॥ १२८ ॥ (डालः) (४)

मृदुमध्यलयं तालसाम्यरम्यं समागमम्* ।
त्र्यश्रत्वबहुलं पादकरकट्यूरुचालनम् ।
सममेव भवेद्यत्र सा चालि[9]रभिधीयते ॥ १२९ ॥ (चालिः[10]) (५)

सैव साम्मुख्य[11]भूयिष्ठा[12] सौष्ठवं न विमुञ्चति ।
यदा द्रुतलयो[13]पेता तदा प्रोक्ता चला[14]वलिः ॥१३०॥ ([15]चलावलिः) (६)

संगीतप्राप्तिसंभूतः [16]तत्सौन्दर्यनिरन्तरः ।
आनन्दातिशयः कोऽपि ललिरित्यभिधीयते ॥ १३१ ॥

तालच्छन्दानुगं तिर्यगु[17]पाङ्गादिवि[18]चालनम् ।
सुकुमारं विलासाढ्यं ललि[19]रित्यूचिरेऽपरे ॥ १३२ ॥ (ललिः[20]) (७)

1. सर्वत्वं 2. नृत्यासा 3. भि 4. श 5. स्वक्षेत्रसुहता 6. वला 7. जला 8. दल 9. 10. चारि 11. ख 12. ष्ठ 13. हि द्रतयो 14. 15. बला 16. तदा सौ 17. गो 18. व 19. 20. लडि

* The significance of 'Samāgama' is not clear.

प्रकारैः शिरसस्तालल्यच्छन्दानुसारिभिः ।
गतौ यद्वत्[1] स्थितौ तद्वत् तत्तद्भाव[2]मनोहरैः ।
रसिकप्रेक्षकानन्ददायिनी तृकनिर्भवेत् ॥ १३३ ॥ (तृकनिः) (८)

तालाद् द्वित्रिगुणैः शैघ्र्याद् भावाभिव्यञ्जकैर्यदा ।
श्लथसन्धिभिरङ्गस्य सूक्ष्मैरुल्लसनं मुहुः ॥ १३४ ॥ (उल्लासः) (९)

[3]नर्तकीहरणं (?) गीतवाद्यानां मध्ये मध्ये* विधीयते ।
शोभनं प्रौढनर्तक्या सुकलासं तदा भवेत् ॥ १३५ ॥ (सुकलासम्) (१०)

उर्ध्वाधः पुरतः[4] पश्चात् स्कन्धयोः स्तनयोरपि ।
द्रुतं विलम्बितं यद्वा ललितं तालमानतः[5] ।
पर्यायाच्चालनं[6] यत्र स्यादुक्तं तदुरोऽङ्कणम्[7] ॥ १३६ ॥ (उरोऽङ्कणम्) (११)

---

1. यद्वा 2. तद्वतद्भावगतौ Here गतौ is repeated; part of तत्तद् is dropped owing to the proximity of तद्वत्. 3. The line is corrupt and probably contains parts of two lines ; नर्तकीहरणं, itself a likely corruption of यदेकीकरणम्, forms the beginning of the first line and the second line may be.....गीतवाद्यानां मध्ये मध्ये विधीयते । Sukalāsa is the concerted display of the voice and the instruments along with the dance in between courses of dance. Compare S. Cint.

विधाय चारीलास्याङ्गपादादीनां तु चालनम् ।
मेलनं गीतवाद्याभ्यां विदधात्यन्तरान्तरा ।
प्र-भा नर्तकी यत्र सुकलासं तदुच्यते ॥

which is, as in other cases, pretty close to Jāya.

4. B. परतः 5. B. ललि.....भुमानतः । 6. A. B. तालनम्
7. A. B. ङ्कणम्. C. ङ्गना.

* The long gap in A and B ends here.

[1](प्र)वर्तमाने एकस्मिन्[2] नवौ यत्र[3] परौ लयौ
[4]योजयन्त्या यथायोग्यं[5] नर्तक्यापि प्रगल्भया[6] ।
नृत्येते[7] चक्रवच्चारु[8] नृत्येऽसौ लय उच्यते ॥ १४७ ॥ (लयः)

लयक्रीडाभिरङ्गानां वर्तनावलनादिभिः ।
सज्यते सुकुमारा*भिरार्द्रता[9] मनसो[10] भृशम् ।
तन्वङ्ग्या[11] सहजा[12] नृत्ये सेयं कोमलिका मता ॥ १४८ ॥ (कोमलिका)

नृत्यस्यावयवाः पूर्वं[13]प्रक्रान्ताः[14] ताल[15]युक्तिभिः ।
गत्या[16] सर्वाङ्गशोभिन्या वर्धेरन्[17] उत्तरोत्तरम् ।
नर्तक्याश्चतुरायाश्चेदोयारः कीर्तितस्तदा[18] ॥ १४९ ॥ (ओयारः)

गीतवाद्ये यदा ताल[19]लये च[20] स्खलनं[21] विना[22] ।
नर्तकी तनुते नृत्तं[23] तदानीकीति[24] कीर्तिता[25] ॥ १५० ॥ (अनीकी)

---

1. A.B. 'प्र' wanting. S. Cint. has here प्रवर्तमाने; also metrical considerations require it. 2. A.B. य एकस्मिन् It might have read लये कस्मिन् with just वर्तमाने, but then कस्मिन् will have to be taken as कस्मिंश्चित् 3. A. नव यत्र B अपरत्र 4. A.B. Gap wrongly indicated. 5. A.B. यथा यथा यो 6. A.B. Runs into next line. 7. A. B. नृत्यते स्म 8. A.B. चकचारु 9. A.B. राद्रता 10. B शो 11. A.B. तद्वयङ्ग्या C. मृद्वङ्ग्या 12. A.B. स्वभया 13. C. स्मृत्वे 14. A.B. Visarga wanting. C. word missing. 15. C. missing. 16. C. माया 17. A. बन्धेरन् C. बद्धैः 18. C. प्रकीर्तितः without तदा 19. C. ताले 20. A.B. चुः 21. A B. स्खलितं 22. A.B. After this is found लये चुः extra repeated from end of the first pāda of the verse. 23. A B. नृत्यं 24. A.B. निकितिः 25. A.B. तदा after this.

* C. starts again here. But before this and after स्तनयोः there is the word निष्पाट whose anvaya in not clear.

स्मरचापलतेवाङ्गयष्टिः[1] पार्श्वद्वयेन[2] चेत् ।
सविलासा[3] मिलत्तालल्या विनमति[4] क्रमात् ।
हरणादन्तरङ्गाणामङ्गहारस्तदा मतः ॥ १५१ ॥ (अङ्गहारः)

[5]उपदिष्टात् पृथग्दृष्ट्या[6] मनोवृत्यनुकूलया ।
हस्ताद्यङ्गक्रियायोगं प्राप्तया व्यञ्जितो[7] गुणः ।
कोऽप्यपूर्वो[8] मनोहारी मनोधर्मो निगद्यते ॥ १५२ ॥ (मनोधर्मः)

नृत्ते यल्लास्य[9]मुद्दिष्टं निजै[10]रङ्गैस्तदान्वितम् ।
अङ्गमित्युच्यतेऽनङ्गं[11] ताण्डवाङ्गतरञ्जितम् ॥ १५३ ॥ (अङ्गमनङ्गं च)

करण[12]भ्रमरीपादचारीहस्तैर्यथोचितम् ।
वाद्याक्षरसमं[13] नृत्येद्यत्र तत्स्याद्विवर्तनम् ॥ १५४ ॥ (विवर्तनम्) ॥

[14]उद्धृत्य चालयित्वाङ्ग[15]माहरन्ती सविभ्रमम् ।
जनं वञ्चयमानेव[16] पार्श्वतः पुरतोऽथवा ।
नर्तकी[17] तनुते[18] नृत्तं यदा झङ्का[19] तदा मता ॥ १५५ ॥ (झङ्का[20])

[21]तत्तन्नृत्तोचिताभीष्ट[22]नेपथ्यरचनाभुवः ।
प्रसन्नमुखरागस्य कान्तिर्मुखरसः स्मृतः ॥ १५६ ॥ (मुखरसः)

1. A.B. no visarga 2. A.B. दयेन 3 B. स 4. A. विनः मति C. विरमति 5. A. उपवृष्ट्यात् B. उपदृतव्यात् 6. C. Corrupt. 7. C. Corrupt. 8 A.B. कोपूर्वो 9. C. मन्दास्य 10. B.C. ज 11. A.B. रङ्गं 12. C. णं 13. C. Corrupt. 14. C. अ-तां 15. A.B. ङ्चलयित्वाङ्ग 16. B. याचमानेव 17. A.B. कीं 18. A.B. तो 19, 20. B. शङ्का C. रिङ्का The S.S. Sāra calls it झङ्का and in the S. Cint. ms., it is found as त्सङ्का 21. B. whole verse dropped. 22. C. Gap here; second pāda lost.

उत्तरङ्गौ यदापाङ्गौ[1] स्वभावाद्भावगर्भितौ[2] ।
नर्तने वामनेत्रायाः[3] स्यातां[4] ठेवा[5] तदा मता ॥ १५७ ॥ (ठेवा)
स्मितं[6] वक्त्रस्य विहसी[7]पद्मस्येव[8] मनोहरम् ॥ १५८ ॥ (विहसी)

[9]चञ्चरीकनमद्गुच्छ[वल्ली][10]लीलानुकारिणी ।
स्तनाधोदेशनमनाद्[11] यदा[12] त्रस्तेव नर्तकी[13] ॥ १५९ ॥

[14]बाह्यानुगं[15] विलासाढ्यं[16] स्तनाधो नयनं[17] सकृत् ।
मध्ये मध्ये प्रकुर्वीत नृत्तस्य धसकस्तदा ॥ १६० ॥ (धसकः[18])

पाटाद्याः[19] प्रतिभासन्ते दुष्कराःसुकरा इव ।
[20]क्रमाद्यङ्गसमायुक्ता यत्र तत्तलमुच्यते ॥ १६१ ॥ (तलम्[21])

चारीपाटादिकं यत्र सुकुमारं निसर्गतः ।
कृतं बलेन[22] कठिनमेत[23]द्वितल[24]मीरितम् ॥ १६२ ॥ (वितलम्[25])

संभोगो विप्रलंभो वा गीतस्यार्थोऽभि[26]नीयते ।
अङ्गैर्यथोचितैः[27] नृत्तैः तद्भावाकृष्टचित्तया[28] ।
नर्तक्या यत्र भावज्ञा[29] रसवृत्तिमिमां विदुः ॥ १६३ ॥ (रसवृत्तिः)

1. B. वाङ्गौ 2. C. गर्वितौ 3. A B. वमनेत्रया 4. A. स्यार्ता B. स्यात् 5. A. तावा B. तावो 6. C. स्मृतं 7. A B. सि 8. B. वर्त्मस्येव 9. B. स C. This whole line missing in C. 10. A.B. Gap restored from sense and S. Cint. 11. A. धमना B. मदन C. मननात् 12. A. दन्या B. दत्या 13. A.B. क. 14. A पा 15 A.B. प. B. 16. A.B. र्थं 17. A. स्तनयोन धनम् 18. A. धसकाः B. Name missing. 19. B. पाठाद्याः 20. C. क; This letter alone is found; then without indication of gap, latter quarter of the line is found. 21. A.B. तद्द 22. B. कृतबं लेन 23. A.B. कमेत..... 24. A.B. तद्द 25. A. द्वितद्दम् B. वितद्दम् 26. A. हि 27. C. तं 28. C. र्चितया 29. C. The whole pāda dropped.

अभिव्यञ्जित[1]शृङ्गारा स्निग्धा दृष्टिः[2] विराजते[3] ।
नृत्तहस्त[4]सखी यस्यामियं[5] मसृणता मता ॥ १६४ ॥ (मसृणता)

नृत्तप्रस्तुतयोर्गीतवाद्ययोस्सदृशं दृढम्[6] ।
कृतैक[7]भ्रू[8]लताक्षेपा वितर्कयति[9] नर्तकी ।
[10]डोलायितमना यस्मिन् अनुमानमिदं मतम् ॥ १६५ ॥ (अनुमानम्)

प्रमाणं गीतवाद्याभ्यां नृत्तस्य समता भवेत् ॥ १६६ ॥ (प्रमाणम्)

यदा विश्रम्य[11] विश्रम्य[12] लङ्घयन्ती मुहुर्मुहुः ।
[13]लास्यस्यावयवान्[14] नृत्ये नर्तकी[15] लंघितं तदा ॥ १६७ ॥ (लंघितम्)

शस्त्र[16]व्यायामभेदेषु नर्तनेष्वितरेष्वपि ।
रम्यानंशान्क्षणं नृत्ते नर्तकी दर्शयेद्यदा[17] ।
उचितावसरे[18] कांश्चित्[19] तदांशगतिरुच्यते ॥ १६८ ॥ (अंशगतिः)

[20]भाण्डवाद्यात्पृथग्भाण्डवाद्यप्राप्तौ विचक्षणा[21] ।
तालात्तालान्तर[22]प्राप्तौ यथा सन्धिर्न लक्ष्यते ।
[23]तथा चेन्नर्तकी[24] नृत्येत्[25] सुसन्धिः सोऽभिधीयते ॥ १६९ ॥ (सुसन्धिः)

---

1. C. विजित 2. B.C. ष्टि 3. A.B. जिते 4. A. स्ते 5. A. म B. व 6. A.B. द्रुतम् 7. B. तौक 8. B. द्रु 9. A.B. वितर्क इति 10. B. सोढायित C. —लायत 11, 12. श्राम्य 13. C. वाद्यस्य 14. A.B. वे 15. C. नृत्तेका 16. C. Gap; next two words dropped. 17. A B. त्तदा 18. B. उचितप्रसरे 19. A. कश्चित् 20. A. भाण्डावन्द्याः B. भाण्डावद्याः 21. B. प्रचक्षणा C. विचक्षणम् 22. A B रं 23. C. first two letters missing. 24. B. चेनं 25. A.B. नृत्येसु C. नृत्यये

स्फुटमुच्चारयन्तीव[1] वाद्यपाटा[2]क्षराणि चेत् ।
पाद[3]पाटै[4]र्निजैः पूर्वकायरेखा[5]ममुञ्चती[6] ।
नर्तकी ललितं[7] नृत्येत्पादपाटः[8] तदा मतः ॥ १७० ॥ (पादपाटः[9])

मार्गदेशीगतं यद्वा समग्रं लक्षणान्वितम् ।
[10]वाद्यतालयुतं नृत्तं गतिस्थं प्रणिगद्यते[11] ॥ १७१ ॥ (गतिस्थम्)

गीतानुगस्य वाद्यस्य गीतेन रहितस्य वा ।
उचितं नर्तनं कृत्वा तदन्ते प्रौढनर्तकी ।
नृत्यस्य त्यागमाधत्ते[12] सौष्ठवेन युताथवा[13] ॥ १७२ ॥

[14]क्षणं निष्पन्दितैरङ्गैस्तिष्ठेच्चित्रार्पिता[15] यथा ।
यत्र चण्डन[16]मित्येतत् नर्तकैः[17] परिकीर्तितम् ॥ १७३ ॥ (चण्डनम्)[18]*

॥ इति देशीलास्याङ्गानि ॥

नर्तने गतयस्तिस्रो द्रुतमध्यविलंबिताः[19] ।
दीर्घाल्पतालकालेषु[20] संभवन्त्यखिले[21]ष्वपि ।
एताः[22] शुद्धाः[23] पुनस्तासां[24] संकीर्णाः[25] संकरात्[26] मिथः ॥ १७४ ॥

---

1. A.B. इव missing. 2. A.B. दा 3. C. पद 4. A.B. दैः 5. B. रेखा missing 6. A. ममुञ्चयति B. ममुञ्चयन्ति; also a wrong gap indicated after this. C. ममुञ्चयति 7. A.B. ता 8. A.B. दाः 9. A.B. दः C. पदपाटः 10. B. पा 11. A.B. प्रतिपद्यते 12. A.B. माथ 13. A.B. सौष्ठवेन यने न वा 14. A.B. क्षणात् 15. B. तिर्यञ्चित्रार्पिते 16. A.B. तच्चन 17. A.B. की 18. A.B. चण्डम् 19. A. तं B. तः C. ता 20. A.B. वाद्येषु 21. A. जले B. जिले 22. A.B. ता 23. A.B. सिद्धाः 24. A. नां 25. A.B.C. र्णा 26. A.B. रा C. शंकरो

* *Cf.* S S.Sāra where this is given earlier on p. 53, śls. 140 ff.

आदिमध्यावसानेषु राजन्ति[1] स्वयमेव या:[2] ।
ता:[3] शुद्धा:[4] स्युर्द्वयोर्योगात् सङ्कीर्णास्तिसृणामपि ॥ १७५ ॥

द्विवारचरण[5]न्यासं तालस्यैकस्य[6] मानत: ।
कुर्वती नर्तकी गच्छेद्यस्यां सा[7] कथिता द्रुता[8] ॥ १७६ ॥

[9]एकवारं तु मध्या स्यात्[10] तालमानं तु तत्पुन: ।
*एकवारमियन् (?)धीरै: विनिर्दिष्टा विलंबिता ॥ १७७ ॥

विलंबितद्रुता मध्यविलंबा द्रुतमध्यमा ।
तिस्र: स्यु:[11] वृत्तय[12]स्तासामिति षट् सङ्करात्[13] द्वयो: ॥ १७८ ॥

तयोरेव तु कस्या[14]श्चिदावृत्त्या संभवन्ति[15] षट् ।
मध्याद्यन्ते द्रुताद्यन्ते विलंबाद्यन्तिमे इति[16] ॥ १७९ ॥

द्रुतमध्यविलम्बाथ मध्यद्रुतविलम्बिता[17] ।
विलम्बद्रुतमध्या च मध्य[18]लम्बितत(स?)द्रुता ॥ १८० ॥

1. A. राजश्री B. राजन्ती C. रायन्ति 2. A B. या C. जा: 3. A.B. तां C. भा: 4. A.B.C. द्धा 5. A.B. द्विवारणरस C. द्विवारणं चरणं 6.A.B. क्येन 7. A. स 8. A. त: C. ता: 9. C. This and the next line missing. 10. B. स्या 11. A.B. तिस्रस्य: 12. C.Corrupt. 13. A.B. रा C. Corrupt. 14. C. क- 15. A.B. नि 16. A.B. जति 17. A.B.C. का A. has an extra वि after का 18. A. लभ्य B. लक्ष्य

* The portion describing Vilambita requires correction; it should mean the further lengthening out of the tempo of the beat.

[अथ सप्तमोऽध्यायः]

तिथिस्सर्वा विना रिक्ता[1] त्रयो वारा बुधादिमाः[2] ।
हस्तः[3] शतभिषग्पुष्यावनूराधोत्तरात्रयम्[4] ।
धनिष्ठा[5] रेवती ज्येष्ठा नृत्यारंभे प्रशस्यते ॥ १ ॥

सौधे केलिवने रम्ये शाद्वलेऽन्यत्र वा शुभे* ।
स्थाने[6] योग्या विधातव्या वितानादिविचित्रिता[7] ।
स्थिरा श्लक्ष्णा समा गौरी[8] कृष्णा[9] वा रङ्गभूर्मता ॥ २ ॥

हेमन्ते शिशिरे चोष्णा[10] वसन्तग्रीष्मयोर्हिमा[11]§ ।
†घनागमापगमयोः[12] साधारणगुणा[13] तथा ‡ ॥ ३ ॥

विघ्नेश्वरं[14] सुरज्येष्ठं[15] वैकुण्ठप्रमुखान् सुरान्[16] ।
भारतीं[17] चण्डिकां[18] मातृ[19]समाजं[20] कुलदेवताम्[21] ॥ ४ ॥

---

1. A.B. क्ताः 2. C. मे 3. A.B. स्ता 4. A.B. रायणम् 5. B. ष्ठो 6. A.B. न 7. A.B. तो 8. A. गिरा B. गीर 9. A. भृष्णा 10. A.B.C. खोष्णा 11. B. माः C. विनाजं 12. A.B. पगंयो 13. A.B. गुणाः C. गुणे 14. A.B. विश्वेश्वर 15. A B. पेज्यष्ठ 16. A.B. वैकुण्ठशितिकण्ठराः । 17. A.B. भारतीः C. सरस्वती 18. A. B.C. का 19. A.B. ता 20. A. सामा B. समानं 21. A.B.C. ता

* *Cf.* Someśvara, Mānasollāsa, at the end of the dance section:

हर्म्ये वा गृहमध्ये वा प्राङ्गणे वा मनोहरे ।
उद्याने शाद्वले स्थाने कुर्यान्नृत्तविनोदनम् ॥

§ हिमा has to be understood as शीता

† Ghanāpagama is Śarad.

‡ The meaning is that the Stage or place of dance should be kept warm in Winter, cool in Spring and Summer and in normal temperature in Rains and Autumn.

आतोद्यमखिलं तालं[1] दण्डिकां[2] स्थूणयोर्द्वयम् ।
रङ्गभूमिमुपाध्यायं कन्यकाश्च यथाविधि ॥ ५ ॥

विप्रेणाभ्यर्चयेच्छुभ्रैर्गन्धपुष्पाक्षताम्बरैः[3] ।
धूपैरारार्तिकैर्दीपैः[4] नैवेद्यैर्विविधैरपि ॥ ६ ॥

षट्सप्तवर्षदेशीयां गौरीं* यद्वा तु[5] रोहिणीम्† ।
कन्यां चार्धोरुकं[6] गाढं वसानां शिक्षयेच्छ्रमम्[7] ।
ततः स्तनोद्गमे जाते दधानामपि कञ्चुकम् ॥ ७ ॥

वैणवीं[8] दण्डिकां श्लक्ष्णां दोषहीनां सुखग्रहाम् ।
सप्तभिः पर्वभिर्युक्तां मूलतो[9] गात्रवर्तनैः[10] ॥ ८ ॥

गात्र[11]सौष्ठवसिध्यर्थं[12] कन्यानां स्तनसंमिताम् ।
[13]प्रागग्रमुदगग्रं वा स्थूणयोर्विनिवेशयेत् ॥ ९ ॥

[14]हस्ताभ्यां दण्डिकां धृत्वा नर्तकी[15] स्थैर्यसिद्धये ।
आचार्यस्योपदेशेन मार्गदेशीविभागतः ॥ १० ॥

---

1. A.B. ल C. तं 2. A.B. दण्डका C. दण्डिका 3. A.B. तां वरैः 4. A.B. रातिगैः 5. B. ति C. थ 6. A.B. कुर्कं 7. A श्रमान् B. शमान् C. शुभम्. It should properly be श्रमम् in singular. 'Śrama' means dancing exercises. 8. A.B. वैष्णवीं C. वैनवां 9. C. कुलतः 10. A. मातृवतनैः B. मात्रवर्धनैः C. मातृदैवतैः 11. A. गात्रं B. गात्रवं 12. A.B. र्थं: 13 A. पादाग्र 14. B. कृता 15. A.B. कै

* A very young girl.

† A girl of about nine or one just attained puberty.

स्थानादीन् सुकरानादौ प्रयोगान्दुष्करान्[1] ततः ।
अभ्यस्येच्छनकैर्नित्यं यथा श्रान्तिः[2] न जायते ॥ ११ ॥

बुद्ध्वा सिद्धान् प्रयोगांस्तान् तालैस्संयोजयेत्पुनः[3] ।
अथैतान्[4] वक्त्रवाद्येन† गीतेनापि क्रमात्ततः ॥ १२ ॥

गुरुं सन्तोष्य बृन्देन सह स्वर्णाम्बरादिभिः ।
शुभे हि[5] पूर्ववत्पूजां विधायातोद्यवादकैः[6] ।
सार्द्धं[7] सर्वेण बृन्देन श्रमं कुर्वीत नर्तकी[8] ॥ १३ ॥

प्रौढायामथ[9] नर्तक्यां गीते वाद्येऽथ नर्तने ।
[10]पारंपर्यात्समायात[11]मभ्यासस्याप्य[12]गोचरम् ॥ १४ ॥

श्लोकानां पञ्चकेनात्र सार्धेन प्रकटीकृतम् ।
रहस्यमुपदेष्टव्यमाचार्येण[13]दमादरात् ॥ १५ ॥

गीतस्यावयवा[14]नङ्गैः भावान्[15] दृष्टिविचेष्टितैः ।
हस्तैरर्थं[16]लयं[17] पद्भ्यां वर्णान्[18] पाटैः[19] प्रदर्शयेत ॥ १६ ॥

गीताक्षरसमं वाद्यमवाद्यं[20] गीतमेव वा[21] ।
लास्याङ्गैः[22] पाद[23]हस्ताद्यै[24]स्तन्मित्रै(श्रैः?) नृत्त[25]मानयेत् (?) ॥ १७ ॥*

---

1. B. त्पुष्करान् 2. B. भ्रान्तिः 3. A. द्भरुः 4. A.B. तां 5. C. क्षि
6. A. -द्यपादकैः B. दपादकैः 7. A.B. सर्वां 8. C. कुर्यात्प्रयत्नतः
9. C. यथाशक्त्याथ 10. A.B. परं पर्यात् 11. B. ता 12. A.B. पि
13. B. णे dropped. C. gap; whole word missing. 14. C. Corrupt. 15. A.B. वात् 16. A. र्धं 17. A. यया B. ययं
18. A.B. र्णाः 19. B. दैः 20. A.B. gap; word missing.
21. A.B. च 22. A.B. ङ्ग 23. A. ट C. gap 24. C. gap
25. B. हृत्त C. नृत्य

† वक्त्रवाद्य seems to refer to the oral recital of jatis or rhythm-syllables.

* The sense is not clear.

प्राणेशं[1] भावयन्ती[2] स्वं[3] मानसेन[4] सभापतिम् ।
गीतार्थी[5]पतितान् भावान् व्यञ्जयन्त्य[6]नुरञ्जयेत् ॥ १८ ॥

येषु येषु प्रयोगेषु प्रेक्षकाणां रुचिर्भवेत् ।
सम्यग्ज्ञातेङ्गिता[7] कामं भङ्ग्या[8] तांस्तान्[9] प्रदर्शयेत् ॥ १९ ॥

रसानां विनियोगेषु यतो हेतोः करो भवेत् ।
दृष्टिर्मनश्च भावश्च तत एव भवेत्क्रमात् ।
रसानां पुनरुत्पत्तिर्भावैर्भवति भावितैः ॥ २० ॥

॥ इति शिक्षापद्धतिः ॥

*अथ पात्रस्य नृत्तार्थं कथ्यते वाद्यपद्धतिः ।
मतङ्गस्य मते प्रोक्ता **बृहद्देशी**विधानतः ।
नृत्तप्रकरणे शुद्धा विचित्रा चेति[10] सा द्विधा ॥ २१ ॥

समहस्तो भवेत्तत्र प्राक्सर्वातोद्य[11]संभवः ।
प्रावृडा[12]रंभसंरंभगम्भीरांभोधरध्वनिः ।
रङ्गप्रत्यूहशान्त्यर्थं‡ नायकस्यापि[13] वृद्धये ॥ २२ ॥

वादनात्समहस्ताद्यैः[14] पाटै[15]रन्वर्थसंज्ञकः[16] ।
भृशं समप्रहाराभ्यां हस्ताभ्यामपि वादनात् ॥ २३ ॥

तदनु प्रविशेद्रङ्गे समपादेन नर्तकी ।
कृतसन्दंशिका[17] कुर्यात् वामपादं निकुट्टितम् ॥ २४ ॥

---

1. B. श: 2. A. B. न्त 3. A. स्व 4. A. corrput. 5. B. र्थं C. र्थान
6. C. व्यञ्जयेता 7. A. B. ज्ञाने गीत C. ज्ञातेंङि 8. C. Corrupt.
9. A. B. तास्ता: 10. A. B. वेति 11. A.B. नोद्य 12. A.B.—वृद्धा
C. प्राविटा 13. C. भि 14. C. Corrupt. 15. B. पादै: C. बांगै:
16. A.B. कम् 17. A. सन्दंशिता B. सन्देशिता

*From here upto śl. 33, quoted in the Saṅgītasārāmṛta of Tulaja; see my Introduction to it (Music Academy edn.) pp. xlii-xliii.

‡ रङ्गप्रहर्षणीयार्थं in Sārāmṛta citation.

मुखत्रयेण[1] कुर्वीत साङ्गेन[2] पुटिलं[3] ततः ।
तत्र प्रवर्तयेद्गीतम[4]थैतद्विनिवर्तयेत् ॥ २५ ॥

कुर्यान्मुखत्रयेणाथ पदैरङ्गैः प्रवेशिकम्[5] ।
विदधीत कियत्कालं गतिं[6] मण्ठिकया[7] ततः ॥ २६ ॥

क्रमात्तदनु योजेन* खण्डयत्या पदेन[8] च ।
मलपेन तथाङ्गेन पाटैश्च सुमनोहरैः ॥ २७ ॥

शुष्कवाद्यं प्रयुञ्जीत प्रवेश[9]पदयोः[10] पुनः ।
शङ्ख[11]कांस्यादि[12]संभृता[13] मृदङ्गकरटोद्भवाः ।
पाटा विचित्रताहेतोः[14] वाद्याः श्रोत्रसुखावहाः ॥ २८ ॥

निर्दिष्टोऽयं विधिर्नित्यं भावि[15]तालचतुष्टये ।
गीतं मट्टेन[16] तत्रादौ किञ्चित्कालं प्रवर्तयेत् ॥ २९ ॥

ततः पूर्वोक्तमेवात्र शुष्कवाद्यं ततः परम् ।
अवच्छेदं[17] ततः कुर्युः अवधानपरायणाः ॥ ३० ॥

1. A.B. यौ च 2. A.B. सनङ्गेन 3. C. पुटिनं Sārāmṛta-citation reads कुटिलं 4. A.B. ति 5. C. प्रदेशकम् Sārāmṛta-citation पदै रङ्गै प्रवेशकम् 6. A. तिः 7. A.B. मथितया 8. A. खण्डयत्पदेप्रेण B. खण्डयत्पादेप्रेन 9. A. शः 10. A.B पादयोः 11. A.B. खं 12. A.B. कांस्याल Kāmsya is alright, but Kāmsyāla is obscure; it may be Kāhala which is also included in the orchestra; but the correct reading is likely to be कांस्यादि restored above. 13. A.B. संरुता 14. A.B. तो 15. B. भवि 16. A.B. मर्देन Sārāmṛta-citation अर्धेन 17. A. अयश्छेदं B. अयलद् Sārāmṛta-citation लयच्छेदम् 18. A.B. कुर्याम्

* Yoja seems to refer to Yojana, another name for the Tāla Ḍheṇkī; See S. Ratn. V. 236 and S.S.Sāra p. 79, v. 55.

स्याद् द्वितीयतृतीयाभ्यां चतुर्थेनाप्ययं विधिः[1] ।
तालेनेति[2] मतङ्गेन निर्दिष्टा शुद्धपद्धतिः ॥ ३१ ॥

॥ इति शुद्धपद्धतिः ॥

स्वरै[3]र्बद्धेन[4] पादै[5]श्च क्रमेण करण[6]त्रयम् ।
गेयं वर्णस्वरोपेतं गायनैरथ वादकैः[7] ॥ ३२ ॥

वाद्यं यथाक्षरं यत्र सा चित्रा पद्धतिः स्मृता ।
नर्तकी नर्तनं कुर्यात् तत्र वाद्याक्षरैस्समम् ॥ ३३ ॥

॥ इति विचित्रपद्धतिः ॥

रञ्जको रूपसंपन्नः प्रख्यातः[8] ख्यातवंशजः ।
भावुको[9] रसिकस्तालवेदी[10] गमककोविदः ॥ ३४ ॥

ध्वनिशारीरसंपन्नो रागाङ्गादिविचक्षणः ।
पञ्चाङ्गकुशलोऽन्यङ्ग[11]स्सर्वभाषाविशारदः[12] ॥ ३५ ॥

सुरेखो[13] वाद्यवित् प्रौढः[14] प्रस्तावोचितभाषणः ।
[15]गाता गीतप्रबन्धानां लास्य[16]ताण्डवपद्धतेः[17] ॥ ३६ ॥

विद्वानुत्प्लुति[18]पूर्वेषु करणेषु सलाघवः ।
भ्रमरीपादविन्नानालक्षिज्ञः प्रेरणी मतः ॥ ३७ ॥

वराटकमयैर्जातरूपरत्न[19]मयैरपि ।
भूषणैर्भूषितो भास्वद्भस्मोद्धूलितविग्रहः ॥ ३८ ॥

---

1. A.B. विदुः 2. A.B. तालेनति C. तारेणेति 3. C. स्वर्णै 4. A. बन्धेन B. वद्धेन C. बर्द्धेन 5. A.B.C. पादै 6. A. णं C. सरण 7. A.B. पाद[क]: 8. A.B. प्रद्योतो C. प्रख्यात 9. A. एवको B. एवको C. भावको 10. B. दा 11. A.B. प्यङ्ग 12. A.B. दाः 13. A.B. सुखो 14. A.B. प्रौक्त 15. B. गता 16. A.B. लास्यां 17. A.B.C. तिः 18. A.B. त्यूति 19. A. वत

शिखावान्मुण्डितशिरा दधत्पुत्त[1]फणाधरम् ।
एकेन रङ्गयष्टिं[2] वा करेणान्येन चामरम् ॥ ३९ ॥

बिभ्रद् घर्घरिका[3]जाले जङ्घयोर्दृढ[4]संयते[5] ।
एकशो[6] द्वन्द्वशो वापि क्रमात्पूर्वप्रवेशितैः[7] ॥ ४० ॥

चतुर्भिरथवा षड्भिरष्टाभिर्वा[8] सहायकैः[9] ।
अभितः सहितः[10] स्वस्य[11] दधानैस्तुल्यवेषताम् ॥ ४१ ॥

समपादेन वा तिष्ठन् भुजङ्गत्रासितेन वा ।
[12]कृते यवनिकाक्षेपे सति रङ्गभुवं विशेत् ॥ ४२ ॥

[13]प्रेरणाङ्गानि पञ्च[14] स्युर्नृत्तकैवार[15]घर्घराः ।
विकटं गीतमित्येषां क्रमाल्लक्ष्म प्रचक्ष्महे[16] ॥ ४३ ॥

[17]तन्नृत्तं यद्विधा चोक्तं[18] लास्य[19]ताण्डव[20]भेदतः[21] ।
इतिवृत्त[22]प्रविख्यातचक्रवर्तिधराधिपान्[23] ॥ ४४ ॥

---

1. B. फस्त C. प्रस्त 2. B. मार्ष्टिं 3. B. सधीरिका 4. A. ष्ट 5. C. संजति 6. A.C. शोः B. योः 7. C. तः 8. A.B. वः C. वद् 9. A.B. सयोधकैः C. गयोधकैः The emendation Sahāyaka is based on sense and Vema who, here as elsewhere, follows Jāya closely and has at this place सहचारिभिः. 10. C. सभितत् 11. A.B. स्वस्या C. सस्य 12. A. लेयनवनिका B. लयेनवनिका C. ...यवनिका *Cf.* Vema तिष्ठन् यवनिकाक्षेपे कृते रङ्गभुवं विशेत् । 13. A.B. वे. Prerana is found also as Perana. 14. A.B. ञा 15. A.C. कैर्वार B. कैवारि 16. C. क्षते 17. C. य 18. C. योक्तं 19. A.B.C. स्यं 20. C. वं 21. C. Between भे and दतः two needless and indistinct letters. 22. A.B. नृत्त 23. A. प्रभृतिभिः चक्रवर्तिधराधिपान् B. प्रभृतिभिः चक्र ete. C. प्रविति विख्यात-चक्र ete. Prabhṛti is the needless excess that has crept into B. That 'Vikhyāta' is essential is seen from sense as well as Vema and Pārśvadeva (p. 73).

गुणैः शौर्यादिभिः स्तुत्वा तैस्तै[1]रेव सभापतेः[2] ।
स्तुतिर्वितन्यते[3] यस्मिन् कैवारोऽत्र स कीर्तितः ॥ ४५ ॥ (कैवारः)

अतालं[4] तालयुक्तं च घर्घरीवादनं[5] क्रमात् ।
अत्रोक्तो घर्घरस्तस्य प्रकाराः[6] सप्त कीर्तिताः ॥ ४६ ॥

चावडः[7] पडि[8]वाडाख्यो रुन्धः[9] सिरिमिरा[10]भिधः ।
ततः खलुहुला[11]लम्पाटौ सिरिपिटी ततः ॥ ४७ ॥

क्रमाल्लक्षणमेतेषां कथयामोऽधुना वयम् ।
सशब्दं चावडः[12] पाद[13]तलाभ्यां[14] ताडनं भुवः ॥ ४८ ॥ (चावडः[15])

पादाग्रश्लिष्टभूर्भूमिं पार्ष्णिभ्यां पार्ष्णिनाथवा ।
पर्यायात्कुट्टयेद्यस्मिन् पडिवाडः[16] स कीर्तितः ॥ ४९ ॥ (पडिवाडः)

*रुन्धः[17] स्याद्युपगत्सृत्वा[18] पुरः पादतला[19]ग्रयोः ।
दुष्करो यः[20] प्रयोगः[21] स्यात् विरलो हास्य[22]साधकः ॥ ५० ॥ (रुन्धः[23])

---

1. A.B. तस्मै 2. C. An extra letter after सभा 3 A.B. तन्वते 4. A.B. आताल C. अलातं 5. A.B. कं 6. A.B. रः 7. A. ढ 8. C. रि 9. C Corrupt. 10. C. हिरा 11. A.B. खल्वभुला 12. A. चापडः 13. A. दा B. दं 14. A.C. तालाभ्यां 15. A B. चावद्धः 16 C. परिवालः 17. B. रुद्रः C रुण्डः 18. A. दुपगन्नृत्वा B. दुपगन्तृत्वा 19. A.B लता 20. A.B. यं 21. A.B. गे 22. B. ह्मस्य 23. C. रेण्डः

* The Gharghara is given only six angas in S. Ratn. and all the rest except this aṅga, Rundha, are mentioned by Śāṅgadeva. Vema, who follows Jaya, mentions them as seven. The reading of this Aṅga as supported by Vema is Rundha. Kumbhakarṇa (S. Raja) enumerates six without Rundha but defines seven with Rundha.

स्वभावाद् भूस्थयो[1]रंघ्रयोः[2] जङ्घाभ्यां कंपनं मुहुः ।
‡प्रसृत[3]स्यांबरे[4] दिक्षु यद्वा[5] सिरि[6]मिरो[7] मतः ॥ ५१ ॥ ([8]सिरिमिरः)

[9]भूश्लिष्टाग्रतलस्याङ्घ्रेः[10] पार्ष्ण्या[11] घट्टयति क्षितिम् ।
एकस्य तादृशस्यैव पार्ष्णिनान्यस्य[12] रेचनम्[13] ।
[14]बाह्याभ्यन्तरतः स्याच्चेत् तदा खलुहुलो[15] मतः[16] ॥ ५२ ॥ (खलुहुलः[17])

[18]ऊर्ध्वाधःक्षेपकंपाभ्यां व्योम्नि घर्घरवादनम् ।
क्रमाच्चरणयोर्यत्र स मनोऽलग्नपाटकः[19] ॥ ५३ ॥ (अलग्नपाटः[20])

पुरतः पृष्ठतः पार्श्वद्वये च सरणं यदा ।
भूमिलग्न[21]तलस्याङ्घ्रेः भवेत् सिरिपिटी[22] तदा ॥ ५४ ॥ (सिरिपिटी)

पार्श्वगं[23] घट्टितं[24] सूचीमङ्गुली[25]पृष्ठगं विना ।
*षडन्ये[26] पादभेदाः[27] स्युरत्र घर्घरवादने ॥ ५५ ॥ (इति घर्घरः)

---

1. A B. स्थयो 2. B. घो 3. A. प्रमृत 4. A.B. रो 5. B. द्वा 6. A. सिर B. सीर 7. C. हिरो 8 A. स 9. A भृष्टाष्ट B. भ्रष्टाष्ट 10. B. न्घेः 11. A र्णो B. र्णोः C. र्णेः 12. A.B. न्यस्य 13. A.B. रेचितम् 14. A. बाह्यान्तरतरस्याचेत् B. बाह्यान्तरस्याच्चेत् 15. A. हुतो B. हूतो 16. A. रतः B. रत्नः 17. A. हुतः B. हूतः 18. A B. उ 19. A B. पादकः 20. A.B. दः C. टकः 21. A.B. लग्न missing. 22. A.B. र्दी 23. A.B. पार्शं 24. A.B. नं C. घटितं 25. A.B. लीं 26. A.B खलान्ये 27. A.B. भेदपादाः

‡ The alternate definition is 'the shaking in air of only one raised leg.' *Cf.* Vema;

यद्वा समेऽङ्घ्रावेकस्मिन् पुरतः प्रेरितस्य तु ।
परस्य जंघाकंपो यः etc. ॥

* See above p. 64, ch. 2, Pāda-lakṣaṇa, vv. 329 f., ten kinds of Pādas according to others. The 'six other Pādas' meant are Tāḍita, Ghaṭṭitotsedha, Mardita, Agraga Pārṣṇiga and Talāhati.

पिशाचवानरादीनां वेष[1]चेष्टानुकारतः ।
विकृतैराननोष्ठाक्षिकुक्षिदो[2]श्चरणादिभिः ॥ ५६ ॥

वितालं[3] विकृतं नृत्तं हास्यकृत् विकटं[4] विदुः ।
†[5]कैश्चिद् वागड[6]मित्युक्तं भाण्डीकानां[7]‡ प्रसिद्धितः ॥ ५७ ॥ (विकटम्)

[8]शुद्धैश्छायालगै:[9] यद्वा रागैरालप्तिसंयुता:[10] ।
प्रबन्धा यत्र गीयन्ते गीतं[11] तदभिधीयते ॥ ५८ ॥ (गीतम्)

॥ इति पेरणाङ्ग[12]लक्षणम् ॥

*समहस्ताभिधे वाद्ये[13] वादिते[14] समनन्तरम्[15] ।
शुष्कवाद्यं भवेद्यत्या[16] रिगवण्या[17] पदेन च ॥ ५९ ॥

[18]पैसारापरनाम्न्याथ[19] यत्यो[20]पशमनाख्यया ।
प्रविश्य प्रेरणी नृत्येत्[21] नत:[22] कैवारमालपेत् ॥ ६० ॥

1. A.B. C. ष्ट 2. A.B. तो 3. C. नं 4. A हास्यकृत् विकृतं B. हास्य-कुट्टिकृतं 5. C. क 6 B. विकट C. वामल 7. A.B. भामकानां C. भाण्डिकानां 8. B शुद्धैत 9. B. गैः गर् 10. A B. तः C. तम् 11. A. गियं 12. C. पेरण 13. A.B. द्य 14. A.B. नं C. तं 15. A B सनमनन्तरं 16. A B. दन्या 17. A B. रिभवम्या 18. A.B C. वै 19. A.B. म्रा C. Corrupt. 20. A.B. द्यो 21. B. त्तं 22. A.B नत:

† See S.S. Sāra, TSS. p. 73, v. 218 :

यन्मर्कटपिशाचादिहास्यवेषसमाश्रयम् ।
विकटाभिनयोपेतं वागडं तत् प्रचक्षते ॥

‡ Bhāṇḍika or Bhāṇḍira is a local dialect from which many of the music and dance terms are taken.

* *Cf.* S.S. Sāra, p. 73, v. 221. The Peranipaddhati as set forth by Jāya is not found in this manner in other texts. Vema follows here not Jāya but Śṛṅgadeva. It is only in Pārśvadeva that some parallel is found.

चालयेच्चरणं[1] तालरहितं घर्घरै:[2] ततः ।
द्वितीयं तालमारभ्य मार्गदेशीगतै[3]रथ ॥ ६१ ॥

कृत्वान्ते वादनं[4] तालैरेकया[5]न्तरयापि* च ।
योजयेत्सकलातोद्य[6]नादै:[7] प्रहरणै[8]स्सह ॥ ६२ ॥

लम्बप्रहरणे[9] पाटं[10] भ्रमरीकरणान्वितम्[11] ।
[12]विषमं ताण्डवं नृत्येद् वि[13]कटाङ्गमतः परम् ॥ ६३ ॥

स[14]रागमालपेद्[15] येन जनः सर्वोऽनुरज्यते ;
सूडस्या[16]द्यमथो गायेत् प्रबन्धं वादयेच्च[17] तम् ॥ ६४ ॥

मुहुर्ध्रुवपदे गीते[18] तत्तुल्यां[19] वादयेद्यतिम्[20] ।
विधाय प्रेरणी ठायान् समान्[21] द्वित्रिगुणानपि[22] ॥ ६५

---

1. A.B. ह्लावणं 2. A.B. रे: 3 A.B. ते 4. A.B. नां 5. A. झूकद्या। B नाकद्या 6. A सकलाद्ये B कलाद्यो 7. A. सानाद B. नानाद 8. A.B. हरवै C. अहरवैः Praharana is suggested in view of its being palaeographically nearest and also likely being a Vādya—prabandha played here; see below. 9. A.B. भ्रमरणे 10. A.B. पाद C पलं 11 A भ्रमरिकण B भ्र.....मरीकणा 12. B. Gap. The whole pāda missing. 13. C. वै 14. A.B. श C. त 15. A. आलपाट् B. आपलाट् 16. A. सा C. श्रिलस्या 17. A. पादयेच्चि B. पादयेच्च 18. A. तो 19. A. त्तुल्या B तुल्या 20. A दयेद्युतिः B दयेद्यतिः 21. A.B. समा 22. A.B.C. न्यपि

* Antara is found in feminine gender also; see S S. Sāra, p. 73, v. 223. For this pāda and the next two lines, the ms. readings as well as external testimonia are not sufficiently helpful to present a satisfactory restoration

यत्यन्ते[1] योजयेत्तद्वद् घर्घरीवादनान्यपि ।
आभोगं गापयित्वान्ते[2] यत्या प्रहरणेन[3] वा ॥ ६६ ॥

गजरे[4] वाद्यमाने तैः[5] नृत्ये[6]द्विकटमुच्चकैः ।
[7]तकारेण समं कुर्याच्छण्डनं प्रेरणी पुनः ॥ ६७ ॥

सूडस्थित[8]द्वितीयादिप्रबन्धानेवमेव चेत् ।
प्रयुञ्जीत तदा प्रोक्ता बुधैः प्रेरणि[9]पद्धतिः[10] ॥ ६८ ॥

॥ इति पेरणि[11]पद्धतिः[12] ॥

आतोद्य[13]मेलनं पूर्वं समहस्तमतः परम् ।
यति[14]प्रहरणे शून्ये* पुष्पाञ्जलिरतः[15] परम् ॥ ६९ ॥

झेङ्कारो[16] रिगवण्याख्या ततः स्यात्तुण्डुकाभिधम् ।
चमत्कारोऽथ गीताङ्गवाद्यमुच्चलिता यतिः[17] ।
तद्वत्प्रहरणं चैतद्[18] देशीपद्धतिरुच्यते ॥ ७० ॥

---

1. A. यत्रान्न B यत्यान्ते 2. B. ङ्गे 3. C. पप्रहरणेन. Praharaṇa is a Vādyaprabandha ; see S. Ratn. ch. VI. Paharaṇa is the Deśi-form of the name; Śaṅgadeva, and Jāya himself here and further below, use the Sanskrit form while Pārśvadeva uses the Deśi-form. See S.S. Sāra pp. 73, 74. 4. A.B. गर्जरे C गर्जयेद्. Gajara is the correct form; it is a Vādya-prabandha ; see S. Ratn. ch. VI. 5. तैः in plural refers probably to the subsidiary dancers. 6. A.B. नृत्त 7. A B न 8. A. सूडस्त्विति B. सूडास्त्विति C. सूलस्थित 9 A. परणि B. पराणि C. पेरेणि 10. A. बन्धतं B. बन्धनं 11. A.B. पराणि 12. C. The subject-colophon omitted. 13. A.B आमोद्य 14. A.B. तिः 15. A.B. मतः 16. C. रैकारो 17. A.B. पतिः 18. वेह

* Means probably that the Puṣpāñjali is to be made silently at the end of the music.

[1]कवितोट्टवणी खण्डयत्य[2]वच्छेदकादयः[3] ।
विकल्पेन भवेद्यत्र रिघोण्या[4] समनन्तरम्[5] ॥ ७१ ॥

[6]पैसारापरनाम्ना सा[7] नर्तकी रंग[8]मण्डपम् ।
समुदायप्रबन्धेन प्रविशेदपरेण वा ॥ ७२ ॥

केनचिच्चित्रवाद्येन मुखवाद्यं[9] मतं तदा ।
[10]पुटिलं त्वेत[11]देवोक्तं[12] देशीवाद्यविशारदैः ॥ ७३ ॥

पुष्पाञ्जलिरनेनैव क्षेप्य इत्युपचारतः[13] ।
एतदेव मतं लोके पुष्पाञ्जलिरिति स्फुटम् *॥ ७४ ॥

[14]हुडुक्काकरटा[15]देशीपटहाद्या[16]न्तरा भवेत् ।
शब्दे श्राव्यत्वहेतुत्वात्, कांस्यतालं निवारयेत्§ ॥ ७५ ॥

रिघोण्यामेकतालाडु[17]तालनिस्सारुकाः[18] त्रयः ।
तालाः स्युः प्रायशो नेतुरिच्छयान्येऽपि[19] केचन ॥ ७६ ।

॥ इति[20] देशीपद्धतिः ॥

1. A.B. कविणोर्ध्वं तदेवोक्ता श्री C. कविनोठथणी 2. A.B. द्य 3. A.B. कायः 4. A.B. रिखोण्या C. विघोन्या 5. A. समानं नरम् B. स्थमनन्तरम् 6. A.B. वै. Paisāra is the form given by Śārṅgadeva and Pārśvadeva. 7. B न्द C. ननं 8. B. रंभ 9. A.B. द्य C. प्रमिणं 10. Puṭila is mentioned earlier also ; see above p. 206, v. 25. 11. A.B. चेत 12. B.C. क्ता 13. A.B. इत्यपि चारतः C. इत्यपरा ततः 14. A. भुडुका B वहुका 15. A.B करारा C. करडा 16. A.C पदहाजा B. पटहाज्जा . 17. A. लस्य B. ल्यस्स 18. A.B. No visarga. 19. A. न्नेपि B न्त्येपि C. नोपि 20. A.B. इति dropped.

* For this nomenclature of Puṣpāñjali for the Vādya-prabandha used in that act, see S.S. Sāra, pp. 52, 55.

§ *Cf.* S.S. Sāra, p. 55 vv. 165-166 :

शब्दः पुष्पाञ्जलौ युक्तो हुडुक्का करटान्तरी ।
इतरे चान्तरीशब्दा नैव ताः सम्मता मम ॥

[1]अतालालापसंयुक्तो झेङ्कार:[2] प्रथम:[3] तत: ।
[4]पदरूपकयोर्मध्ये स्यादोता[5] नियतास्पदा[6] ॥ ७७ ॥

अनन्तरं तु कविता[7] ततोऽवच्छेदसंज्ञक:[8] ।
मलपोऽथ प्रहरणं[9] प्रबन्धा: प्रेक्षणे[10] मता: ॥ ७८ ॥

एषां पाटा[11]क्षैरस्तुल्यमुत्प्लुतै:[12] करणै: कृतम् ।
भ्रमरीभिस्तथा चारी[13]मण्डलैरुद्धतैरपि ।
नर्तनं प्रेक्षणं प्रोक्तं चमत्कारैककारणम् ॥ ७९ ॥

॥ इति प्रेखण[14]पद्धति: ॥

शुद्धश्च सालग[15]श्चेति सूडस्स्यान्[16] नर्तने[17] द्विधा ।
प्रागेला[18] करणं वर्णसर: कैवारझोबडौ ॥ ८० ॥

त्रिभंगि:[19] वर्त्तनी[20] प्रान्ते* रासकोऽथैक[21]तालिका ।
इत्येते शुद्धसूडे[22]ऽस्मिन्[23] प्रबन्धा: कीर्तिता नव[24] ॥ ८१ ॥

---

1. C. अलातालम 2. B झंकार: C. रिंकार: 3. A.B. न: 4. A.B. पाद Pada is a Vādya-prabandha. 5. A.B. ओक्ता C. ओत्ता 6. A B. यदा स्वदा: C नीयतास्पदम् 7. A.B. कपिता C. कथिता The neuter form कवितं is given by Śārngadeva and Vema, but Pārsvadeva has the feminine form. 8. A B. कं 9. A B. ण 10. B.C. प्रक्षणे 11. B. टा 12 C. ल्य 13. A. श्वया चारी B. श्वया चरा 14. A चेरुखण्ण B. पेरुखण which is the Desi form of the name. C. विपण 15. A.B. ग dropped. 16. B. The two words dropped. 17. A.B. के 18. A. प्रगेलाड् B.C. प्रगेला 19. A त्रिभंगी B त्रिभागी C त्रिभंगे 20. A.B. नो 21. A. रासकोधैक B. रासक्रोधैक C. श(or रा)शकोथंक 22. B. सूधे 23. A.B. स्मि 24. A.B. न वा C. नव:

* Where 'Prānte' fits and what it means are obscure.

[1]एषां स्वराक्षरैस्तुल्यं सदृशं[2] धातुकाकुभिः[3] ।
विनिर्मितस्य वाद्यस्य समानं नृत्त[4]माचरेत् ॥ ८२ ॥

[5]सङ्गीतस्य यदा पात्रं तदा सङ्गीत[6]मुच्यते ।§
ध्रुवो[7] मट्ठः प्रति[8]मट्ठो निस्सारुः[9] साटतालकः ।
रासकश्चैकताली च सूडे[10]स्युस्सप्त सालगे[11] ॥ ८३ ॥ (इति सूडी[12])

[13]बन्धं पिण्डयादि[14]माश्रित्य यस्मिन् षोडश[15] नायिकाः ।
नृत्यन्ति द्वादशाष्टौ वा **रास**कं तत्प्रकीर्त्तितम् ॥ ८४ ॥

पिण्डीशृङ्खलिकाभेद्यलताभेदात्[16] चतुर्विधः[17] ।
अभ्यधायि बुधैर्बन्धः तत्र पिण्डा[18] तु पिण्डनात् ॥ ८५ ॥

गुम्फनात्[19] शृङ्खला भेद्यो भेदनाज्जालवल्लता[20] ।
प्रत्येकं बहुभेदाः स्युः प्रौढै[21]स्ते[22] नर्तकैः[23] कृताः ॥ ८६ ॥

षोडशैव परं[24] तत्र यत्तामि[25]र्बन्धपूर्णता ।
[26]चेलभर्यो[27]रुकं यद्वा कार्पास[28]कञ्चुकं तथा ॥ ८७ ॥

धम्मिल्लं[29] वेणिकां[30]वापि तत्तद्देशानुसारतः ।
दधानाः[31] सुभगं वेषं कणन्मञ्जीरकङ्कणम् ॥ ८८ ॥

---

1. A.B एता 2. A.B. शां 3. A.B. धातुराह 4. C. नित्य 5. A. सङ्गितस्य 6. A. सङ्गि 7. A B.C. व 8. B. प्रीति 9. A. निस्साड B निर्शंप्य 10. A.B. धे 11. A.B. के C. गौ 12. A. सूढौ B. सृधौ C. सूली 13. A.B. इत्थं 14. A.B पिण्डादि 15. B. शि 16. A.B. हेता C. भेदा 17. C. धाः 18. A.B.C. ण्डं 19. A.B. गुप्तना 20. A.B. जालपल्लता C. जलवल्लता 21. A.B. ढे 22. C. तैं 23. A.B. काः 24. C. वरं 25. A.B. यत्ताभि 26 A.B. -ल 27. ध्यो 28. C. कृत्पोसं 29. A. मिथिल्लं B. मिथिलं 30. A. पेणिकां. B. पेणिका C. वनिशं 31. A.B. नः

§ The connection and significance of this line are obscure.

[1]यौवनञ्च मनोहारि[2] पीवरोरुकटीस्तनम् ।
वाद्येन द्वन्द्वशस्तुल्यचारीप्रभृतय:* क्रमात् ।
[3]रङ्गं यवनिका[4]गर्भाद्विशेयु:[5] पार्श्वयोरिमा: ॥ ८९ ॥

§आदिराजश्रियं[6] प्रेक्ष्य स्वानुरूपं चिराद्वरम्[7] ।
स्वयं वरीतुं[8] माहात्म्यात् प्राप्ता इव सभापतिम् ॥ ९० ॥

गोपिकानां सहस्रेभ्यो मानिता[9] मुख्यनायिका: ।
आगता इव भूपेन[10] क्रीडितुं रासकोत्सवे[11] ॥ ९१ ॥

यातायात[12]क्रमश्लिष्टा: स्त्रीरूपा: शशिन:[13] कला: ।
अस्त[14]दोषोदया: प्राप्ता[15] राजानमिव सेवितुम्† ॥ ९२ ॥

ध्रुवा इव तटिल्लेखाश्चलत्कल्पलता इव ।
कामिनीवेषधारिण्य:[16] साक्षान्नृत्तकला[17] इव ॥ ९३ ॥

---

1. B. यौन 2. B. भार 3. A.B. अ 4. A.B. वयनिका 5. A. विश्वेयु: 6. A.B.C. य: 7. A. चिताद्वयम् B. चिताद्वयम् 8. A. वरितु B. वरीतु C. वरीमु 9. C. ना 10. C. नृत्येन 11. A. द्भवेत् B. द्भवे 12. A.B. यानायात C. जाताजाता 13. A.B. सन: 14. A. हस्तदोषोदयं B. हस्ततोषादयं C. अष्टदोषादय: 15. B. प्राप्तो C. प्रोक्ता 16. A.B. रस्य 17. A.B. कचान्द्र: काला इव.

* This is to be taken as a Bahuvrihi qualifying 'Imāḥ' (dancers).

§ Qualifies 'Sabhāpatim' ; a Bahuvrihi; means, 'seeing in the Sabhāpati one endowed with the splendour of the ancient epic kings.'

† The fancy here seems to be that the sixteen Kaḷās of the moon which are of the form of damsels, with their defect of decrease and increase at an end, appear to have come together to attend upon their lord the Moon (Rājā which means also the King who patronises the dancers). There is Śleṣa in 'Asta-doṣodayāḥ' meaning 'having given up their habit of rising in the night.'

शिक्षिता इव पार्वत्या प्रतिच्छाया इव श्रियः ।
ऋतुप्रयोज्यरागेण गीयमानेषु गायकैः[1] ॥ ९४ ॥

चर्चर्यादि[2]प्रबन्धेषु देशीसूड[3]स्थितेषु च ।
वाद्येषु च प्रयुक्तेषु सदक्षेषु विचक्षणैः ॥ ९५ ॥

खण्डमण्डलचारीभिः लास्याङ्गप्रमुखैरपि[4] ।
कुर्वत्यः प्रस्तुतैरङ्गैर्गीतार्थाभिनयं समम् ॥ ९६ ॥

प्रवेशैर्निर्गमैस्सन्धिहीनैरप्यपसारणैः ।
छोटिकाभिः[5] मिथोहस्त[6]तालिकाभिर्लयानुगम् ।
बन्धुरैर्विविधैर्बन्धैः[7] नृत्येयुरिह नायिकाः ॥ ९७ ॥

॥ इति रासकम् ॥

[8]चर्चरीमेतदेवाहुः वर्णताला[9]श्रितेन चेत् ।
वाद्येन प्रविशेयुस्ता[10] गायन्त्यश्चर्चरीं कलम्[11] ॥ ९८ ॥

द्विपदीं वाथ शृङ्गारवीराभ्यामृतुवर्णनैः ।
नायकस्य गुणख्याति[12]प्रख्यापनपदोत्तरैः ।
मण्डलेन प्रनृत्यन्ति कान्ता वासन्तिकोत्सवे[13] ॥ ९९ ॥

॥ इति चर्चरी ॥[14]

---

1. C. नैः 2. A. चर्चयादि B. चर्चयर्दि 3. A. सूद्ध B. सुड C. शूल 4. B. स्तुते. 5. A.B. तच्छोटिकं ; may be सच्छोटिकं 6. A.B. ग्रस्त 7. C. The word 'Bandhaih' dropped. 8. A.B. चच्चटी 9. A.B. पर्णकाल 10. A.B. युक्त 11. A.B. चचरीसमंकलम् C. चर्चरीकलाम् 12. A. गुणाख्यानि B. गुणाखानि 13. B. द्रुवे 14. A. चच्चरी B. चच्चरी

चरितं भूपतेर्यत्र पदार्थै[1]रभिनीयते ।
नायिकाभिर्वसन्ततौ[2] देशीहिन्दोल[3]गीतिभि:[4] ।
यौवनासवमत्ताभिस्तदुक्तं नाट्यरासकम् ॥ १०० ॥

॥ इति नाट्यरासकम् ॥

पात्राण्यष्टौ समारभ्य वर्धन्ते दण्डरासके ।
क्रमाच्चत्वारि[5] चत्वारि नायकच्छानुसारत:[6] ॥ १०१ ॥

चतुष्षष्टिर्भवेद्यावद् यावत्सा द्विगुणा परै:* ।
अरत्निसम्मितौ[7] दैर्घ्यादङ्गुष्ठपरिणाहिनौ ॥ १०२ ॥

दण्डौ कनकवद्धान्तौ[8] मदनादिद्रुमोद्भवौ ।
सुवृत्तौ मसृणौ नानावर्णकैश्चारुचित्रितौ ॥ १०३ ॥

[9]दधीरन्पाणिपद्माभ्या[10]मथवा दण्डचामरे[11] ।
[12]क्षुरिकादण्डकौ[13] यद्वा तत्तद्देशीयभङ्गिभि: ॥ १०४ ॥

उक्तेषु वाद्यमानेषु चित्रबन्धेषु वादकै:[14] ।
लास्याङ्गभ्रमरीपादचारीभिश्चारुचङ्क्रमम् ॥ १०५ ॥

सव्यापसव्यतश्चक्रभ्रान्त्या खण्ड[15]प्रयोगजै: ।
सशब्दं पञ्चभिर्घातै: कुर्वीरन्दण्डमेलनम् ॥ १०६ ॥

1. A.B. पादार्भै 2. A.B. न्तौ 3. A.B. देशीभिर्दोल 4. B. शीतिभि 5. A.B. चक्रमा 6. A. ताधिकेवानुसारत: B. नायिकेवानुसारत: 7. A. ता 8. B. बन्धान्तौ C. संबंधोतौ 9. A. दधिरन् 10. A.B. वर्त्मा 11. A.B. माचरेत् 12. A. क्षि 13. A.B. को 14. C. रागकै: 15. C. Second letter of Khaṇḍa difficult to read.

* This has referencc to the two rows they form to pair off.

नर्तकीनर्तने[1] प्रोक्ताः प्रबन्धास्सकला अपि ।*
कौतुकाद्भूमिपालानां वाद्यन्तेऽत्र यथाक्रमम् ।
नर्तनं च तथा कुर्यात् प्रौढनर्तकशिक्षितम् ॥ १०७ ॥

॥ इति दण्डरासकम्[2] ॥

मृदङ्गकरटाकांस्य[3]तालकाहलवादकैः[4] ।
वाद्यमानेषु वाद्येषु यति[5]प्रहरणादिषु ।
कांस्येन घटितान्यद्वा लोहेन फणिनः[6] करैः[7] ॥ १०८ ॥

वामै[8]र्वामेतरैः कोणान्[9] बिभ्राणास्तन्मयानपि[10] ।
स्फुरत्किरिकिटीकारं[11] वादयन्तो लयानुगम् ॥ १०९ ॥

रुद्राक्षाभरणाः श्लक्ष्णाः कल्पभूति[12]त्रिपुण्ड्रकाः ।
शिवैकतत्परा भक्ता नराः[13] नारीजनोऽथवा ॥ ११० ॥

श्रेणीभूताः प्रमोदेन गायन्तश्चन्द्रशेखरम् ।
अङ्गैर्यथोचितैः पादैः[14] लास्याङ्गैर्गतिसंयुतैः ॥ १११ ॥

अन्योन्याभिमुखीभूय द्विधाभूताः कदाचन ।
कदाचिन्मण्डलीभूता नृत्येयुर्बहुभङ्गिभिः ।
शिवोत्सवेषु[15] कर्तव्यं नृत्तमेतच्छिवप्रियम§ ॥ ११२ ॥

॥ इति शिवप्रियम् ॥

1. A.B. की C. नं 2. B. दण्डकः 3. A. ङ्कान्य B. ङ्कस्य 4. A.B. पादकैः
5. A.B. प्रति 6. A. परिरागिणः B. फाणिनः C. फलिनः 7. C. करौ
8. A.B. मैं dropped. 9. A.B. C. कोणात् 10. B. दपि 11. A.B. किरकिरीटीन्कारं C. किरिटिकारं वा 12. A.B. त C. कल्वप्त्रितितुण्डका
13. B. भक्ता रो C. भक्तनर 14. A.B. पादैः 15. C. शवाशवेषु

* The meaning is, 'All the compositions that are used in the dance of a single dansuese may, according to the Kings's fancy, be sung and danced to in this Daṇḍa-rāsaka also.'

§ Kumbha has this and his text is close to Jaya's.

तालच्छन्दानुगैः पाटैः[1] यति[2]प्रहरणादिभिः ।
करताललयो[3]पेतैः वाद्य[4]वक्त्र[5]भवैस्सह ।
पादैर्ललितलास्याङ्गैः चारीभिर्गतिभिस्तथा ॥ ११३ ॥

श्रव्यैः द्रविड[6]देशीयैः कल्पै[7]स्तत्काकुरीतिभिः ।
गीतार्थो[8]भिनयोपेतैः द्विपदै[9]श्चिन्तु[10]संज्ञकैः ॥ ११४ ॥

प्रयोगैश्चापि तैः कित्तु§[11]प्रचुरैस्सुलयैर्मुहुः ।
नृत्येयुः[12] प्रमदा यत्र सुवेषा नवयौवनाः ॥ ११५ ॥

सुकलासं[13] वितन्वन्त्यः[14] पत्युः[15] मध्ये मनोहरम्[16] ।
चिन्तुनृत्तमिति प्रोक्तमिदं द्रविडवल्लभम्[17] ॥ ११६ ॥

॥ इति चिन्तुनृत्तम् ॥

पद्मगोमूत्रिकानागचक्रप्रभृतिषु स्फुटम् ।
वाद्यमानेषु बन्धेषु[18] नानापाटेषु वादकैः ॥ ११७ ॥

*देशीय[19]नर्तन[20]प्रोक्तप्रबन्धेष्वथवा क्रमात् ।
नर्तकीवेषधारिण्यः[21] सुमध्या दीर्घ[22]लोचनाः ॥ ११८ ॥

---

1. A.B. दैः 2. A.B. दि 3. A.B. युतो 4. A.B. द्यैः 5. C. रव
6. A. शूल्यै - द्रविध B. शूलैस्त्रिविध 7. A. लुप्तै B. कृप्तै C. युक्तै
8. A.B. र्थो dropped. 9. B. द्विपादै C. द्विपद 10. C. श्चित्त
11. A.B. कर्तु C. श्चित्तस्तूरुः 12. A.B.C. नृत्तेयुः 13. A.B. पं C. शं 14. A.B. वितंचन्त्यः C. वित् 15. A.B. word dropped.
16. C. रमोहर 17. A.B. मैः 18. A.B. वाद्येषु 19. A. देशी C. देशीज ; 'ja' fairly regular for 'ya' in C. 20. C. नं
21. A.B. धार्येषु 22. A. समतिपिक B. समातपिक

§ Kittu or Kintu is a Deśi-lāsyāṅga ; see above p. 192. That Kittu is correct here can be seem from Vema also who says in his description of Cintu:

—किन्तुलास्यांगशालिभिः । प्रयोगैश्च— ॥

* The compositions common in Deśi-dances may also be played here.

पीवरोरुकटीभाराः[1] पीनोन्नतपयोधराः ।
स्पर्धमाना मिथः कान्तिरूपयौवनविभ्रमैः ॥ ११९ ॥

हेम्ना रूप्येण कांस्येन रचितान्[2] दारुणाथवा ।
अन्त[3]श्चलद्योगोल[4]निकाण[5]मुखरीकृतान्[6] ॥ १२० ॥

[7]दत्त्वान्यासां निजान् (तद्वत ?)[8] गृह्णत्यः परतः परान् ।
मिथोविनिमयेनैतान् स्वीकुर्वत्यः कदाचन ॥ १२१ ॥

कुचवक्त्रकृतासक्तान् शकुन्तानिव[9]* कन्दुकान् ।
करैरुड्डापयन्त्यस्तान् कौतुकोत्कूलकूजिताः[10] ॥ १२२ ॥

उल्लत्कन्दुक[11]प्राप्तिधाव[12]ल्लोलाक्षिलीलया ।
[13]रचयन्त्य इवाकाशं सरो[14] मीनाब्ज[15]संकुलम् ॥ १२३

चारीभिर्गतिभिः पादैर्लास्याङ्गैरपि कोमलैः ।
नृत्यन्ति[16] वनिता[17] यत्र तत्स्यात्कन्दुकनर्तनम् ॥ १२४ ॥

॥ इति कन्दुकनृत्तम्[18] ॥

[19]वक्त्रोद्भवेषु वाद्येषु वाद्यानुकरणेषु च ।
वर्तमानेषु तालेन[20] हस्ततालयुतेन च ॥ १२५ ॥

---

1. A. वा 2. A.B. तां C. तां 3. B. letter dropped. 4. C. गोन 5. दित्वाण B. दिक्काण C. मिक्कान 6. A.B. ता C. ताः 7. A.B. This and the three succeeding lines missing. 8. Gap in ms. 9. सकुन्तानिव 10. A.B.C. तान् 11. C. कुन्तल 12. A.B. लाव 13. A.B. चरन्त्यनुवा 14. C. शरो 15. A. मीनज C. शीनाज्ञ 16. A. न्तो C. न्ते 17. C. अवहिता 18. B. नर्तनम् 19. A.B. यत्रो 20. C. ताडेषु

* By reason of swift movement, the balls appear to be so many birds flitting across hither and tither.

खञ्जवामन[1]पोगण्ड[2]‡ वानराद्यनुकारिणः ।
शिखिसारसहेमाक्ष[3](?) शुकादि[4]रुतकारिणः[5] ॥ १२६ ॥

खरोष्ट्रसारमेयादिवाशितानुविधायिनः ।
तैस्तैर्वचोभिरश्लीलैश्चेष्टितैश्च तथाविधैः ॥ १२७ ॥

उत्सारणाय जाड्यस्य[6] हास[7]यन्तो निरन्तरम् ।
अत्यन्तं वामनीभूताः पाटै[8]रत्यन्तदुष्करैः ।
यत्र नृत्यन्ति भण्डाः* तत् भाण्डिकं नर्तनं मतम् ॥ १२८ ॥

॥ इति भाण्डिकनृत्तम् ॥

[9]हुडुक्कां स्कन्धसंसक्तां[10] वादयन्ती[11] सखीमिव ।
गायनैर्गायनीभिश्च वांशिकैश्च समन्विता[12] ॥ १२९ ॥

चण्डाली[13] नर्तकीवेषा[14] ध्वनिशारीरपेशला[15] ।
[16]चर्या§प्रभृतिभिर्गीतै[17] र्देशीसूड[18]स्थितैरपि ॥ १३० ॥

गायन्ती[19] धन्विनं[20] क्रीडा[21]किरातं पार्वतीप्रियम् ।
काहलैः[22]मद्दलैः[23] कांस्यतालैः करटयाद्यितैः[24] ॥ १३१ ॥

---

1. A. नं 2. A.B. वेगण्ड 3. B. म्राक्ष 4. A.B. सूकादि 5. A. रु व रिणः B. ..... वैरिणः C. रितकारिणः 6. A. जाव्यस्व B. जाड्यस्य 7. A.B. भाव 8. A.B. वाटै 9. A.B. हुकफां C. हुलुक्का 10. C. मसक्तां 11. A.B. पादयन्ती 12. A.B. समाविना: C. समन्विताः 13. C. चण्डाला 14. A.B. रेष 15. C. ला: 16. A. शैर्या B. शय्या 17. A.B. इतीतै 18. A. सूध B. सूय 19. A. गायतेन् B. गायतं C. गायन्तं 20. A.B. धनिनं 21. A. किवा B. किंवा , 22. A.B. कोहलैः C. कालैः 23. A. मर्दलैः B. मर्दलैः C. मर्दयलैः 24. A. करटधान्विनैः B. करटयाद्वितैः

Poganḍa = Boy.

* Bhanḍa = Buffoon.

§ Caryā is a musical composition with a philosophical import; see S. Ratn. IV. 292.

वाद्येषु वाद्यमानेषु यति[1]*प्रहरणादिषु ।
गतिभिस्सुकुमाराभिः तालच्छन्द[2]मनोहरम् ॥ १३२ ॥

यत्र नृत्येदिदं ख्यातं नृत्तं घटिसणी[3]विधिः(?) ।
एवंविधगुणेनैतत् प्रयोज्यं पुरुषेण वा[4] ॥ १३३ ॥

॥ इति घटिसिश्री[?][5]नृत्तम् ॥ §

नानानुप्रासमधुरान्[6] दोहकान्[7] रसनिर्भरान् ।
रसोचितेन[8] रागेण गायन्तो देशकाकुभिः ।
[9]वाद्यानुकरणैर्वक्त्र[10]भवै:[11]....[12] कृतोत्तरैः ॥ १३४ ॥

उद्धतैः[13] पादविन्यासैः भ्रमरैरपि भूषितैः[14] ।
हस्ताभ्यां बहुभङ्गीभिः तालैश्छन्द[15]मनोहरैः ॥ १३५ ॥

---

1. A.B. दि 2. A. तालर्धद B. तालं मन्द 3. A. कटिसणी 4. A. परुषेषणा B. पुरुषेक्षणे 5. A. घटिविश्रि 6. A.B. रा 7. A. देकान्द् B. दोद् 8. A. चितौ 9. A.B. पा 10. A. क्त्रे 11. A.B. वैं 12. A. बिभू B. निप्रा Restoration difficult. 13. A.B. जैः 14. This qualifies Pādavinyāsaih and means steps adorned with Bhramaras or wheeling movements. 15. B. छाद It may be Chanda which is a mode of playing an instrument (see S. Ratn. VI. 90-1) or Cheda which is a Vādyaprabandha (see S. Ratn. VI. 997-8).

* Here, at letter य, the ms. C. from Asiatic Society of Bengal, Calcutta, ends. (fol. 30)

§ The correct name of this Deśi-dance cannot be made out ; there is a variety of the Huḍukkā-instrument called *Ghaṭasa* which comes nearest palaeographically to the corrupt forms is which the name of this dance is given here ; but the text mentions only the Huḍukkā and not the Ghaṭasa. Such a dance is not described in any other text known to me. in print or in ms.

[1]यत्र सौराष्ट्रदेशीया:[2] चारणा[3] ललितोद्धतम्[4] ।
[5]स्त्रियश्चेदन्तरीयाणां* पल्लवैरवगुण्ठिता:[6] ।
नृत्यन्ति मण्डलावृत्या[7] तत्स्याच्चारण[8]नर्तनम्[9] ॥ १३६ ॥

॥ इति चारणनृत्तम्† ॥

बहुरूपस्य लोकस्य[10] तत्तद्रूपप्रदर्शनात् ।
[11]वेषचेष्टित[12]भाषाभि: बहुरूपं§ निरूप्यते ॥ १३७ ॥

---

1. A.B. या 2. A.B. था 3. A.B. चारिणा 4. A. ध्धितम् B. ञ्चितम् 5. B. तिर 6. A. कुण्डिता B. तण्डिता 7. B. त्य 8. A. भरण B. चरण 9. A.B. वर्तनम् 10. A. तोकण्ट B. तोकण्व 11. B. द्वेष 12. A.B. वेष्टित

* Antariya means garment.

† From the song used here, the Dohaka, this is referred to under the name Dohaka-nrtta by Kumbhakarṇa and described in almost identical words :

यत्र सौराष्ट्रदेशीया नार्यो नृत्यन्ति सुन्दरम् ।
तत्तद्देशीयभूषाढ्या(: ?) सिचयान्तावगुण्ठिता: ॥

मृद्वङ्गहारसुभगा देशकाकुभिरञ्चितान् ।
सागन(रागेने)ष्टेन गायन्त्यो दोहकान् रसनिर्भरान् ॥

चारीभिर्भ्रमरीभिश्च चरणैरुद्धतक्रियै: ।
ललितै: पदविन्यासैर्हस्तकैर्बहुभङ्गिभि: ।
यत्र तद् दोहकाख्यं स्याद् नर्तनं नर्तकप्रियम् ॥ इत्थं दोहकनृत्यम् ॥

§ There in an one-line description of this Bahurūpa dance in Veda's Saṅgitamakaranda (Tanjore Ms.). In the Sangita Nārāyaṇa, the Bahurūpa is mentioned under two different definitions, as given in the Sangita Dāmodara and the other in the Sangita Kaumudi and the Sangita Sāra.

[1]सर्व.....नावहम् । प्रकल्पक:[2](?) ।
रञ्जको मञ्जुवाग्[3] वाग्मी कल्य:[4] कैवारकोविद:[5] ॥ १३८ ॥

[6]सुरेखो रसिको[7] रूपभाजनं भावको युवा ।
[8].....नात्युच्चो नातिवामन:[9] ॥ १३९ ॥

[10]संस्कृतादिषु भाषासु[11] नानादेशोद्भवासु च ।
दक्षस्सदस्यता[12]भिज्ञो बलवान्[13] विजितश्रम: ॥ १४० ॥

आशुवेषान्तरग्राही[14] प्रस्तावोचितपाठक: ।
स्वतुल्यानुचरैर्युक्तो मुण्डितश्मश्रु[15]मूर्धज: ॥ १४१ ॥

मधुरध्वनिशारीरो बहुरूपी निगद्यते[16] ।
गुणैरेभिर्युता स्त्री[17] वा मता मुण्डन[18]वर्जितै: ॥ १४२ ॥

त्रिविधाभिनयेनाढ्यं[19] लोकधर्ममुपेयुषा ।
सात्त्विकेन परित्यक्तं हाव[20]भावैरलंकृतम् ॥ १४३ ॥

[21]द्विचतुश्चरणावादसञ्जिवाभिनयाञ्चितम् (?) ।
प्रथमं प्रविशेत् पात्रं[22] सकलातोद्यसंयुतम् ॥ १४४ ॥

वाद्य[23]प्रवर्तितै: (पाटै ?) [24]नृत्तैरपि मनोहरम् ।
[25]नृपवंशेन वा लोक[26]प्रसिद्धचरितेन वा ॥ १४५ ॥

---

1. A. सर्वचीवरवाचेदिं.. ....नावगम् । B. सर्वचीवरकलाचोर्दा. Restoration impossible. 2. This word stands alone. A. प्रकल्पकं 3. A.B. न् 4. A. कल्य: B. कलय: 5. A. दा B. दाम् 6. A. शरैख: B. शरेख: 7. A.B. रासिक: 8. A. वायवेनापि त लो B. वायवेनापि तं वो 9. A.B. नम् 10. B. संस्तुतादिषु 11. A. तालासु B. ताषासु 12. A. सद्भय:सता B. सदप्सता 13. B. बडवान् B. बाषवान् 14. A.B. हि 15. A. मुण्डितन्मद्ध 16. A.B. म्यते 17. B. स्त्रिरि 18. A. मण्डौन B. मण्डन 19. A. व्य B. द्व्य: 20. A. रस 21. This and the next two lines missing in B. 22. प्रथम प्रविश प्रथम 23. वाज 24. Unindicated gap of two letters. 25. A.B. रूप 26. A. का

यन्नाट्ये (दृश्यते ?)[1] साक्षात् तत्कुर्यादत्र कृत्रिमम् ।
[2]अत्यन्तग्राम्यभाषाढ्य[3]मनिष्टं यत[4] सभासदाम्[5] ।
[6].....यच्च बहुरूपं न तन्मतम्[7] ॥ १४६ ॥

॥ इति बहुरूपनृत्तम् ॥

काहलैः[8] मार्गपटहैः कांस्यतालसमन्वितैः ।
महद्भिर्जयघण्टाभिः भेरीभि[9]स्तंबटै[10]रपि ॥ १४७ ॥

वाद्यमानेषु वाद्येषु वादकैः भाव्यमद्भुतम् (?) ।
†वरत्रागमनैश्चित्रैः करणैरञ्चितादिभिः ॥ १४८ ॥

प्रांशोरुपरिवंशस्य भ्रमरैरतिदुष्करैः ।
प्राण[11]सन्देहकरणैः शस्त्रधाराग्रवञ्चनैः ।
मनुष्यदुर्वहै[12]र्भारैः मृद्वङ्ग[13]परिवर्तनैः[14] ॥ १४९ ॥

उच्चैः खग[15]वदुड्डीनैः[16] शस्त्राणां चालनादिभिः ।
यत्र नृत्यन्ति कोल्लाटास्तत्स्यात्कोल्लाटनर्तनम् ॥ १५० ॥

॥ इति कोल्लाटनर्तनम् ॥

---

1. A. B. Word wanting. 2. B. अत्यतत् 3. A.B. द्य 4. B. अरिष्ट तत् 5. B. सहम् 6. A.B. वत्स भावदामि a corrupt repetition of the end of the previous line. The further words of the pāda are too corrupt : A. स्वार्यसंशद् B. स्वाप्यसंशर् 7. A. अनन्तरम् B. अनन्तमत् 8. A. जाहलैः B. काभलैः 9. A. चेरीभि 10. A. तंपटै B. तंबटे 11. B. णा 12. A. दुर्वष्मदुर्भरै 13. A. मुद्वन्मृङ्ग B. मृद्वन्मृङ्ग 14. B. पर्नवैः 15. B. मघ 16. दुस्थिनैः B. दड्डीनैः

† Varatrā is a rope; the Kollāṭika is a Rope and Pole dancer.

रूपयौवनलावण्य[1]नृत्तविद्याश्रयत्वतः ।
नेत्रानन्दसुधापानभाजन[2]त्वाच्च नर्तकी ॥ १५१ ॥

उपचारप्रयोगज्ञैः पात्रमित्यभिधीयते ।
तन्वी तारुण्यलावण्यभाग्यसौभाग्यसौध[3]भूः ॥ १५२ ॥

कुलीना रूपवत्याढ्या ग्रहणे धारणे[4] क्षमा ।
प्रगल्भा रसभावज्ञा सोत्साहा सकुतूहला ॥ १५३ ॥

कलाभिज्ञा विधेयाङ्गी सुसत्त्वा मधुरस्वरा ।
स्मितपूर्वकृतालापा सुमनाश्शुद्धलक्षणा ॥ १५४ ॥

सुतारा[5]नामया श्यामा[6] गौरी वा लाघवान्विता ।
[7]जितश्रमा समाधीरा चतुरा त्रिविधे ग्रहे[8]* ॥ १५५ ॥

अवधानवती ख्याता गीतवाद्यविशारदा ।
नातिस्थूला नातिकृशा नात्युच्चा नातिवामनी ॥ १५६ ॥

विनयौदार्यलज्जादिगुणरत्नैरलङ्कृता ।
अङ्गप्रत्यङ्गकोपाङ्गचारीस्थानकमण्डलान् ॥ १५७ ॥

[9]पाटाङ्गहारलास्याङ्गभ्रमरीकरणान्यपि[10] ।
मार्गदेशीविधानेन प्रयोगान्[11] जानती[12] स्फुटम् ॥ १५८ ॥

[13]सद्योऽभीष्टप्रयोगज्ञा नर्तकी प्रवरा मता ।
रूपयौवनयुक्तानां सहस्रेऽपि मृगीदृशाम् ॥ १५९ ॥

---

1. A. यं 2. B. न missing 3. B. सोय 4. A.B. णे 5. A. सुतामा B. सुताम. Sutārā=Sudṛṣṭiḥ. 6. B. ख्यामा 7. B. जन 8. B. गृहे. 9. B. पाटं भार 10. B. न्नृष 11. A. प्रयोक्तां B. प्रयोगज्ञां 12. B. जनति 13. B. विद्या

* The three Grahas are Sama, Atita and Anāgata.

कलागुण[1]समेतानां नर्तकी नैव लभ्यते[2] ।
नर्तकी गायनी स्याच्चेत् भोगिनी[3] पात्रमन्यथा‡ ॥ १६० ॥

कल्याणकटके पूर्वे[4] भूतमातृ[5]महोत्सवे ।
सोमेशः कौतुकात्[6] कांचित्[7] भिल्लीवेषमुपेयुषीम् ॥ १६१ ॥

नृत्यन्तीमथ गायन्तीं स्वयं प्रेक्ष्य[8] मनोहरम् ।
प्रीतो निर्मितवान्[9] चित्रगोण्डली[10]विधि[11]मित्ययम्[12] ॥ १६२ ॥

[13]यतो भिल्ली महाराष्ट्रे[14] गोण्डली[15]त्यभिधीयते ।
*कुण्डलीं[16] नाम मृद्वङ्गीं[17] सुकेशीं दिव्ययोषितम्[18] ॥ १६३ ॥

सङ्गीतं[19] कोमलं[20] नृत्तं शिक्षयामास पार्वती ।
तन्नृत्तं कुण्डलीमाहुः[21] तत्संबन्धात्पुरातनाः ॥ १६४ ॥

॥ इति नर्तकीलक्षणम् ॥

कुलीनो नृत्यशास्त्रज्ञः तत्त्ववेदी जितेन्द्रियः[22] ।
ऊहापोहविशेषज्ञो दक्षो लक्ष्यप्रदर्शने[23] ॥ १६५ ॥

---

1. A.B. णा 2. B. लक्ष्यते 3. A. B. भोसिनी 4. A. कटक्कपूर्व B. कटकप्रर्व 5.A. त्रं B. त्र 6. A.B. कीं 7. A. B. कांश्चित् 8. A. B. ष्य 9. B. निमित्तवान् 10. A.B. गोण्डिनी 11. A.B. विध 12. B. यः 13. A.B. स्यत: 14. B. ङ्गे 15. A.B. गौण्डिनीम् 16. A.B. ली 17. A.B. ङ्गी 18. A.B. सुकश्रीन्दीप्रयोषितम् 19. A. सङ्गते B. संगीत 20. A. ले B. ला 21. B. ञुः 22. B. याः 23. A. र्शिते

‡ If the Pātra should combine all the three qualities, of a dancer, a musician and a beauty, she is then something unique.

* This is an alternate explanation of the origin of Kuṇḍali (Sanskritised form of Goṇḍali) which some texts give.

कविवाद्यप्रबन्धेषु स्वयं[1] वादन[2]कोविदः ।
[3]ज्ञाता वाद्यश्रुतीः[4] सर्वा मुखवाद्यविशारदः ॥ १६६ ॥

चतुरः[5] शिष्यशिक्षायां[6] नर्तने निपुणः[7] स्वयम् ।
सङ्गीतमेलनाभिज्ञो नानादेशीयनृत्यवित् ॥ १६७ ॥

कलावित्[8] निरहङ्कारः पारंपर्योपदेशवान् ।
तालेषु कुशलो वाग्मी वेदिता गीतवाद्ययोः ।
प्रतिकल्पयितुं भङ्गीः तास्ताः[9] प्रतिनवाः[10] क्षमः[11] ॥ १६८ ॥

कराभ्यां वाद[12]पाटादिकर्म दर्शयितुं पटुः ।
[13]अव्यङ्गोऽन्तर्मुखः कल्यो रूपवानस्तमत्सरः[14] ॥ १६९ ॥

[15]नर्तकीमनसा सार्ध[16]मेकीभावमिहागतः ।
[17]सुरेखो रञ्जको मञ्जुवचनो नर्तको मतः ॥ १७० ॥

गुणैरेवंविधैर्युक्ता[18] किञ्चिद्गलितयौवना ।
अन्तःपुर . .[19]स्त्रीणां शिक्षायां नर्तकी* परम् ॥ १७१ ॥

॥ इति नर्तकलक्षणम् ॥

---

1. A.B. थ 2. A.B. वोदन 3. A. ज्ञताद्य B. शतावाद्य 4. A.B. ति 5. B. रा: 6. A. क्षाया B. क्षया 7. A. निघुण 8. A.B. पि. 9. B. तस्ता: 10. B. रथा: 11. B. मा: 12. A.B. May be Vādya but Vāda may as well be correct. 13. A.B. अप्य 14. A.B. र 15. B. द Extra. 16. A. मनुसानार्ध B. मनुसासार्ध 17. A.B. स्व 18. B. क्तौ 19. Gap not indicated; the two missing syllables may be 'gata'.

* Nartaki here is a retired elderly dancer who has taken to teaching the art.

[1].....तालमात्राणां गणितज्ञता ।
§मार्जनात्रयवेदित्वं (स्थि)[2]रता लघुहस्तता ॥ १७२ ॥

वाद्यप्रबन्धकर्तृत्वं पात्रचित्ता[3]नुवर्तिता[4] ।
वृन्दमेलनदक्षत्वं रञ्जकत्वं सुरेखता ॥ १७३ ॥

न्यूनातिरिक्तयोस्साम्य[5]कृतिः[6] वाद्यश्रुतिज्ञता ।
सङ्गीतयोजनज्ञत्वं ग्रहे[7] मोक्षे च पाटवम् ॥ १७४ ॥

*चित्रादिकचतुर्मार्गविवेचनविदग्धता ।
बलित्वं[8] सावधानत्वं तालानुगगति[9]ज्ञता ॥ १७५ ॥

सर्वाङ्गदोषराहित्यं छिद्रावरणनैपुणम् ।
धृतिर्मुक्तिश्च शब्दस्य सौष्ठवं हृद्यवादिता[10] ॥ १७६ ॥

प्रस्तावोचितकैवारचतुरत्वं सभापतेः ।
गात्रस्वरानुगामित्वं[11] वाज[12]वाद्ये सुकर्णता ॥ १७७ ॥

---

1. A. द्रुतं गीततयोजनत् B. द्रुतं गीततयोत् There is clearly something here referring to his capacity to manage well all the three layas, tempos, Druta, Madhya and Vilambita, but the letters as they are found are difficult of restoration. 2. A. has र and then by haplography, it jumps over to the र in रञ्जकत्वं in the third line below, thus dropping a foot, a half and then another foot. B. रता which wants one syllable for metre; the word may be स्थिरता 3. A.B. त्रा 4. A.B. ना 5. A. म्या 6. A. स्ति B. ती 7. B. ग्राह 8. B. बलत्वं 9. A. तालानुगगतित B. तालानुर्गतित 10 A.B. मादिता 11. B. गातित्वं 12. A. वज्य B. वज्र. *Cf.* Vema, end of ch. V, 'वाजानुगत्वम्' among the Hastaguṇas of Vādakas; Vāja, though obscure, seems to be the correct reading and not 'Vañchā' in the same place in Śārṅgadeva (VI, 1218). Does 'Vājavādya' mean the neighbouring instrument in the orchestra ? [Vāja = Pakṣa (?)]

§ The three Mārjanās are Māyūrī, Ardhamāyūrī and Kārmāravī.

* These four Mārgas refer to Tāla and are Dhruva, Citra, Vārttika and Dakṣiṇa.

[1]-स्थिरोत्साहिता[2] चर्म[3]लम्महस्तत्वमित्यमी ।
गुणा मुखरिणः प्रोक्ता वादकस्य[4] विचक्षणैः ॥ १७८ ॥

॥ इति मुखरिलक्षणम् ॥

गुणैः कैश्चिद्विहीनोऽपि भवेत्प्रतिमुखर्यपि[5] ।
किन्तु यत्यादिवाद्यानां§ कृतानां[6] मुखवादिना ।
[7]उचितान्यनुयायीति(?) तद्वद्वादयितुं[8] क्षमः ॥ १७९ ॥

॥ इति प्रतिमुखरी ॥

कृतानां वाद्यकविभिः वाद्यानां§माशु शिक्षणम् ।
श्रुतिज्ञानपरत्वं च[9] स्ववाद्यग्रहमोक्षयोः* ॥ १८० ॥

तालानुगत्वमैकाग्र्यमुभयो[10] र्मेलनज्ञता ।
वामदक्षिण[11]दक्षत्वमन्योन्यस्तुतिकारिता ।
मुखानुवृत्तिता[12] चेति वाद्य[13]बृन्दगुणा मताः ॥ १८१ ॥

॥ इति वाद्य[14]बृन्दलक्षणम् ॥

---

1. A.B. One syllable wanting ; it may be म् .2. A.B चिरोद्धायितां 3. B. वर्म 4. B. ह्य 5. A. प्रतिमुखस्यपि B. पतिमुखवर्यपि 6. A. कृत्वानां B. कृत्वाम् 7. The sense of the pāda is clear, that he should be good in accompanying (anuyāna), but the text as it is, is not quite correct or happy. 8. A.B. तद्वदा-दयितुं 9. A.B. परत्वस्य 10. A.B. पुटयो 11. A.B. शिक्षण. What is meant is adeptness of playing with either hand, or on either side of instruments like drum. 12. A.B. ना 13,14. A. ट B. त

§ 'Vādyānām' in both these places means 'Vādya-prabandhānām'.

* 'स्ववाद्यग्रहमोक्षयोः' goes with 'तालानुगत्वम्' in next line.

वृन्दमेलन[1]चातुर्यं रासिक्य[2]मनुरञ्जनम् ।
त्रिषु स्थानेषु गमकप्राणगीति[3]प्रवीणता ॥ १८२ ॥

गम्भीरमधुरस्निग्धश्रावकध्वनिशालिता[4] ।
तादृक्शारीरसंपत्तिः विविधालप्ति[5] नैपुणम् ॥ १८३ ॥

[6]सर्वगीतप्रबन्धानां गातृत्वं तालधारिता ।
विजितश्रमतायत्तकण्ठता[7] सावधानता ॥ १८४ ॥

नर्तकीसुकलासेन[8] समता[9] स्थाय[10]कारिता ।
शुद्धसालगरागेषु भाषाङ्गादौ च कौशलम् ॥ १८५ ॥

ग्रहमोक्षे च दक्षत्वं धीरता[11]ऽपास्त[12]दोषता[13] ।
सर्वरीतिषु वैदग्ध्यापश्चिमत्वं[14] सुरेखता ॥ १८६ ॥

इत्येते कथिता मुख्या गायकस्य गुणा बुधैः ।[15]
ईदृग्[16]गुणा[17] मुखरिणी वाद्य[18]बृन्दे प्रशस्यते ॥ १८७ ॥

[19]प्रकृत्यैवाङ्गनागानं[20] कोमलं मधुरं यतः ।
कृतार्थैः[21] उपदेष्टव्यं कन्याभ्यो[22] गायकैस्ततः ॥ १८८ ॥

॥ इति मुख्यगायकलक्षणम् ॥

B. लेन 2. A. राशित्व B. राहित्व 3. A.B. प्राणेति, 4. A.B. ना
5. B. स्ति 6. A. सर्वं गीतं 7. A.B. लयकर्णना 8. B. ना
9. A.B. समित 10. A.B. प 11. A.B. तः 12. A. प्राप्ति
B. पास्ति 13. B. तः 14. A. रक्षिमत्वं B. पक्षिमत्वं 15. A.B.
After this is found the subject colophon इति मुख्यगायकलक्षणम्
which is repeated again three lines below. 16. B. ईम्रग
17. A.B. णो 18. A. पातृ B. वात्त 19. A. प्रवृ 20. A.B. ना
21. A. कुचारेर्यैप B. कुचार्यैरुप 22. A. कन्याभ्या B. कर्णाभ्यः

[1]समानस्वरता स्थानत्रये[2] गमकचातुरी ।
अन्यूनाधिकता स्थानतन्मनस्त्वमभीरुता[3] ॥ १८९ ॥

नर्तनावसरे नादं धृत्वा गातुं[4] विदग्धता ।
[5]स्थायान्ते मुखदायित्वं[6] नियमस्य प्रतिग्रहः ॥ १९० ॥

प्रबन्धगायिता[7] चेति गायिनां[8] बृन्दलक्षणम् ।
बृन्दं नारीमयं सर्वमपि कार्यं[9] विलासिना ॥ १९१ ॥

द्रष्टुं कौतुकिना नृत्तं शुद्धान्तस्त्रीजनैः[10] सह[11] ।
राज्ञां विद्यावतां चाग्रे वैभवख्यापनाय[12] च ॥ १९२ ॥

॥ इति बृन्दलक्षणम् ॥

पात्रानुजीविनां बृन्दं समुदाय[13] उदीरितम् ।
पारंपर्योपदेशित्वात् संप्रदायश्च कथ्यते ॥ १९३ ॥

चतुर्भिरधिकाशीतिरुत्तमोत्तम उच्यते ।
विद्यावन्तश्चतुष्षष्टिरुत्तमः परिकीर्तितः ॥ १९४ ॥

द्वात्रिंशन्मध्यमो[14] ज्ञेयो विंशतिश्चतुरुत्तमा ।
[15]अवरः षोडश ख्यातः कनिष्ठश्चेति पञ्चधा ॥ १९५ ॥

1. A.B. स्वमना 2. B. यो 3. A. तन्मनस्त्वं हिरुदा B. तन्मनस्त्वमहीरुहा 4. B. गन्तुं 5. A.B. स्थार्या 6. A. मुख्यदायिन्यो B. न्मुखतायिन्यो This refers to the quality of the orchestra giving prominence to the leader at the end of parts of the singing. 7. A.B. का 8. A.B. नं 9. B. अविकार्य 10. B. त्रिजटैः 11. B. स्तृह 12. A.B. वैभवाख्यं पताय 13. A.B. एम् 14. A. या B. म 15. A.B. अपरः

उत्तमोत्तमसंज्ञाया[1] विद्यावन्तो[2]ऽधिका यदा ।
[3]तदा कोलाहलोऽयं तु नेष्टो[4] रङ्गे न माति यत् ।
स पुनर्विनियोज्यः स्यादुत्सवादिषु भूभुजाम् ॥ १९६ ॥

मुखरी मद्दली श्रेष्ठः स्वविद्यालक्ष्मलक्ष्यवित् ।
तस्य चित्त[5]क्रियाछन्दानुगः प्रतिमुखर्यपि ॥ १९७ ॥

तयोर्मार्दंगिकाः[6] प्रौढा द्वा[7]त्रिंशदनुवादकाः[8] ।
हौडुक्किकाः[9] तु चत्वारो देशीपाटहिका[10]वुभौ ॥ १९८ ॥

करटावादकौ[11] च[12] द्वौ[13] ततः[14] तालधरावुभौ ।
कांस्यतालधराश्चाष्टौ वांशिकौ द्वौ तयोः पुनः ॥ १९९ ॥

ओतुकाराश्च[15] चत्वारः शाङ्खिकौ काहलाधराः ।
चत्वारो मुख्यगायिन्यः चतस्रः षोडशापराः[16] ॥ २०० ॥

[17]भवेयुरनुगायिन्यो बृन्दे[18]ऽस्मिन्नुत्तमोत्तमे[19] ।
यत्रैको मुखरी तस्य समः प्रतिमुखर्यपि ॥ २०१ ॥

ततो मद्दलिनो धीराः षोडशान्ये[20]ऽनुवादकाः ।
हौडुक्किकाः[21] तु चत्वारो देशीपाटहिक[22]द्वयम् ॥ २०२ ॥

कराटावादकौ तालधरौ षट्[23] कांस्य[24]धारिणः ।
वांशिकावोतुकाराश्च चत्वारः शाङ्खिकद्वयम् ॥ २०३ ॥

---

1. B. य 2. B. विधावन्तो 3. B. न 4. A. नैष्टो B. नैष्टौ 5. A.B. वित्त 6. A. मार्दंकिया B. मादिक्रिया 7. A.B. चा 8. B. नुचतकः 9. A. हौढिक्किकाः B. हौडुकर्किकाः 10. A. पाटभिका B. पाटर्भका 11. A.B. पादकौ 12. B. य 13. B. word missing. 14. A.B. तत्तः 15. A.B. च dropped by haplography. 16. A.B. षोडशाः पराः 17. A.B. ग 18. B. दो 19. A.B. मैः 20. A. द्वे 21. A. हौमुक्किकाः B. हौडिकर्काः 22. A.B. पादहित 23. B. र्षं 24. A.

चत्वारः काहलावादा[1] गायिन्यो[2]र्मुख्ययोर्द्वयम् ।
षोडशैवानुगायिन्यो बृन्दं तन्मतमुत्तमम् ॥ २०४ ॥

मध्यमे हि[3] मुखर्येको बृन्दे प्रतिमुखर्यपि[4] ।
अष्टौ मार्दङ्गिकाः पश्चात्ततो[5] हौडुक्किका[6]वुभौ ॥ २०५ ॥

करटावादक[7]स्तालो[8] चत्वारः कांस्यतालिनः ।
[9]वांशिकश्चौतु[10]धृच्छङ्खवादकः काहलाधरौ ॥ २०६ ॥

मुख्यगायिनिके[11] चाष्टौ भवेयुरनुगायिकाः ।
केवलो मुखरी यत्र सप्त मार्दङ्गिकाः परे[12] ॥ २०७ ॥

[13]हुडुक्काकरटावादी[14] तालधारी च केवलः ।
कांस्यतालधरा धीराः[15] चत्वारो वांशिकाः स्मृताः ॥ २०८ ॥

ओतुकारस्तथैको[16] द्वौ सुबद्धौ काहला[17]धरौ ।
एकैव गायिनी[18] मुख्या[19] गायिन्यस्त्वपराः[20] पुनः ॥ २०९ ॥

चतस्रो यत्र बृन्दं[21] तदवरं[22] परिकीर्तितम् ।
कनिष्ठे मद्दली बृन्दे परे मार्दङ्गिकास्त्रयः ॥ २१० ॥

हुडुक्काकरटावादी[23] कांस्यतालधरावुभौ ।
[24]वांशिकश्चौतु[25]कारश्च[26] काहली[27] मुख्यगायिनी[28] ।
तालज्ञाः सहगायिन्यः चतस्रः कथिता बुधैः ॥ २११ ॥

[इति संप्रदायलक्षणम्]

1. A. दंर् 2. B. भ्यो 3. A.B. वि 4. B. वि 5. A.B. त्ततयो
6. A. हौसिक्किका B. भौढिर्किका 7. A.B. का 8. A. लि 9. A. वा
10. A.B. स्सोम 11. A. गायिनिकाः B. गायनकाः 12. B. वरे
13. A.B. हुडुकर्कटा 14. A. याटी B. वाटी 15. B. ङ्गिराः 16. A.B. कौ
17. B. कागला 18. B. यिनं 19. B. ख्य 20. A.B. रा 21. B. न्दे
22. A.B. अपरं 23. A.B. टी 24. A.B. वा 25. A.B. सानु
26. A.B. राश्च 27. A. काहलि B. काहाकि 28. A.B. नि

*शतमष्टोत्तरं षष्टिः चतुर्भिरधिका ततः ।
द्वात्रिंशदिति हस्तानां[1] पृथक् तेषु भवेन्मितिः[2] ।
क्रमात् गीर्वाणभूपाल[3]प्रभृतीनां§ भवन्त्यमी[4] ॥ २१२ ॥

[5]ज्येष्ठे रङ्गस्य दूरत्वान्[6] मन्द्र[7]तातोद्यगीतयोः ।
प्रेक्षणीयस्य च व्यक्तिः न हि सम्यक् विभाव्यते ॥ २१३ ॥

दूरस्थास्तु जनाः[8] श्राव्या इति तारतरो ध्वनिः ।
क्लेशसंपादितो[9] नूनं वैस्वर्य[10]मवलंबते ॥ २१४ ॥

ध्वनिः[11] मुञ्चति माधुर्यं मण्डपेऽतिकनीयसि[12] ।
[13]त्यक्त्वा ज्येष्ठकनिष्ठे द्वे[14] ततो मध्यः प्रशस्यते ॥ २१५ ॥

यत्र नृत्यध्वनी[15] प्रेक्ष्यश्रव्ये ते[16] भवतः[17] सुखम् ।
चतुष्षष्टिकरायामो द्वात्रिंशत्करविस्तृतिः[18]॥ २१६ ॥

विकृष्टो मण्डपो राज्ञा चतुरश्रोऽथवावरः[19] ।
समन्ताच्चतुरश्रस्य द्वात्रिंशत्कीर्तिताः कराः ॥ २१७ ॥

[20]आयामस्तु विकृष्टस्य पूर्वपश्चिमतो[21] मतः ।
पूर्वतस्तत्र संत्यज्य[22] करानष्टौ प्रकल्पयेत् ॥ २१८ ॥

---

1. B. ले 2. A.B. मतिः 3. B. रूवाल 4. A. पि 5. A. ज्ये-ज्यष्टंगस्य 6. A.B. त्वा 7. B. द्रु 8. A B. ना 9. A. मितो B. तितो 10. A. मवैस्वर्य B. ऐश्वर्य 11. A.B. निं 12. A.B. सी 13. A. त्यक्ता B. त्यत्ता 14. B. करणत्वे 15. A.B. नि 16. A.B. श्रोतदौ 17. A. मयत: Or the line may be restored also as यत्र नृत्यध्वनिप्रेक्ष्यश्रव्यतोभयतस्सुखम् taking the stand on the 'A' reading (उ)भयत: । 18. B. विस्मृति 19. A.B. रम् 20. B. आ wanting. 21. B. वच्चिन्महिता 22. B. संलत्यज्य

* The subject colophon ending Sampradāya-lakṣaṇa is missing. The next topic is the dance-hall, but as it starts abruptly, there seems to be a gap in which a line introducing the three kinds of dance-hall is lost.

§ 'प्रस्मृति' refers to the common public.

चतुरश्रं करै रङ्गशीर्षं[1]§ सम्मितमष्टमिः[2] ।
*रासकादौ[3] ततोऽप्यर्धं‡ द्विगुणं वा यथोचितम् ॥ २१९ ॥

ततोऽप्यष्टौ करान्मुक्त्वा[4] स्थानं कुर्यात्सभापतेः[5] ।
शुद्धादर्शतलाकार[6]रङ्गशीर्षोपशोभितः ॥ २२० ॥

स्तम्भै[7]रुत्कीर्णसिंहाद्यैः[8] विलसत्साल[9]भञ्जिकैः ।
प्रत्युप्ता[10]नेकरत्नांशु[11]चयध्वस्ततमोभरैः[12] ॥ २२१ ॥

विचित्रचित्र[13]भङ्गीकैः प्रेक्षणीयैरलङ्कृतः[14] ।
हेमाचलगुहाकारस्वर्ण[15]कुंभैः[16] विराजितः ॥ २२२ ॥

**यन्त्र[17]नारीजनालापसङ्गीतादिविचेष्टितैः ।
संपादित[18]चमत्कारः कर्पूरी(?)शोभितान्यभूः[19] ॥ २२३ ॥

1. A. दिष B. दिष्टः 2. A.B. सन्मितनष्टभिः 3. A.B. रास्करादौ 4. A. Whole word dropped. B. मु– 5. B. स्वभावतः 6. A. शुद्धदर्शकलाकारङ्ग B. शुद्धदर्शक एलाकाङ्ग 7. A. स्मरै B. स्मरैभ 8. A. यै B द्यौ 9. A.B. विलसाल्लाल 10. A.B. क्ता 11. A.B. रक्तावश 12. A. द्रुस्तनमोहरैः B. द्रुस्तामोहरैः 13. A.B. यत्र 14. A.B. तैः 15. A.B. वर्ण 16. B. भौ 17. A.B. यत्र 18. B. तित 19. A. शीभितान्यहः B. शीभितान्यभः. Or it may be कर्पूरोद्दीपितान्तरः For reference to Karpūra-lamps in the hall, see below.

§ According to Jāya, there is no Raṅga-piṭha besides Raṅga-śirṣa.

* In dances like Rāsaka in which the number of dancers is large, the dimensions of the Raṅgaśirṣa may be a half more or even double, i.e., 12 or 16 hastas.

‡ 'ततोऽप्यर्धम्' has to be taken as 'that plus half, 'i.e.' 8 + 4 = 12 hastas.

**This refers to mechanical female figures, robots, that talk, sing, dance and do other acts and provide much amusement. See my brochure '*Mechanical Contrivances in Ancient India*,' Indian Institute of Culture, Bangalore.

नीरन्ध्रच्छादनोपेतप्रेक्षणीय[1]द्वितीयभू:[2] ।
नानाद्वीपान्तरानीतै: देवांशादिभि§रम्बरै: ।
विचित्रेण वितानेन नयनानन्ददायक:[3] ॥ २२४ ॥

नानापत्रलताबन्धै: इतिहासा[4]दिभिश्शुभै: ।
विक्रमै: केलिभि(:) . . त्याग(?)[5]मुख्यैस्समापते: ।
†[6]विचित्रस्थै: समानाभि:[7] भित्तिभि:[8] सुमनोहर:[9] ॥ २२५ ॥

गीतातोद्यध्वने: स्थैर्यसुस्वरत्वा[10]दिहेतवे ।
गवाक्षैर्नाति[11]विवृतैर्भूषितो[12] नातिसंवृतै: ॥ २२६ ॥

[13] . . . सुषमैर्द्वारै र्वेदिका[14]मत्त[15]वारणै: ।
सङ्गीतावसरैस्सान्द्र:[16] पुष्पतारकितक्षिति: ॥ २२७ ॥

[17]विसारिविविधामोदपुष्पमाल्योपशोभित:[18] ।
समन्ताद् धूपितो[19]ऽजस्रधूपै: कृष्णागरूत्करै: ॥ २२८ ॥

निवास इव[20] भारत्या क्रीडागार[21]मिव श्रिय: ।
कर्तव्यो नाट्यनृत्तार्थ: मण्डपो लक्षणान्वित:[22] ॥ २२९ ॥

॥ इति नृत्तमण्डपलक्षणम ॥

---

1. A. यं 2. B. यभू:, the word द्वितीय being dropped. 3. A.B. नायक: 4. A.B. अतिभासा 5. A. केलिभिन्याग B. केलिभिजाङ्ग 6. B. word missing. 7. B. समानादिभि: 8. B. भित्तीन: 9. A. हरै: B. भरै: 10. A.B. स्वस्वरता 11. A.B. र्जाति 12. B. दूषितो 13. A. भ्रातृभि: B. रात्रिभि: 14. B. वेको 15. A. मार्त B. मात्र 16. A.B. ति 17. A.B. One more वि here and वि in विविध, next word, dropped. 18. A. भन: 19. A.B. धूवितो 20. A.B. भुव 21. A.B. कार 22. A. ञ्चित:

§ It my refer to some kind of textile known in those days; or it may be 'देवांकादिभि:' '(cloth) with figures of gods.'

† Words not clear; the sense however is that the walls have paintings of the themes set forth in the two preceding

अभिनातो गुणग्राही[1] पात्रा[2]पात्रविशेषवित्[3] ।
क्रीडाकेलीगृहं दान्तः[4] प्रियकीर्तिः प्रियंविदः ॥ २३० ॥

शृङ्गारी रसिकः [5]सर्वशास्त्राकूपार[6]पारगः ।
मार्गदेशीरहस्यानि[7] ज्ञाता[8] सङ्गीततत्त्ववित् ॥ २३१ ॥

अभिज्ञः[9] सर्वभाषासु भावकः प्रतिभानवान्[10] ।
[11]... .....वित् सत्यवसतिर्गत[12]मत्सरः ॥ २३२ ॥

वादेषु धृतमाध्यस्थ्यः[13] कृतकार्यो निरामयः ।
[14]आस्तिको विगतालस्यः परिवारानुकूल्यवान्[15] ॥ २३३ ॥

विवेकी कौतुकी[16] वाग्मी तरुणो गुणदोषवित् ।
सुलक्षणो जितारातिः[17] निपुणो[18] - - [19] नर्मणि ॥ २३४ ।

स्वस्तुतौ[20] पर[21]निन्दायाम्[22] अपि[23] नित्यं पराङ्मुखः ।[24]
त्यागी दयापरः श्रीमान् सभापतिरिहोच्यते ॥ २३५ ॥

॥ (इति) सभापतिः ॥

प्रस्तावोचितभाषित्वं[25] त्रुटितात्रुटितज्ञता[26] ।
माध्यस्थ्यं[27] मान्यता काषि. नाटकादिषु पाटवम् ॥ २३६ ॥

---

1. A.B. हि 2. A.B. त 3. B. विशेविशत् 4. A.B. वान्तः 5. A.B. सर्वः 6. A. शास्त्रकृपारगः B. शास्त्रात्रुपार 7. A.B. न्ति 8. A.B. ज्ञातारः 9. A.B. ज्ञा 10. A.B. भावनात् 11. A. तुङ्गनाकोधि B. Line missing. 12. जनि 13. A.B. स्थं 14. A.B. अ 15. A.B. —लवान् 16. A.B. कं 17. A.B. जितात्रि 18. B. रिपुणो 19. A.B. Two syllables missing. 20. A B. स्वस्तितौ 21. A.B. वर 22. B. य Then words dropped up to पर: in next line. 23. A. अवि 24. A. खी 25. A.B. वित्व 26. A. दूतट्टतालटंवशता B. रुजुतात्रट्टवशता 27. A. B.स्थ

न्यायादिशास्त्रवेदित्वं वाग्मिता शीलशालिता ।
धर्मधैरेयता मुक्तरागद्वेषादिमानिता[1] ॥ २३७ ॥

गुणवत्सलता[2]शेषदेशभाषासु कौशलम् ।
रसभावेङ्गितज्ञत्वं[3] धैर्यं मध्यवयस्कता ॥ २३८ ॥

तौर्य[4]त्रितयचातुर्य[5] सुमूर्तित्वं[6] कुलीनता ।
प्रागल्भ्यं[7] प्रतिभा चेति गुणाः प्रोक्ताः सभासदाम् ॥ २३९ ॥

॥ इति सभ्यगुणाः ॥

॥ इति [8]श्रीमन्महाराजाधिराज - गणपतिदेव - गजसाधनिक-
जायसेनापति-[9]विरचितायां नृत्तरत्नावल्यां
सप्तमोऽध्यायः ॥

---

1. B. ना 2. A. गुणवित्मुलता B. गुणवित्लता 3. A. भावेङ्गितत्त्वज्ञं 4. A. त्रस्य B. त्रय 5. A. चात्वर्ध्यं B. चात्वर्प्य 6. A. सुलतित्यं 7. A.B. ल्यं 8. B. श्रीमहा 9. B. गणपतिविरचितायां

[अथाष्टमोऽध्यायः]

सायाह्ने[1] कौतुकी नेता[2] नृत्य[3]सन्दर्शनोत्सुकः ।
नैपथ्यसदने रम्ये विविक्ते चित्रशालिनि ॥ १ ॥

कर्पूरागरुकस्तूरीकाश्मीरहिम[4]वारिभिः ।
मिलितेन पराघ्र्येण चन्दनेनानुलेपितः ॥ २ ॥

मल्लिकाकेतकीजातीचंपकैः कृतशेखरः ।
चीनांबरे शरच्चन्द्रचन्द्रिकाकान्ति[5]हारिणी[6] ॥ ३ ॥

वसानः[7] सूचिविज्ञान[8]भङ्ग्यालंकृतपल्लवे ।
पादाङ्गुलीयपर्यन्तैः मकुटाद्यैर्विभूषितैः ॥ ४ ॥

स्वस्वकान्तांशरूपोर्वीपति[9]नीराजानेच्छया ।
[10]दिग्वधूरनुकुर्वाणैस्सान्द्रानन्दं समागताः ॥ ५ ॥

मङ्गलैरिव सोत्कण्ठैः[11] कामिनीरूपधारिभिः ।
शंभोरिव वरान्[12] प्राप्तैः अणिमाद्यधिदैवतैः ॥ ६ ॥

दृष्टिवेध[13]हरैर्दिव्यैः अवियुक्तानि मङ्गलैः ।
ज्वलत्कर्पूरदीपानि हैमपात्राणि लीलया ॥ ७ ॥

वहद्भिः पाणिपद्माभ्यां भ्रान्तिप्रान्तैः(?)[14] मणिश्रियः
[15]गायद्भिः पञ्चमं गानं[16] कोकिलालाप[17]पेशलम् ॥ ८

1. A. न्ते 2. A.B. तेता 3. A.B. नृत्यः 4. B. भीम 5. A.B. One का dropped. 6. A.B. वारिणी 7. A.B. न 8. A.B. सूरिभिज्ञान 9. A. कान्तांशुरूर्मीचोपतिः B. शुऊर्मिशोवि 10. A. दिश्वघू B. दिग्वसू 11. A. सेर्णात्कण्ठैः B. सौत्कर्णैः 12. A. परान् B. परात् 13. B. द्य 14. May be कान्तिक्रान्तैः 15. B. भा 16. A.B. पञ्चमाज्ञानां 17. A.B. one ला dropped.

शुद्धां गीतिमिव प्रेक्ष्यां कुर्वद्भिर्दन्त[1]कान्तिभिः[2] ।
[3]नैराजनशिरःप्रायरजलास्वां गतिं यति (?) ॥ ९ ॥

यतिप्रहरणैर्वाद्यैः नानातोद्यसमन्वितैः ।
संयुक्तं कोमलं नृत्यं कुर्वाणैस्तरुणीजनैः ॥ १० ॥

विहितारात्रिकः श्रीमान् प्रहर्षोत्फुल्ललोचनः ।
ततः सभागतो नर्मसचिवैः नृत्तमण्डपे[4] ॥ ११ ॥

रत्नसानु[5]तटो[6]त्सङ्गकल्प[7]शाखीव भूपतिः ।
सहासनमधिष्ठाय निषीदद्भि[8]श्चितप्रतः[9](?) ॥ १२ ॥

*स्वर्णकल्पतरुं कृत्वा पृष्ठतः पुरतः पुनः ।
रत्नैरलंकृतं हैमं वारणं[10] मकराङ्कितम्[11] ॥ १३ ॥

तले[12] मुक्ता[13]वितानस्य वेष्टितस्य मणिस्रजा ।
भवेत् सिंहा[14]सनासीनः[15]सार्वभौमस्सभापतिः ॥ १४ ॥

तस्य वामे महादेवी[16] भवेदित्यपरे विदुः ।
[17]सेयं तु नेष्टा नीतिज्ञैर्दर्शनीया हि[18] कस्यचित् ॥ १५ ॥

[19]पतितां पक्ष्मलाक्षीणां कटाक्षशरसन्ततिम्[20] ।
चामरोल्लासनैश्शश्वत् वारयन्त्य इवान्तरा ॥ १६ ॥

---

1. A.B. ईन्त 2. A.B. कान्तभिः 3. A.B. Whole line corrupt; B. प्राध for प्राय; मुल for जला; यतिः for यति. The line probably refers to the act of waving lights (Nirājana) and the movements of dance consistent with that act. 4. A.B. प: 5. A. तु 6. A.B. तो 7. A.B. त्य 8. A.B. निषितेद्वि 9. B. निषितेद् 10. A.B. कारणं 11. A.B. ङ्कितम् 12. B. ल 13. A.B. क्त 14. B. सङ्ग 15. B. नं 16. A.B. वीं 17. A. से य ष्टातु न B. सेयतुन 18. A. भि 19. A. वतिति B. वतीति 20. A.B. ती

* These are auspicious symbols of royalty.

कलकङ्कणनिक्काणा लीलाजागरितस्मिताः[1] ।

[2]पत्युः चामरधारिण्यस्तिष्ठेयुः पृष्ठभागतः ॥ १७ ॥

विस्रंभालापनिपुणा नर्मज्ञा राजवल्लभाः ।

ललितै[3]रङ्गकैर्युक्ता भूषाणा[4]मपि भूषणैः ।

काम्याः[5] कामकलाभिज्ञाः[6] कामुकेन्धन[7]यौवनाः ॥ १८ ॥

तौर्य[8]त्रितयवेदिन्यः सुवेषाश्शुभलक्षणाः ।

वामतः पृष्ठतश्च स्युर्विलासिन्यः[9] सभापतेः ॥ १९ ॥

[10]*.....।

..... ॥ २० ॥

[11]शुचिक्षेत्रा(?) - विश्वास[12]भाजनं रूपशालिनी ।

सुवेषमधुरालापा[13] कलावित्[14] प्रौढयौवना[15] ॥ २१ ॥

1. A.B. स्मृताः 2. A. पर्य B. पथ्य 3. A. मपितै B. लंबितै 4. A.B. भूषणा 5. A. काम्याक: B. काम्यकं 6. A. कलभिज्ञः B. कलभीज्ञ 7. A. B. कामिकामिन्ध 8. A. त्रर्य B. त्रुथ्य 9. B. विद्वासिन्यः 10. A. corrupt. कर्णपूरौमिधार्येण नर्तकी गायनीति पारिधयान्तं च। ज्ञनेने नेत्रौ वक्तमिव गेतं-शुचिः। B. र्तकी for नर्तकी; पर्ययान्तं च; ज्जने नेत्रौ 11. A.B. Foot wants one syllable; may be शुचिक्षेत्रा च विश्वास etc. 12. B. विश्वस 13. A.B. प 14. A.B. वि 15. A.B. नाः

* These two lines whose restoration is impossible refer to the Tāmbūladāyinī who is close to the King; her eyes have collyrium (añjana) and the author works a conceit on her proximity to the King and the eye with collyrium. Certain Añjanas are for making one's sight very piercing and this lady appears to have taken her stand near the King to be able to scan each and to tell in his ear who is who and of what qualification among the dancers and singers.

[1]सावधानेङ्गिताभिज्ञा नृपवंशक्रमागता[2] ।
मञ्जूषां दधती[3] हैमीं नानारत्नविभूषिताम् ॥ २२ ॥

भूपालोचिततांबूलसामग्रीपरिपूरिताम् ।
आसीत[4] दक्षिणे पार्श्वे राज्ञस्तांबूलदायिनी ॥ २३ ॥

[5]वैव(?)स्वदक्षिणे[6] पार्श्वे[7] मन्त्रिणश्च[8] पुरोधसः ।
वेत्रासने[9] निवेश्याः[10] स्युः[11] नरेन्द्रेण सगौरवम् ॥ २४ ॥

*[12]मुण्डासने च तन्मध्ये युवराजं निवेशयेत् ।
तस्य दक्षिणतः पार्श्वे तद्वत्सेनापतीनयम्[13] ॥ २५ ॥

आसनेषु यथार्हेषु सेनानीपृष्ठभागतः ।
मण्डलेश्वरसामन्तपरमण्डलिनः क्रमात् ॥ २६ ॥

[14]दैवज्ञपतयो वैद्यायुध[15]श्रीकरणाधिपाः[16] ।
हस्त्यश्वरथनेतारः कोशगोष्ठगृहाधिपाः ॥ २७ ॥

तौर्यत्रितयतत्त्वज्ञा मल्लाद्या राजवल्लभाः ।
यथास्थानं[17] निवेश्याः[18] स्युः तदध्यक्षैर्नृपाज्ञया ॥ २८ ॥

A. 1. वासधाने- B. वाससाने- 2. A.B. वंशकमागताः 3. A.B. तीं
4. A.B. आपीत 5. A.B. corrupt. 6. A.B. णा 7. A.B. र्श्वे
8. A.B. मन्त्रिः.....9. A. नेत्रासने B. वेत्रासन्ने 10. A.B. श्मा
11. A.B. सुन् 12. मण्डासनेन. There being no need for instrumental, the last letter न may be च 13. A. पतिनयः
14. A. दैवतयो B. देवतयो 15. A. यु B. बुधा 16. B. णाभिधाः
17. A.B. न 18. A.B. शा

* See Bharata XIII. 207 (Kasi) : मुण्डासनं च दातव्यं सेनानीयुवराजयोः। Muṇḍāsana is, like a stool, a seat without rest for arms or back.

वाग्गेयकार[1]गन्धर्वस्वरादीन्। गायनान्नटान् ।
नर्तकान्वाग्मिनः[2] पुण्यपाठकान्कथकानपि ।
वामतो[3] द्विविधातोद्यवादकांश्च[4] निवेशयेत् ॥ २९ ॥

मान्यामान्य[5]विचारज्ञः[6] स्वामिचित्तानुवर्तकः ।
नातिदूरे[7] प्रतीहारः तिष्ठेद्[8] वेत्रधरः पुरः[9] ॥ ३० ॥

करवालकरैरासैरङ्गरक्षैः[10] समन्ततः ।
परिवृत्य सदः स्थेयं स्वपरज्ञान[11]तत्परैः ॥ ३१ ॥

रत्नाभरणसंक्रान्तैः प्रतिविम्बैर्बहूकृताः[12] ।
पूरिता गन्धतैलेन स्फारकर्पूरवर्तयः ।
दीपिकाः पुरुषैः धार्याः[13] सुवेषैर्वर्णदण्डिकाः ॥ ३२ ॥

राज्ञः पूर्वेद्युरादिष्टा[14] प्रातः स्नातवती[15] ततः[16] ।
इष्टेष्टदेवता विप्रैः कारयित्वा ग्रहाध्वरम्* ।
प्रीणयित्वा[17] द्विजाचार्यबृन्दविद्यावतोऽखिलान् ॥ ३३ ॥

गर्भोल्लसितसौवर्ण[18]सामिदर्शित[19]केतकम्[20] ।
धम्मिल्लं दधती कल्पं कुन्तलैर्वकुलप्रियाम्[21](?)§ ॥ ३४ ॥

---

1. A.B. रा 2. A. वजिनः B. वाजिनः 3. A. नो 4. B. यादकां 5. B. मान्यमान 6. A.B. विशारज्ञा 7. A. सन्तिदूरे B. नातिपूरे 8. B. ष्ठ 9. A.B. रा 10. A. रैक्षै 11. B. पर dropped. 12. B. बुभूतदा 13. A. ढार्या B. ढार्यः 14. B. निष्ठा 15. A. स्नावति 16. A. रतः 17. A. प्रण-धत्व B. प्रणयित्वा 18. A.B. र्ण 19. A.B. देशीत 20. A.B. कः 21. B. वकुलाप्रियम्

† Vaggeyakāra is the highest type of musician who is also a composer; Gāndharva is a musician proficient in Mārga and Deśi music; Svarādi is a musician versed only in the Mārga.

* This is Graha-makha, propitiation of the Planets.

§ According to the text of Kumbha, which echoes Jāya, the danseuse may dress her hair into Dhammilla (knot) or Veṇi (plait); and Kuntalas, bedecked with pearls, should add charm to the forehead. Kuntala goes with the forehead in S. Ratn. also, VII. 1241.

अङ्गप्रभा[1]नुसारेण तत्तत्कालोचितेन वा[2] ।*
चन्दनेन विधाया[3]ङ्गोद्वर्तनं[4] कुंकुमेन वा[5] ॥ ३५ ॥

मञ्जुशिञ्जानमञ्जीरमेखलावलयादिभिः ।
रत्नालंकरणैर्हीर[6]स्थूलमुक्ताफलोत्तरैः ।
तान्यङ्गै[7]र्भूषयन्ती[8] स्वैस्तै[9]रप्यङ्गेषु भूषिता[10] ॥ ३६ ॥†

[11]अङ्काधिरोपित[12]स्वाती[13]शशिबिम्ब[14]विडंबिना ।
आननेन विराजन्ती नासामौक्तिकशोभिना** ॥ ३७ ॥

कस्तूरीतिलकाङ्केन[15] वदनेनानुकुर्वती ।
प्रान्तस्थितकुरङ्गस्य पूर्णस्यामृतदीधितेः[16] ॥ ३८ ॥

1. A. B. प्रहा 2. A. विनेनवम् B. विने—3. A. B. पा 4. B. द्वक्तन 5. A. च B. व 6. A. वीर B. भर 7. B. ङ्गै dropped. 8. A. भूषयन्त्यै B. भूष–न्त्यै 9. B. स्वै 10. A.B. ताः 11. A. B. अङ्का 12. B. रापित 13. A. स्वापि B. स्यापि 14. A B. शमलम्बि 15. A.B. ङ्केन 16. A.B. तिः

* The sense is that the body should be treated with coloured dust of sandal or saffron, in accordance with the complexion of the lady and the time of the year or day. In the corresponding place Kumbha says:

श्यामगौरविभागेन यत्र यद्वर्णपोषकः (?) ।
देशकालवयोवर्णानुसारेण प्रकल्पयेत् ॥

† The meaning is: 'adorned on her limbs with those ornaments, though with her limbs she was, is reality, adorning those ornaments.'

** The face with the nose-pearl resting on it, is like the moon with the Star Svāti on the moon's lap. Svāti, of all stars, is mentioned because the pearl is connected with that Star.

[1]मुखपद्म[2] पतत्कामि[3]नयनालि[4]जिघृक्षया[5] ।
सुवर्णवस्त्रमाल्याद्यैः भाण्डयुक्तेन राजता ॥ ३९ ॥

[6]स्मरेण दधती न्यस्तां[7] मौलौ मौक्तिकजालिकाम् ।‡
‡रूपस्य[8] प्रतिरूपस्य दर्पणे प्रतिमां तदा ॥ ४० ॥

दृष्ट्व[9] वाम(नाम ?) मन्दाक्षमन्दस्मित[10]मुखी ततः ।[11]
[12]कनकान्दोलिकारूढा[13] छत्रचामरशोभिता ॥ ४१ ॥

बृन्देन सहिता सायं यायान्[14] नृपतिमन्दिरम् ।
[15]नैपथ्यस्थान[16]मासाद्य[17] कौतुक[18]त्वरितं ततः ॥ ४२ ॥

ऊर्वोरालोकनं[19]चारीकरणाद्येषु लक्षणम्[20] ।
कूर्पास[21]क्लुप्तूक्षितमादीयत(?) मा स्म भूत् ॥ ४३ ॥**

1. A. म 2. A. पत्य 3. A.B. मी 4. A.B. लि 5. B. जिरवीतातः 6. A. स्वरेण B. Line missing. 7. A. स्ता 8. B. This and the next line missing. 9. A. दृष्टेव 10. A. स्थित 11. A. The line सुवर्णवस्त्र etc. repeated. 12. A.B. कनकारं 13. A. रुः B. रुध्वा 14. A.B. याया 15. A. चैनपत्य 16. B. आनाम 17. B. माध्यः 18. A.B. कं 19. A. न B. no न 20. A.B. श्लक्षनम् 21. A. After कूर्पास, owing to haplography with कापार्स down below, jumps over of the line and two more full lines. B. corrupt, but sense can be made out.

‡ The meaning is 'Desirous of catching the bees of the looks of the lovers which fall on her face, Cupid, with the golden garment or fine coloured garment, the garland as thread and the vessel (ornaments), appears to have placed on her head a net of pearls.

** The sense is that lest the view and correct positions and movements of the limbs should become obscure, the dansuese should wear tight shorts inside and over that a diaphanous apparel of cotton or silk with fine dazzling embroidery.

इति सूक्ष्मतरं त्व[1]न्तरद्धोरुक[2]मुपर्यथ[3] ।
सूचीविज्ञानसौवर्णपत्र[4]रत्नान्विता[5]ञ्चलम् ॥ ४४ ॥

कार्पासमथवा क्षौमं पट्ट.....[6]चित्रितम् ।
कर्णाटीप्रियया रीत्या यासीतावसितं ततम् (?) ॥ ४५ ॥

रत्न[7]सौवर्णपत्राद्यै:[8] मण्डितं दधती लघुम् ।
आलोकन[9]मिदं[10] श्लक्ष्णं प्रेक्षणे तु . . [11] भवेत्[12] ॥ ४६ ॥

[13].....पात्र[14]धृताद्धोरुक[15]कञ्चुकम् ।
मुक्ताहारादि[16] नात्यन्त[17]मङ्गसंलग्न[18]भूषणम् ॥ ४७ ॥

सज्जी[19]भूय तत:[20] सर्वं बृन्दं रङ्गभुवं विशेत् ।
पात्रस्य[21] दक्षिणे पार्श्वे मुखरी स्यान्मुखे स्थित: ॥ ४८ ॥

[22]क्रमान्मार्दङ्गिकास्तस्य तिष्ठेयुर्वामत:[23] तत: ।
हुडुक्की शाङ्खिका देशीपटही[24] करटाधर: ॥ ४९ ॥

काहलावादका: कांस्यतालिनश्च यथाक्रमम् ।
तिष्ठेयु: पृष्ठतस्तेषामेवं प्रतिमुखर्यपि[25] ॥ ५० ॥

1. A.B. सत्त्वा 2. A B रद्धोरु 3. A B. था 4. A.B. पत्र 5. A.B. रत्नविता 6. A.B. Unindicated gap. 7. A. क्तं B. त्नं 8. A.B. पाद्यैमं 9. A.B. वन 10. A.B. यं 11. A.B. two syllables wanting; my be यथा. 12. A.B. भयेत् 13. A.B. Line wanting in six syllables. 14. A. यात्रा 15. A. चोरुक B. ध्दोरुक 16. A.B. भरादि 17. A. क्ता B. क्त 18. A. संरग्न B. सङ्गयन्न 19. A. सर्जी 20. B. तन: 21. A. वात्रस्य B. णवात्त 22. A. कमां 23. A. न: 24. A. पटनी B. वट्टी 25. A.B. स्यपि

तस्यानुवादकाद्याश्च भवेयुर्वामपार्श्वतः ।
तिष्ठेतां मुख्य[1]गायिन्यौ[2] पात्रपाश्चात्य[3]भागतः ॥ ५१ ॥

एतयोः पार्श्वयोस्तालधरा[4] प्रौढाः[5] कलादिषु ।
तत्पृष्ठे वांशिकाः कांस्यधराः[6] स्युरनुगायिकाः[7] ॥ ५२ ॥

बृन्दं नारीमयं सर्वमपि कार्यं विलासिना[8] ।
राज्ञां विद्यावतां चाग्रे वैभवख्यापनाय च* ॥ ५३ ॥

॥ इति बृन्दविन्यासः ॥

भाविरागांशभूतेन[9] मध्यसप्तक[10]वर्तिना[11] ।
वादयेद्वांशिको नादं स्वरेणादौ प्रयत्नतः ॥ ५४ ॥

[12]मन्द्रं गाता क्षमः प्राप्तुं[13] तारं च न[14] विनामुना ।
[15]योज्यस्तेन समं नादः[16] सर्वातोद्य[17]समुद्भवः ॥ ५५ ॥

यथा नादमयं सर्वं जगत्स्थावरजङ्गमम् ।
स्यादेवं सति नादात्मा देवो[18]नेतः(? [19]) फलप्रदः[20] ।
†प्रयोगस्सुभगः सान्द्रः सम्मतश्च सभासदाम् ॥ ५६ ॥

॥ इत्यातोद्य[21]मेलनम् ॥

1. B. ख्या 2. A. धिन्यौ 3. A. पार्श्वान्य B. पार्श्वात्य 4. A. नेरः B. धरैः 5 A.B. ढ 6. A.B. Haplography. कांस्युः 7. A. कायिकाः 8. B. ता 9. A. भूतो 10. A.B. र्पक 11. A.B. र्तना 12. A.B. मन्नृज्ञाता 13. A.B. सं 14. A. तारश्चन B. तारश्चा 15. A. योन्धास्तोन B. योज्यास्तेन 16. B. टा 17. A. सर्वान्तोष्य B. सर्वान्य 18. A.B. देवे 19. May be (अ)नेक or (अ)नन्त 20. A. फलप्रदा B. फलं प्रदा 21. A. इत्यन्यतोद्य B. इत्यान्यतोद्य

* See above p. 234 where also these lines occur.

† This line, as bringing the topic to a close, is somewhat abrupt ; there may be a gap.

§पूर्वोक्तलक्षणात्[1] तस्मात्समहस्ता[2]दनन्तरम् ।
‡[3]जोडनीक्रमतो वाद्यं वादयित्वा हुडुक्किना ॥ ५७ ॥

स्निग्धतारतरं[4] प्रान्ते[5] झेङ्कारे[6] तत्प्रवर्तिते[7] ।
नर्त(?) तालप्रमाणेन ततः[8] तद्द्विगुणेन[9] वा ॥ ५८ ॥

हुडुक्काकरटादेशीपटहैः[10] श्रोत्र[11] मञ्जुलम् ।
*लहर्यां वाद्यमानायां[12] लयच्छन्दानु[13]सारतः[14] ॥ ५९ ॥

निस्सारुकैककालाभ्यां क्रमान्मद्दलवादकाः ।
वादयेयुः,[15] यतिः[16] श्रोत्रं सुधासारेण[17] सिञ्चती ॥ ६० ॥

तालद्विमानतः पूर्वं प्रारभ्या[18] क्रमवर्धितैः ।
यावत्षोडशभिर्गानैः (मानैः ?) अमिताः (संमिता ?) तत्प्रमाणतः ॥ ६१ ॥

हस्तेन[19] मृदुना स्निग्धा[20]† प्रारभ्या[21] मुख[22]वादिना ।
[23]वीणानिनादिनी[24] पूर्वं पश्चादारभट[25]ध्वनिः[26] ॥ ६२ ॥

1. णं B. गा 2. समाहम् 3. A. नजास B. जोसनि 4. B. मारतं 5. A. णे 6. A.B. झङ्कारे 7. A.B. र्तते 8. A. नतः 9. A.B. तद्विगुणेन 10. A B गैः 11. B. श्रोत्र 12. A. वाद्यकानूयां B. वाद्यकानृत्यां 13. B. छानानु 14. A. सारकः B. सारकृत् 15. A. वादयो 16. A. युध्यति B. यति 17. A. धारेण 18. A. प्राख्याः B. प्रार-याः 19. A. भूस्तेन B. हसेन 20. A.B. ग्धाः 21. A. प्रारब्या B. प्रारब्धया 22. A. मूल B. A. मुख्य 23. A. वीणादि 24. A. निः B नीः 25. वित B. भत 26. A. ध्वनिम् B. ध्वनीम्

§ See above p. 205. On the sequence set forth here compare above Śuddha and Deśi, and Perana and Prenkhaṇa Paddhatis, pp. 205, 207, 211, 213.

‡ Joḍanī is one of the Vādya - prabandhas, as also a form of playing on the Huḍukkā (S. Ratn. V.I. 927-8); the latter is meant here.

* Laharī is a part of the Udgrāha.

† Snigdha and Ārabhaṭa (i.e. Komala and Uddhata) refer to soft and vigorous playing.

दृढहस्तप्रहारेण प्रहर्षाद्[1] रागमेदुरा[2] ।
हुडुक्काकरटोद्दामवहनीभिः[3]* मनोहरा ।
काहलाकांस्यतालोत्थनिनादै[4]रुप[5]बृंहिता ॥ ६३ ॥

ततः प्रहरणं लग्नम्** एकताल्यैव संमितम् ।
स्निग्धारभटभेदेन वादयेयुर्यथोचितम् ॥ ६४ ॥

करटां[6] काहलां[7] कांस्यताम्रजामत्र[8] भूमुजः ।
रसार्द्रे[9]हृदयाः केचित् पारुष्यान्नानुमन्वते[10] ॥ ६५ ॥

गीत[11]नृत्तविहीनत्वाद् वाद्यं शुष्कमिति स्मृतम् ।
इह स्निग्धस्य पर्यायौ[12] समानो[13]§पशमौ बुधैः ।
तथैवारभटस्यापि[14] गदितौ[15] गजरोच्चलौ[16]† ॥ ६६ ॥ (इति शुष्कवाद्यम्)

चतुरश्रा चतु[17]स्तंभा[18] रङ्ग-[19] रत्नराजिता[20] ।
[21]... ...चण्डित्विका (मण्डपिका ?) स्थाप्या हस्त[22]द्वितयसम्मिता[23] ॥६७॥

1. A.B. र्षा 2. A.B. रा: 3. A.B. वहरीभि:. May be लहरीभिः also; see above v. 57. 4. A. B. दे 5. A.B. रूप 6. A. टा 7. A. काललं B. कालल 8. A. कांस्य तालाब्जौ पात्र B. कांस्यस्तालाब्जौ पात्रं. What is meant is that some Kings of highly refined taste do not like in the orchestra the instruments Karaṭā and Kāhalā if they are made of Kāmsya or Tāmra metals, as their sound will be harsh. 9. A. द्र B. द्रि 10. A.B. न्यनुम- न्यते 11. A.B. तं 12. A. वर्यायौ 13. B. शमानो 14. A.B. भाटवि 15. A.B. तो 10. B. लो 17. A.B. चतुर 18. A.B. भ 19. Here A. reads a letter यै, B. मैं 20. A.B. ता: 21. A.B. Three letters wanting. 22. B. ह missing. 23. A.B. ता:

* Vahani is a graceful treatment (Gamaka or Vāga) of a part of a Rāga (Sthāya) involving 'Kampa.' See S. Ratn. III. 99, 114-117. VII. 1304.

** See above p. 212.

§ Samāna may be the Vādyaprabandha called Sama.

†Uccala may be the Uccalita variety of the Vādyaprabandha called Yati.

हस्तमात्राधिकोत्सेधा तत्तत्प्राणान्तः.....(?) ।

विचित्रमणिसन्दोहद्योतमानप्रभावलिः ॥ ६८ ॥

[1]तिष्ठेत्तत्र विमानस्था नाकनारीव नर्तकी ।

[2]वन्द्यमानाभितः[3]स्त्रीभिश्चामर[4]व्यजना[5]दिभिः ॥ ६९ ॥

तुल्यरूपवयोवर्णप्रमाणाभ्यां परस्परम् ।

अनघै[6]श्शोभमानाभ्यामम्बराभरणादिभिः ॥ ७० ॥

[7]वाद्यतालप्रमाणाभ्यां (?) तृणाभ्यां (तूणाभ्यां ?) पुष्पधन्विना (नः ?) ।

नारीभ्यां[8] चोलिकागुप्तकुचाभ्यां विधृतांचलाः[9] ॥ ७१ ॥

[10]अष्टारत्निकृतायामाः तदर्धेन[11] तु विस्तृताः[12] ।

पुरो यवनिका[13]श्चित्रा[14]स्सूचीविज्ञानभङ्गिभिः ॥ ७२ ॥

[15]तिस्रस्ततोऽधिका वा[16] स्युः यथावाद्यं[17] यथारुचि[18]* ।

ततः पुष्पाञ्जलेः[19] पूर्वं पीठ(पाट ?)बन्धै[20]स्सह क्रमात् ॥ ७३ ॥

कर्तव्यं प्रतिसीराणा[21]मेताभ्या[22] मपसारणम्[23] ।

प्रथमामन्तरेणैकां[24] पात्रस्य पुरतः स्थिताम् ॥ ७४ ॥

---

1. A.B. तिष्ठत् 2. B. वाद्य 3. A. भिन B. भि 4. A.B. चार 5. B. भ्यञ्जना 6. A. सै 7. पा 8. A. नाकंभ्यां B. रीभ्यां 9. A.B. न्तलाम् 10. B. Line missing. 11. A. तदनेन 12. विस्मृताः 13. A.B. धवनिका 14. B. त्र 15. A.B. त 16. B. पा´ 17. A. द्य 18. A.B. चिः 19. B. लैः 20. A.B. मर्दै 21. A. प्रितिवीराणां B. प्रीतिर्वारणां 22. A. एनाभ्या 23. A.B. मुपसारिणम् 24. मर्तरेणैकं B. मन्तरेणैकं

* *Cf.* Pratāparudrayaśobhūṣaṇa I. 58 where Kumārasvāmin the commentator quotes the corresponding lines on the three curtains from the Sangita cūḍāmaṇi.

कर्पूरधूपसङ्काशपीतांशुकतिरोहिता ।
सद्यः क्षीराब्धिजातेव तिष्ठेल्लक्ष्मीः पतिंवरा[1] ॥ ७५ ॥

तृतीया[2] पीठ(पाट ?)बन्धस्य शब्देनान्तेऽपसर्पिता ।
सर्वातोद्यनिनादेषु युगपत् श्रोत्रहारिषु[3] ॥ ७६ ॥

*ऊर्ध्वभूमौ तुरीष.....तुमुद्यतैः (?) ।
हैमैर्मणिमयैः[4] काञ्ची[5]मञ्जीरवलयादिभिः ॥ ७७ ॥

अन्यैराभरणैः किंच वस्त्रैश्चामीकरोच्चयैः ।
§श्रीखण्डागरुजैः.....[6] कुंकुमजै[7]रपि ॥ ७८ ॥

तोषयेयुरिमां[8] बृन्द[9]युक्ता[10]मिङ्गित[11]वेदिनः ।
†मत्तद्विपघटा[12]वाजिभैर† . . . . . [13]धुरं परम् (?) ॥ ७९ ॥

क्रमेण कुङ्कुमं दद्यात् द्वन्द्वा(?)† शक्त्यनुसारतः ।
[14] . . श्रान्ता . . [15] गत्वा[16] वेश्म[17] विश्राम्यतां त्वया ॥ ८० ॥

इत्यादिश्य महीपालो हर्षादेनां[18] विसर्जयेत् ।
[19]स्वामिसंभावनाधन्यंमन्यां लक्ष्मीभरालसाम्[20] ॥ ८१ ॥

---

1. A.B. लक्ष्मीपतिं वरा 2. A.B. य 3. A.B. निषु 4. A. रणुमयैः B. रमुन्मयैः 5. A.B. कञ्चित् 6. A.B. भारैर्दर्प 7. A. कुंकुमयं B. तुत्कमजं 8. A. मा 9. A.B. दं 10. B. क्त 11. A.B. मङ्गत 12. A. टां 13. Line wanting in two syllables. 14. A.B. तद्वि 15. A.B. दर्सि 16 A.B. हत्वा 17. B. वेश 18. A.B दीनां 19. B. पवामि 20. A.B. लक्ष्मीं हरालसाम्

* The gap in this line is probably more than what is apparent, for the next topic seen is presentations to the danseuse and giving her leave.

